CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

SAMAVEDA
OF THE
JAIMINIYAS

PROF. DR. RAGHU VIRA

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

11840
BHARATIYA VIDYA BHAVAN
S. N............
LIBRARY.
CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

RAG

1057

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

11846.
BHARATIYA VIDYA BHAVAN
S. N............
LIBRARY.
CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

SĀMAVEDA

OF THE

JAIMINĪYAS

Text and Mantra Index

Prof. Dr. Raghu Vira

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Sarasbati Vihara Series

EDITED BY

Raghu Vira, M. A., Ph. D., D. Litt. et Phil.
DIRECTOR, INTERNATIONAL ACADEMY OF INDIAN CULTURE, LAHORE
IN COLLABORATION WITH OTHER SCHOLARS

Volume 3

SĀMA VEDA OF THE JAIMINĪYAS

Rupees 10/- Shillings 15/-

August 1938

Published by the Director

for

The International Academy of Indian Culture,
Lahore, India

Printed by Mr. Sadhu Ram, M. A., at the Academy's own printing works, the Arya Bharati Press
LAHORE

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

BHARATIYA VIDYA BHAVAN
S. N...........
LIBRARY.

सरस्वती-विहार-ग्रन्थाः

३

सामवेदीया

जैमिनीय-संहिता

Sa2V3J
RAG

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya * Bharatiya Vidya

आचार्य-रघुवीरेण परिष्कृता

मूल्यं-रूप्याणां दश विक्रमाब्दाः १९९५

प्रकाशिता—सरस्वती-विहारः, लवपुरम्

एषा संहिता सरस्वती-विहार आर्यभारत्य्-अभिधे मुद्रण-गृहे मुद्रिता

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Bhawan's Sri San… …acharya … …krit Mahavidyala …ative Vidya

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जैमिनीय-मन्त्राणां
कौथुम-संहितायां क्रमः

जैमिनीये	कौथुमीये
पूर्वार्चिकम् ॥१॥	पूर्वार्चिकम् ॥१॥
आग्नेयं पर्व ॥	प्रथमः प्रपाठकः ॥१॥
	पूर्वार्धः ॥१॥
१.१-१०	१.१-१०
२.१-१०	२.१-१०
३.१-१४	३.१-१४
४.१-१०	४.१-१०
५.१-१०	५.१-१०
	अपरार्धः ॥२॥
६.१-८	१.१-८
७.१-१०	२.१-१०
८.१-८	३.१-८
९.१-१०	४.१-१०
१०.१-६	५.१-४,६,५
	द्वितीयः प्रपाठकः ॥२॥
	पूर्वार्धः ॥१॥
११.१-१०	१.१-१०
१२.१-८	२.१-८
९,१०	न स्तः
ऐन्द्रं पर्व ॥	
१३.१-१०	३.१-१०
१४.१-१०	४.१-१०
१५.१-१०	५.१-१०
	अपरार्धः ॥२॥
१६.१-१०	१.१-१०
१७.१-१०	२.१-१०
१८.१-१०	३.१-१०
१९.१-१०	४.१-१०
२०.१-९	५.१-९

जैमिनीये	कौथुमीये
	तृतीयः प्रपाठकः ॥३॥
	पूर्वार्धः ॥१॥
२१.१-१०	१.१-१०
२२.१-१०	२.१-१०
२३.१-९	३.१-९
२४.१-९	४.१-४,७,८,५,६,९
१०	नास्ति
२५.१-१०	५.१-१०
	अपरार्धः ॥२॥
२६.१-१०	१.१-१०
२७.१-१०	२.१-१०
२८.१-१०	३.१-१०
२९.१-१०	४.१-४,७,८,५,६,९,१०
३०.१-१०	५.१-१०
	चतुर्थः प्रपाठकः ॥४॥
	पूर्वार्धः ॥१॥
३१.१-१०	१.१-१०
३२.१-१०	२.१-१०
३३.१-१०	३.१-१०
३४.१-९	४.१-९
३५.१-१०	५.१-१०
	अपरार्धः ॥२॥
३६.१-१०	१.१-१०
३७.१-८	२.१-८
३८.१-१०	३.१,२,५,६,३,४,७-१०
३९.१-११	४.१-११
	पञ्चमः प्रपाठकः ॥५॥
	पूर्वार्धः ॥१॥
४०.१-१०	१.१-१०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जैमिनीये	कौथुमीये
४१.१-८	४.१-८
४२.१-१०	५.१-१०
	चतुर्थः प्रपाठकः ॥४॥
	अपरार्धः ॥२॥
४३.१-१०	५.१-१०
	पञ्चमः प्रपाठकः ॥५॥
	पूर्वार्धः ॥१॥
४४.१-८	१.३,२,१,४-८
४५.१-१०	२.१-१०
	अपरार्धः ॥२॥
४६.१-१०	१.१-१०
४७.१-१०	२.१-६,९,७,८,१०
४८.१-१०	३.१-४,८,१०,५-७,९
पावमानं पर्व ॥	
४९.१-१०	४.१-१०
५०.१-१०	५.१-१०

जैमिनीये	कौथुमीये
	षष्ठः प्रपाठकः ॥६॥
	पूर्वार्धः ॥१॥
५१.१-१०	१.१-१०
५२.१-१४	२.१-१४
५३.१-१२	३.१-९,१२,११,१०
५४.१-१०	४.१-४,७-१०,५,६
५५.१-१२	५.१-६,८,७,१०,१२,९,११
	अपरार्धः ॥२॥
५६.१-९	१.१,२,७,८,३-६,९
५७.१-१२	२.१-६,९,१०,७,८,११,१२
५८.१-१२	३.१-१२
५९.१-८	४.१-८
	इति षष्ठः प्रपाठकः ॥
	इति पूर्वार्चिकं समाप्तम् ॥

आरण्यकम् ॥२॥	अरण्यसंहिता ॥
१.१	१.२
२	३.२
३	३
४	१
५	नास्ति
६	६
७	५
८	४.१२
९	नास्ति
१०	३.४
२.१	४.८
२	३.१०
३	८
४	९

	पूर्वार्चिकम् ॥१॥
	तृतीयः प्रपाठकः ॥३॥
	पूर्वार्धः ॥१॥
५	४.१०
	अरण्य-संहिता ॥
६-८	३.७,१२,१३
९	४.१
३.१	११
२	५.२
३	४.२
४,५	न स्तः
६-१०	४.३-७
४.१,२	न स्तः
३	४.९
४	नास्ति

Funding by IKS-MoE

BHARATIYA VIDYA BHAVAN S. N.......... LIBRARY.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जैमिनीये	कौथुमीये
५	४.१०
६	५.३
७	नास्ति
८	१.३
९	४.११
१०	१.१
५.१-५	१.४-८

जैमिनीये	कौथुमीये
	अरण्य-संहिता
६-१०	२.१,५,३,४,२
६.१	७
२-५	५.१,४-६
अथ शक्वर्यः ॥	महानाम्न्यः
७.१-३	
अथ पुरीष-पदानि ॥	
७.४	

उत्तरार्चिकम् ॥३॥	उत्तरार्चिकम् ॥२॥
गायत्रम् ॥	नवमः प्रपाठकः ॥९॥
	अपरार्धः ॥२॥
१.१,२	७.१,३
	प्रथमः प्रपाठकः ॥१॥
	पूर्वार्धः ॥१॥
३-११	१.१-३.३
२.१-१२	४.१-७.३
अग्निष्टोमः ॥	
३.१-८	८.१-१०.३
४.१-९	११.१-१४.२
५.१-३	१५.१-३
	अपरार्धः ॥२॥
४,५	२२.१,२
	पूर्वार्धः ॥१॥
६-१३	१८.१-२०.२
अतिरात्रः ॥	
६.१-८	२१.१-२३.३
	तृतीयः प्रपाठकः ॥३॥
	पूर्वार्धः ॥१॥
९-११	२२.१-३
	प्रथमः प्रपाठकः ॥१॥
	अपरार्धः ॥२॥
७.१-१२	१.१-४.३

८.१-१२	५.१-८.३
९.१-३	९.१,३,२
४-७	१०.१-११.१
८,९	११.३,२
१०-१२	१२.१-३
प्रथमम् अहः ॥	
१०.१-६	१३.१-१५.२
११.१-९	१६.१-१८.३
१२.१-६	१९.१-२१.१
७,८	२२.२,३
द्वितीयम् अहः ॥	द्वितीयः प्रपाठकः ॥२॥
	पूर्वार्धः ॥१॥
१३.१-१५	१.१-५.३
१४.१-९	६.१-८.३
१०-१७	९.१-३
१५.१-१२	१०.१-१४.२
१६.१-३	१५.१-३
	प्रथमः प्रपाठकः ॥१॥
	पूर्वार्धः ॥१॥
४,५	१६.१,१७.१
	द्वितीयः प्रपाठकः ॥२॥
	पूर्वार्ध ॥१॥
६-१७	१६.१-१९.३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जैमिनीये	कौथुमीये
तृतीयम् अहः ॥	
	अपरार्धः ॥२॥
१७.१-९	१.१-३.३
१०,११	३.५,४
१२-१४	४.१-३
१८.१-१२	५.१-८.३
१९.१-१३	९.१-१३.२
२०.१-३	१४.१-३
	षष्ठः प्रपाठकः ॥६॥
	द्वितीयार्धः ॥२॥
४	६.१
	चतुर्थः प्रपाठकः ॥४॥
	अपरार्धः ॥२॥
५	९.१
	द्वितीयः प्रपाठकः ॥२॥
	अपरार्धः ॥२॥
६-१९	१५.१-१९.३
चतुर्थम् अहः ॥	तृतीयः प्रपाठकः ॥३॥
	पूर्वार्धः ॥१॥
२१.१-४	१.१-२.१
५,६	२.२,३
७-२१	३.१-५.३
	षष्ठः प्रपाठकः ॥६॥
	द्वितीयार्धः ॥२॥
२२.१-३	७.१-३
	तृतीयः प्रपाठकः ॥३॥
	पूर्वार्धः ॥१॥
४-१५	६.१-९.३
२३.१-९	१०.१-१३.१
१०,११	१३.३,२
१२-१६	१४.१-१५.२
२४.१-३	१६.१,३,२
४-१७	१७.१-२१.३

जैमिनीये	कौथुमीये
पञ्चमो ऽध्यायः ॥	अपरार्धः ॥२॥
२५.१-१०	१.१-३.४
२६.१-१०	३.५-४.७
२७.१-७	५.१-६.३
	षष्ठः प्रपाठकः ॥६॥
	द्वितीयार्धः ॥२॥
२८.१-३	१०.१-३
	तृतीयः प्रपाठकः ॥३॥
	अपरार्धः ॥२॥
४-१५	७.१-१०.३
२९.१-१४	११.१-१५.३
३०.१-६	१६.१-१८.१
७,८	१८.३,२
९-२३	१९.१-२३.३
षष्ठो ऽध्यायः ॥	चतुर्थः प्रपाठकः ॥४॥
	पूर्वार्धः ॥१॥
३१.१-३३	१.१-६.३
३२.१-३	न सन्ति
४-१३	७.१-१०.१
१४,१५	१०.३,२
३३.१-१२	११.१-१५.१
१३,१४	१५.३,२
१५,१६	१६.१,२
१७	१६.३ (चरमैव पंक्तिः समाना)
३४.१-२३	१७.१-२४.३
सप्तमो ऽध्यायः ॥	अपरार्धः ॥२॥
३५.१-९	१.१-९
१०	११
३६.१	१०
२-१०	१२-२.८
३७.१-४	२.९-१२
३८.१-३	न सन्ति
४-१२	३.१-५.३
३९.१-५	७.१-८.२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

BHARATIYA VIDYA BHAVAN
S. N. ....
LIBRARY.

जैमिनीये	कौथुमीये
	पूर्वार्चिकम् ॥१॥
	षष्ठः प्रपाठकः ॥६॥
	अपरार्धः ॥२॥
४०.१,२	४.७,८
	उत्तरार्चिकम् ॥२॥
	चतुर्थः प्रपाठकः ॥४॥
	अपरार्धः ॥२॥
३-१८	९.१-१४.१
१९,२०	१४.३,२
अष्टमो ऽध्यायः ॥	पञ्चमः प्रपाठकः ॥५॥
	पूर्वार्धः ॥१॥
४१.१-१०	१.१-२.७
४२.१-६	२.८-३.४
७,८	३.६,५
९,१०	७,८
४३.१-१०	९-४.९
४४.१-५	५.१-५
	पूर्वार्चिकम् ॥१॥
	षष्ठः प्रपाठकः ॥६॥
	पूर्वार्धः ॥१॥
६	१.८
७,८	न स्तः
	उत्तरार्चिकम् ॥२॥
	पञ्चमः प्रपाठकः ॥५॥
	पूर्वार्धः ॥१॥
९,१०	७.१,३
४५.१	२
२-४	६.१-३
४६.१-३	न सन्ति
४-६	९.१-३
	षष्ठः प्रपाठकः ॥६॥
	प्रथमार्धः ॥१॥
७-९	२.१-३

जैमिनीये	कौथुमीये
	पञ्चमः प्रपाठकः ॥५॥
	पूर्वार्धः ॥१॥
१०-१२	१०.१-३
४७.१-१०	११.१-१४.२
४८.१-४	१५.१-१६.१
५,६	१६.३,२
७-१७	१७.१-२०.२
१८	नास्ति
नवमो ऽध्यायः ॥	अपरार्धः ॥२॥
४९.१-३	१.१,३,२
४	२.१
५	६
६	५
७	३
८	४
९	२
१०	७
५०.१-५	२.८-३.२
६-९	३.४-७
१०	३
५१.१	८
२-५	६.१-४
६	६
७	५
८-१०	५.१-३
५२.१-२	४,५
३	नास्ति
४,५	४.१,२
६	६
७-९	३,५,४
१०	७.१
५३.१-५	२-६
	प्रथमः प्रपाठकः ॥१॥
	पूर्वार्धः ॥१॥
६-८	३.१-३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जैमिनीये	कौथुमीये
	अष्टमः प्रपाठकः ॥८॥
	द्वितीयार्धः ॥२॥
५४.१-३	१८.१-३
	पञ्चमः प्रपाठकः ॥५॥
	अपरार्धः ॥२॥
४-६	९.१-३
७-९	न सन्ति
१०-१२	१०.१-३
५५.१-१३	११.१-१५.२
५६.१-१०	१६.१-१९.१
११,१२	१९.३,२
१३-१५	२०.१,३,२
	सप्तमः प्रपाठकः ॥७॥
	द्वितीयार्धः ॥२॥
१६,१७	१०.१,२
	पञ्चमः प्रपाठकः ॥५॥
	अपरार्धः ॥२॥
१८-२३	२२.१-२३.३
दशमो ऽध्यायः ॥	षष्ठः प्रपाठकः ॥६॥
	प्रथमार्धः ॥१॥
५७.१-४	१.१-४

जैमिनीये	कौथुमीये
	तृतीयार्धः ॥३॥
५-१०	११.१-१२.३
	चतुर्थः प्रपाठकः ॥४॥
	अपरार्धः ॥२॥
११-१३	६.१-३
	सप्तमः प्रपाठकः ॥७॥
	प्रथमार्धः ॥१॥
५८.१-३	३.१,३,२
	षष्ठः प्रपाठकः ॥६॥
	प्रथमार्धः ॥१॥
४-१०	४.१-६.२
	प्रथमः प्रपाठकः ॥१॥
	पूर्वार्धः ॥१॥
५९.१-५	१६.१-१७.३
	षष्ठः प्रपाठकः ॥६॥
	प्रथमार्धः ॥१॥
६-१५	७.१-१०.१
१६,१७	१०.३,२
१८-२०	११.१-३

	उत्तरार्चिकम् ॥२॥
उत्तरार्चिकस्य	सप्तमः प्रपाठकः ॥७॥
द्वितीयार्धः ॥४॥	तृतीयार्धः ॥३॥
१.१-३	१०.१-३
	नवमः प्रपाठकः ॥९॥
	प्रथमार्धः ॥१॥
४-६	१४.१-३
७-९	न सन्ति
	पूर्वार्चिकम् ॥१॥
	प्रथमः प्रपाठकः ॥१॥
	पूर्वार्धः ॥१॥
१०	३.११

२.१,२	न स्तः
	उत्तरार्चिकम् ॥२॥
	षष्ठः प्रपाठकः ॥६॥
	तृतीयार्धः ॥३॥
३-५	४.१-३
	अष्टमः प्रपाठकः ॥८॥
	द्वितीयार्धः ॥२॥
६-८	१४.१,३,२
	षष्ठः प्रपाठकः ॥६॥
	तृतीयार्धः ॥३॥
९,१०	५.१,२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जैमिनीय-संहिता

जैमिनीये	कौथुमीये
३.१	५.३
	नवमः प्रपाठकः ॥९॥
	प्रथमार्धः ॥१॥
२,३	९.१,२
	सप्तमः प्रपाठकः ॥७॥
	द्वितीयार्धः ॥२॥
४	१४.१
५	नास्ति
	षष्ठः प्रपाठकः ॥६॥
	तृतीयार्धः ॥३॥
६	९.१
७-९	१०.२,१,३
	सप्तमः प्रपाठकः ॥७॥
	प्रथमार्धः ॥१॥
१०	१२.३
४.१	२
	षष्ठः प्रपाठकः ॥६॥
	तृतीयार्धः ॥३॥
२-७	१३.१-१४.३
८-१०	न सन्ति
५.१-४	न सन्ति
	षष्ठः प्रपाठकः ॥६॥
	तृतीयार्धः ॥३॥
५-७	१७.१-३
	पूर्वार्चिकम् ॥१॥
	चतुर्थः प्रपाठकः ॥४॥
	पूर्वार्धः ॥१॥
६.१	२.१०
२-४	न सन्ति
	उत्तरार्चिकम् ॥२॥
	सप्तमः प्रपाठकः ॥७॥
	द्वितीयार्धः ॥२॥
५-७	१४.१-३

जैमिनीये	कौथुमीये
	पूर्वार्चिकम् ॥१॥
	प्रथमः प्रपाठकः ॥१॥
	पूर्वार्धः ॥१॥
८	३.२
९,१०	न स्तः
	उत्तरार्चिकम् ॥२॥
	अष्टमः प्रपाठकः ॥८॥
	तृतीयार्धः ॥३॥
७.१-४	२.१-४
५-८	१८.१-४
	षष्ठः प्रपाठकः ॥६॥
	प्रथमार्धः ॥१॥
९,१०	३.१,२
८.१	३
	अष्टमः प्रपाठकः ॥८॥
	प्रथमार्धः ॥१॥
२-४	१३.१-३
	पूर्वार्चिकम् ॥१॥
	प्रथमः प्रपाठकः ॥१॥
	प्रथमार्धः ॥१॥
५	५.१०
६	नास्ति
	द्वितीयः प्रपाठकः ॥२॥
	पूर्वार्धः ॥१॥
७	४.२
८,९	न स्तः
	उत्तरार्चिकम् ॥२॥
	अष्टमः प्रपाठकः ॥८॥
	द्वितीयार्धः ॥२॥
१०	५.१
९.१-३	२-४
४-९	३.१-४.३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जैमिनीये	कौथुमीये
	पूर्वार्चिकम् ॥१॥
	चतुर्थः प्रपाठकः ॥४॥
	अपरार्धः ॥२॥
१०	५.४
१०.१-४	न सन्ति
	तृतीयः प्रपाठकः ॥३॥
	अपरार्धः ॥२॥
५	३.९
६,७	न स्तः
	द्वितीयः प्रपाठकः ॥२॥
	अपरार्धः ॥२॥
८	१.५
९,१०	न स्तः
	चतुर्थः प्रपाठकः ॥४॥
	पूर्वार्धः ॥१॥
११.१	५.४
२-५	न सन्ति
	उत्तरार्चिकम् ॥२॥
	सप्तमः प्रपाठकः ॥७॥
	तृतीयार्धः ॥३॥
६,७	५.१,२
	नवमः प्रपाठकः ॥९॥
	प्रथमार्धः ॥१॥
८,९	६.१,२
	सप्तमः प्रपाठकः ॥७॥
	प्रथमार्धः ॥१॥
१०	४.१
१२.१,२	३,२
३-५	५.१-३
६-८	१२.१,३,२
९	१३.१
१०	नास्ति
	द्वितीयः प्रपाठकः ॥२॥
	अपरार्धः ॥२॥
११	५.३
१२	नास्ति
	सप्तमः प्रपाठकः ॥७॥
	प्रथमार्धः ॥१॥
१३	१६.३
१४	नास्ति
	द्वितीयार्धः ॥२॥
१५	१.१
१३.१-८	२-३.३
९-११	५.१-३
१४.१,२	४.१,२
३-५	६.१-३
६,७	८.१,२
	पूर्वार्चिकम् ॥१॥
	प्रथमः प्रपाठकः ॥१॥
	पूर्वार्धः ॥१॥
८	५.५
९	नास्ति
	उत्तरार्चिकम् ॥२॥
	सप्तमः प्रपाठकः ॥७॥
	द्वितीयार्धः ॥२॥
१५.१-३	९.१,३,२
४-१०	११.१-१३.१
१६.१,२	१३.२,३
३-१०	न सन्ति
	अष्टमः प्रपाठकः ॥८॥
	द्वितीयार्धः ॥२॥
१७.१	८.१
२	नास्ति
३	८.२
	पञ्चमः प्रपाठकः ॥५॥
	अपरार्धः ॥२॥
४-६	२१.१-३

Funding by IKS-MoE

BHARATIYA VIDYA BHAVAN
S. N. ....
LIBRARY.
CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जैमिनीये	कौथुमीये
	पूर्वार्चिकम् ॥१॥
	चतुर्थः प्रपाठकः ॥४॥
	अपरार्धः ॥२॥
७	५.७
	उत्तरार्चिकम् ॥२॥
	सप्तमः प्रपाठकः ॥७॥
	द्वितीयार्धः ॥२॥
८,९	न स्तः
	अष्टमः प्रपाठकः ॥८॥
	प्रथमार्धः ॥१॥
१०	१४.१,२
११	३
१८.१-८	न सन्ति
	सप्तमः प्रपाठकः ॥७॥
	प्रथमार्धः ॥१॥
९,१०	२.१,२
	सप्तमः प्रपाठकः ॥७॥
	तृतीयार्धः ॥३॥
१९.१,२	१९.१,२
३,४	न स्तः
	पूर्वार्चिकम् ॥१॥
	प्रथमः प्रपाठकः ॥१॥
	पूर्वार्धः ॥१॥
५	२.२
६-१०	न सन्ति
	उत्तरार्चिकम् ॥२॥
	सप्तमः प्रपाठकः ॥७॥
	तृतीयार्धः ॥३॥
२०.१-३	१७.१-३
४,५	न स्तः
६,७	१८.१,२
८-१०	२१.१,३,२
	प्रथमार्धः ॥१॥
२१.१-५	१०.१-११.३

जैमिनीये	कौथुमीये
६-१०	न सन्ति
२२.१,२	न स्तः
	पञ्चमः प्रपाठकः ॥५॥
	अपरार्धः ॥२॥
३,४	११.२,३
	पूर्वार्चिकम् ॥१॥
	द्वितीयः प्रपाठकः ॥२॥
	पूर्वार्धः ॥१॥
५	५.१०
६,७	न स्तः
	उत्तरार्चिकम् ॥२॥
	सप्तमः प्रपाठकः ॥७॥
	तृतीयार्धः ॥३॥
८-१०	२.१-३
	अष्टमः प्रपाठकः ॥८॥
	द्वितीयार्धः ॥२॥
२३.१	१७.१
	पूर्वार्चिकम् ॥१॥
	तृतीयः प्रपाठकः ॥३॥
	अपरार्धः ॥२॥
२	३.५
३	नास्ति
	उत्तरार्चिकम् ॥२॥
	सप्तमः प्रपाठकः ॥७॥
	तृतीयार्धः ॥३॥
४,५	८.१,२
	अष्टमः प्रपाठकः ॥८॥
	प्रथमार्धः ॥१॥
६-८	४.२,१,३
९,१०	५.१,२
२४.१-७	३-७.३
८-१०	न सन्ति
२५.१	नास्ति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जैमिनीये	कौथुमीये
	सप्तमः प्रपाठकः ॥७॥
	प्रथमार्धः ॥१॥
२	९.१
३	नास्ति
	द्वितीयार्धः ॥२॥
४,५	७.१,२
	षष्ठः प्रपाठकः ॥६॥
	द्वितीयार्धः ॥२॥
२६.१-३	३.१-३
	अष्टमः प्रपाठकः ॥८॥
	द्वितीयार्धः ॥२॥
४-७	६.१-७.२
	षष्ठः प्रपाठकः ॥६॥
	तृतीयार्धः ॥३॥
८-१०	१५.१-३
	अष्टमः प्रपाठकः ॥८॥
	प्रथमार्धः ॥१॥
२७.१-३	१०.१-३
	प्रथमः प्रपाठकः ॥१॥
	अपरार्धः ॥२॥
४-६	२१.१-३
	अष्टमः प्रपाठकः ॥८॥
	द्वितीयार्धः ॥२॥
७,८	९.१,२
९,१०	न स्तः
२८.१	नास्ति
	पूर्वार्चिकम् ॥१॥
	प्रथमः प्रपाठकः ॥१॥
	अपरार्धः ॥२॥
२	४.६
३,४	न स्तः

जैमिनीये	कौथुमीये
	उत्तरार्चिकम् ॥२॥
	पञ्चमः प्रपाठकः ॥५॥
	पूर्वार्धः ॥१॥
५-७	८.१-३
८,९	न स्तः
	पूर्वार्चिकम् ॥१॥
	प्रथमः प्रपाठकः ॥१॥
	पूर्वार्धः ॥१॥
१०	३.१३
२९.१,२	न स्तः
	अष्टमः प्रपाठकः ॥८॥
	द्वितीयार्धः ॥२॥
३-४	११.१,२
	पूर्वार्चिकम् ॥१॥
	प्रथमः प्रपाठकः ॥१॥
	अपरार्धः ॥२॥
५	१.७
६	नास्ति
	उत्तरार्चिकम् ॥२॥
	नवमः प्रपाठकः ॥९॥
	प्रथमार्धः ॥१॥
७-९	११.१-३
	षष्ठः प्रपाठकः ॥६॥
	तृतीयार्धः ॥३॥
१०	१.२
३०.१,२	१.३,४
	नवमः प्रपाठकः ॥९॥
	द्वितीयार्धः ॥२॥
३-५	११.१,३,२
	षष्ठः प्रपाठकः ॥६॥
	तृतीयार्धः ॥३॥
६,७	६.१-२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्याः संहिताया एक एव हस्तलेख अस्माकं सकाश आसीत् । समानेऽपि मन्त्रे तत्र पाठ-नानात्वम् । यथा—

१.१.७	इत्थतरा	३,६.१	इत्थतरा
१.२.५	विविड्ढि	४.९.४	त्रिड्ढि
१.३.१३	अभिष्टये शं नो	४.२८.१०	अभिष्टय आपो
१.४.१	शंसिषम्	३.५.१२	शंसिषः
१.४.६	अमर्त्यम्	४.११.८	अमर्त्य
१.५.७	देव	४.२१.५	देवं
१.६.७	यासि	४.२९.५	वेषि
१.१२.५	सुभगा	३.५६.१६	सुभग
१.१६.९	नः	३.३३.९	णः
१.१७.२	गायता	३.७.४	गायत
१.१७.५	पिब	३.८.१	पिवा
१.१८.३	राभं	३.८.४	ग्र भं
१.२१.१	उ त्वा	४.७.९	उत् त्वा
१.२६.९	इवा	३.५८.९	इव
१.२७.९	सुतावन्त	३.१९.९	सुतावन्तः
१.२८.१	ऽविता	४ २०.३	ऽवृतः
१.२८.७	ऋचीष्म	४.१८.९	ऋचीषभा
१.२९.६	दधर्षते	४.२७.७	दधर्षति
१.३०.८	मघवा	३.४७.९	मघवान्
१.३२.२	अह्वेऽवसे	३.१०.५	अंहुयवसे
१.३६.४	उभयाहस्तियू आ भरा	३.४०.१८	उभया-हस्त्यू आ भर

१.४३.१	महं	३.९.१०	महान्
१.४३.४	विष्णवे	४.९.१०	विष्णवि
१.४५.८	अधा	३.६.६	अथा
१.५०.२	इवा	३.१२.१	इव
१.५१.९	पीती, नवा	३.४५.२	वीती,नव
१.५२.३	नया	३.४७.१	नय
१.५५.११	धन्वा	३.३४.१२	धन्व
१.५६.७	विभाससम्	३.४८.४	विभासहम्
१.५७.५	कृत्वियो	३४७.४	कृत्व्यो
१.५८.७	ऊर्मिणाव्यं	३.२४.६	ऊर्मिणा अव्यं
१.५८.११	अभ्यर्ष	३.५.५ / ३.१२.७	अभ्य् अर्षन्
१.५९.२	युव	३.३०.४	युवा
१.५९.६	घोषयत्	३.२४.४	घोषयन्
१.५९.७	इवा	३.४०.१	इव
१.५९.८	रुजा	३.३०.४	रुज
२.५.४	परि स्रव	३.३.२	परि स्रवा
२.५.५	विश्वान्यू	३.३.३	विश्वान्नू
२.५.९	नो	३.१४.९	णो
२.५.१०	मिमेति	३.२०.११	मिमाति
२.६.३	पुनः	३.५९.१८	पुरः
३.१.१०	धीतये	३.५३.७	धीतयः
३.१८.३	मृडया	४.१२.११	मृडय

यावद् इतर-हस्तलेखा नोपलभ्यन्ते यावच् च जैमिनीयानां गानग्रन्था ब्राह्मणादिकं च नोपस्थितं तावन् न निश्चेतुं शक्यते कः पाठो जैमिनीयानां साधीयान् इति ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

BHARATIYA VIDYA BHAVAN
S. N............
LIBRARY.
CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सामवेदीया

जैमिनीयसंहिता

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१.१

ऋ ६.१६.१० — अग्न आ याहि वीतये गृणानो हव्यदातये ।
नि होता सत्सि बर्हिषि ॥ १ ॥

६.१६.१ — त्वम् अग्ने यज्ञानां होता विश्वेषां हितः ।
देवेभिर् मानुषे जने ॥ २ ॥

१.१२.१ — अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
अस्य यज्ञस्य सुक्रतुम् ॥ ३ ॥

६.१६.३४ — अग्निर् वृत्राणि जङ्घनद् द्रविणस्युर् विपन्यया ।
समिद्धः शुक्र आहुतः ॥ ४ ॥

८.८४.१ — प्रेष्ठं वो अतिथिं स्तुषे मित्रम् इव प्रियम् ।
अग्निं... — अग्ने रथं न वेद्यम् ॥ ५ ॥

८.७१.१ — त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः ।
उत द्विषो मर्त्यस्य ॥ ६ ॥

६.१६.१६ — एह्य् ऊ षु ब्रवाणि ते अग्न इत्थेतरा गिरः ।
एभिर् वर्धास इन्दुभिः ॥ ७ ॥

८.११.७ — आ ते वत्सो मनो यमत् परमाच् चित् सधस्थात् ।
* त्वांकामया * — अग्ने त्वां कामये गिरा ॥ ८ ॥

६.१६.१३ — त्वाम् अग्ने पुष्कराद् अध्य् अथर्वा निर् अमन्थत ।
मूर्ध्नो विश्वस्य वाघतः ॥ ९ ॥

ऋग्वेदे नास्ति — अग्ने विवस्वद् आ भरास्मभ्यम् ऊतये महे ।
देवो ह्य् असि नो दृशे ॥ १० ॥ ॥१॥

१.२

ऋ ८.७५.१० — नमस् ते अग्न ओजसे गृणन्ति देव कृष्टयः ।
...अर्दय (एवं कौ) — अमैर् अमित्रम् अर्दया ॥ १ ॥

४.८.१ — दूतं वो विश्ववेदसं हव्यवाहम् अमर्त्यम् ।
यजिष्ठम् ऋञ्जसे गिरा ॥ २ ॥

८.१०२.१३ — उप त्वा जामयो गिरो देदिशतीर् हविष्कृतः ।
वायोर् अनीके अस्थिरन् ॥ ३ ॥

१.१.७ — उप त्वाग्ने दिवेदिवे दोषावस्तर् धिया वयम् ।
नमो भरन्त एमसि ॥ ४ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१.२७.१०	जराबोध तद् विविड्ढि विशेविशे यज्ञियाय ।
	स्तोमं रुद्राय दृशीकम् ॥ ५ ॥
१.१९.१	प्रति त्यं चारुम् अध्वरं गोपीथाय प्र हूयसे ।
	मरुद्भिर् अग्न आ गहि ॥ ६ ॥
१.२७.१	अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ।
	सम्राजन्तम् अध्वराणाम् ॥ ७ ॥
८.१०२.४	और्वभृगुवच् छुचिम् अप्नवानवद् आ हुवे ।
	अग्निं समुद्रवाससस् ॥ ८ ॥
८.१०२.२२	अग्निम् इन्धानो मनसा धियं सचेत मर्त्यः ।
* ईधे *	अग्निम् इन्धे विवस्वभिः ॥ ९ ॥
८.६.३०	आद् इत् प्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरम् ।
...दिवा	परो यद् इध्यते दिवि ॥ १० ॥ ॥२॥
	१.३
ऋ ८.१०२.७	अग्निं वो वृधन्तम् अध्वराणां पुरूतमम् ।
	अच्छा नप्त्रे सहस्वते ॥ १ ॥
६.१६.२८ [2]यासद्...	अग्निस् तिग्मेन शोचिषा यंसद् विश्वं न्य् अत्रिणम् ।
...वनते *	अग्निर् नो वंसते रयिम् ॥ २ ॥
४.९.१ [2]य ईम् आ * *	अग्ने मृळ महं असि अय आ देवयुं जनम् ।
	इयेथ बर्हिर् आसदम् ॥ ३ ॥
७.१५.१३ ...ष्म * रीषतः	अग्ने रक्षा णो अंहसः प्रति स्म देव रिषतः ।
	तपिष्ठैर् अजरो दह ॥ ४ ॥
६.१६.४३ * युक्ष्वा...	अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः ।
* * मन्यवे	अरं वहन्त्य् आशवः ॥ ५ ॥
७.१५.७ [2]* देव धीमहि ।	नि त्वा नक्ष्य विश्पते द्युमन्तं धीमहे वयम् ।
	सुवीरम् अग्न आहुत ॥ ६ ॥
८.४४.१६	अग्निर् मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
	अपां रेतांसि जिन्वति ॥ ७ ॥
१.२७.४	इमम् ऊ षु त्वम् अस्माकं सनिं गायत्रं नव्यांसम् ।
	अग्ने देवेषु प्र वोचः ॥ ८ ॥
८.७४.११ यं... चनिष्ठद् * *	तं त्वा गोपवनो गिरा जनिष्ठद् अग्ने अङ्गिरः ।
	स पावक श्रुधी हवम् ॥ ९ ॥
४.१५.३	परि वाजपतिः कविर् अग्निर् हव्यान्य् अक्रमीत् ।
	दधद् रत्नानि दाशुषे ॥ १० ॥
१.५०.१	उद् उ त्यं जातवेदसं देवं वहन्ति केतवः ।
	दृशे विश्वाय सूर्यम् ॥ ११ ॥
१.१२.७	कविम् अग्निम् उप स्तुहि सत्यधर्माणम् अध्वरे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	देवम् अमीवचातनम् ॥ १२ ॥
१०.९.४ ²आपो * *	शं नो देवीर् अभिष्टये शं नो भवन्तु पीतये । शंयोर् अभि स्रवन्तु नः ॥ १३ ॥
८.८४.७ * * परीणसो * * दंपते	कस्य नूनं परीणसि धियो जिन्वसि सत्पते । गोषाता यस्य ते गिरः ॥ १४ ॥ ॥३॥
	१.४
ऋ ६.४८.१	यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे । प्रप्र वयम् अमृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥ १ ॥
८.६०.९	पाहि नो अग्न एकया पाह्य् उत द्वितीयया । पाहि गीर्भिस् तिसृभिर् ऊर्जां पते पाहि चतसृभिर् वसो ॥ २ ॥
६.४८.७ [दीदिहि ⁴रेवन्नः शुक्र दीदिहि द्युमत् पावक	बृहद्भिर् अग्ने अर्चिभिः शुक्रेण देव शोचिषा । भरद्वाजे समिधानो यविष्ठ्य रेवत् पावक दीदिहि ॥ ३ ॥
७.१६.७ त्वे (एवं कौ)...	त्वय्य् अग्ने स्वाहुत प्रियासः सन्तु सूरयः । यन्तारो ये मघवानो जनानाम् ऊर्वं दयन्त गोनाम् ॥ ४ ॥
८.६०.१९ ...तेपानो * * * गृहपतिर् ...	अग्ने जरितर् विश्पतिस् तपानो देव रक्षसः । अप्रोषिवान् गृहपते महं असि दिवस् पायुर् दुरोणयुः ॥ ५ ॥
१.४४.१ ...अमर्त्यं (एवं कौ)	अग्ने विवस्वद् उषसश् चित्रं राधो अमर्त्यम् । आ दाशुषे जातवेदो वहा त्वम् अद्या देवं उषर्बुधः ॥ ६ ॥
६.४८.९ ...चोदय (एवं कौ)	त्वं नश् चित्र ऊत्या वसो राधांसि चोदया । अस्य रायस् त्वम् अग्ने रथीर् असि विदा गाधं तुचे तु नः ॥ ७ ॥
८.६०.५ ...ऋतस् *	त्वम् इत् सप्रथा अस्य् अग्ने त्रातर् ऋतः कविः । त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥ ८ ॥
८.६०.११ ...स्वयशस्तरम्	आ नो अग्ने वयोवृधं रयिं पावक शंस्यम् । रास्वा च न उपमाते पुरुस्पृहं सुनीती सुयशस्तरम् ॥ ९ ॥
८.१०३.६ ...यन्त्य्	यो विश्वा दयते वसु होता मन्द्रो जनानाम् । मधोर् न पात्रा प्रथमान्य् अस्मै प्र स्तोमा यन्त्व् अग्नये ॥ १० ॥ ॥४॥
	१.५
ऋ ७.१६.१	एना वो अग्निं नमसोर्जो नपातम् आ हुवे । प्रियं चेतिष्ठम् अरतिं स्वध्वरं विश्वस्य दूतम् अमृतम् ॥ १ ॥
८.६०.१५ * * मात्रोः ...	शेषे वनेषु मातृषु सं त्वा मर्तास इन्धते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

* हव्या ...	अतन्द्रो हव्यं वहसि हविष्कृत आद् इद् देवेषु राजसि ॥ २ ॥
८.१०३.१	अदर्शि गातुवित्तमो यस्मिन् व्रतान्य् आदधुः ।
...नक्षन्त *	उपो षु जातम् आर्यस्य वर्धनम् अग्निं नक्षन्तु नो गिरः ॥ ३ ॥
८.२७.१	अग्निर् उक्थे पुरोहितो ग्रावाणो बर्हिर् अध्वरे ।
...पतिं देवाँ (कौ पते देवा) * *	ऋचा यामि मरुतो ब्रह्मणस् पते देवं अवो वरेण्यम् ॥ ४ ॥
८.७१.१४	अग्निम् ईडिष्वावसे गाथाभिः शीरशोचिषम् ।
...ऽग्निं * *	अग्निं राये पुरुमीढ श्रुतं नरो अग्निः सुदीतये छर्दिः ॥ ५ ॥
१.४४.१३	श्रुधि श्रुत्कर्ण वह्निभिर् देवैर् अग्ने सयावभिः ।
* सीदन्तु...प्रातर्यावाणो अध्वरम्	आ सीदतु बर्हिषि मित्रो अर्यमा प्रातर्यावभिर् अध्वरे ॥ ६ ॥
८.१०३.२ देवाँ अच्छा * *	प्र दैवोदासो अग्निर् देव इन्द्रो न मज्मना ।
...नाकस्य सानवि	अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि॥ ७ ॥
८.१.१८	अध ज्मो अध वा दिवो बृहतो रोचनाद् अधि ।
...पृण (एवं कौ)	अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृणा ॥ ८ ॥
३.९.२	कायमानो वना त्वं यन् मातॄर् अजगन्न् अपः ।
...इहाभवः	न तत् ते अग्ने प्रमृषे निवर्तनं यद् दूरे सन्न् इहाभुवः ॥ ९ ॥
१.३६.१९	नि त्वाम् अग्ने मनुर् दधे ज्योतिर् जनाय शश्वते ।
	दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥ १० ॥ ॥ ५ ॥
	१.६
ऋ ७.१६.११ ...विवष्ट्य् *	देवो वो द्रविणोदाः पूर्णां विवष्ट्व् आसिचम् ।
	उद् वा सिञ्चध्वम् उप वा पृणध्वम् आद् इद् वो देव ओहते ॥ १ ॥
१.४०.३	प्रैतु ब्रह्मणस् पतिः प्र देव्य् एतु सूनृता ।
	अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥ २ ॥
१.३६.१३	ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
	ऊर्ध्वो वाजस्य सनिता यद् अञ्जिभिर् वाघद्भिर् विह्वयामहे ॥ ३ ॥
८.१०३.४ * यं * निनीषसि...	प्र यो राये निनीषति मर्तो यस् ते वसो दाशत् ।
	स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम् ॥ ४ ॥
१.३६.१	प्र वो यह्वं पुरूणां विशां देवयतीनाम् ।
* * * ईमहे * सीमिदन्य ईळते	अग्निं सूक्तेभिर् वचोभिर् वृणीमहे यं सम् इद् अन्य इन्धते ॥ ५ ॥
३.१६.१ * * * महः *	अयम् अग्निः सुवीर्यस्येशे हि सौभगस्य ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥ ६ ॥

७.१६.५
...वेषि * *
त्वम् अग्ने गृहपतिस् त्वं होता नो अध्वरे ।
त्वं पोता विश्ववार प्रचेता यक्षि यासि च वार्यम् ॥ ७ ॥

३.९.१
* * * सुदीदितिं...
सखायस् त्वा ववृमहे देवं मर्तास ऊतये ।
अपां नपातं सुभगं सुदंससं सुप्रतूर्तिम् अनेहसम्
॥ ८ ॥ ॥६॥

१.७

ऋग्वेदे नास्ति
आ जुहोता हविषा मर्जयध्वं नि होतारं गृहपतिं दधिध्वम् ।
इडस् पदे नमसा रातहव्यं सपर्यता यजतं पस्त्यानाम् ॥ १ ॥

ऋ १०.११५.१
अप्येति *
* यदि जीजनद् * च नु ववक्ष * *
चित्र इच् छिशोस् तरुणस्य वक्षथो न यो मातराव् अन्वेति धातवे ।
अनूधा यद् अजीजनद् अधा चिद् आ ववक्षत् सद्यो महि दूत्यं चरन् ॥ २ ॥

१०.५६.१
संवेशने तन्वश्...
इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशनस् तन्वे चारुर् एधि प्रियो देवानां परमे जनित्रे ॥ ३ ॥

१.९४.१
कौ ...रिषाम
इमं स्तोमम् अर्हते जातवेदसे रथम् इव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिर् अस्य संसद्य् अग्ने सख्ये मा रिषामा वयं तव ॥ ४ ॥

ऋ ६.७.१
...आसन्ना * *
मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरम् ऋत आ जातम् अग्निम् ।
कविं सम्राजम् अतिथिं जनानाम् आसन्नः पात्रं जनयन्त देवाः ॥ ५ ॥

६.२४.६ 'उक्थेभिरिन्द्रानयन्त यज्ञैः
* त्वाभिः सुष्टुतिभिर्वाजयन्त * * जग्मुर्गिर्वाहो *
वि त्वद् आपो न पर्वतस्य पृष्ठाद् उक्थेभिर् अग्ने जनयन्त देवाः ।
तं त्वा गिरः सुष्टुतयो वाजयन्त्य् आजिं न गिर्ववाहो जिग्युर् अश्वाः ॥ ६ ॥

४.३.१
आ वो राजानम् अध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।
अग्निं पुरा तनयित्नोर् अचित्ताद् धिरण्यरूपम् अवसे कृणुध्वम् ॥ ७ ॥

७.८.१
...सबाध आग्निर् (एवं कौ) अग्र *
इन्धे राजा समर्यो नमोभिर् यस्य प्रतीकम् आहुतं घृतेन ।
नरो हव्येभिर् ईडते सबाधो अग्निर् अग्रम् उषसाम् अशोचि ॥ ८ ॥

१०.८.१
* * अन्ताँ उपमाँ...
प्र केतुना बृहता यात्य् अग्निर् आ रोदसी वृषभो रोरवीति ।
दिवश् चिद् अन्ताद् उपमाम् उद् आनड् अपाम् उपस्थे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

* ववर्ध (एवं कौ)	महिषो ववर्धा ॥ ९ ॥
७.१.१ ...हस्तच्युती जनयन्त	अग्निं नरो दीधितिभिर् अरण्योर् हस्तच्युतं जनयत प्रशस्तम् ।
...अथर्युम्	दूरेदृशं गृहपतिम् अथर्व्युम् ॥ १० ॥ ॥७॥
	१.८
ऋ ५.१.१	अबोध्य् अग्निः समिधा जनानां प्रति धेनुम् इवायतीम् उषासम् ।
...सिस्रते * अच्छ (एवं कौ)	यह्वा इव प्र वयाम् उज्जिहानाः प्र भानवः सस्रते नाकम् अच्छा ॥ १ ॥
१०.४६.५ ...मूरा * * *	प्र भूर्जयन्तं महां विपोधां मूरैर् अमूरं पुरां दर्माणम् ।
नयन्तो गर्भं वनां धियं धुर्हिरिश्मश्रुं [नार्वाणं धनर्चम्	नयन्तं गीर्भिर् वना धियं धा हरिश्मश्रुं न वर्मणा धनर्चिम् ॥ २ ॥
६.५८.१	शुक्रं ते अन्यद् यजतं ते अन्यद् विषुरूपे अहनी द्यौर् इवासि ।
* * * * स्वधावो ...	विश्वा हि माया अवसि स्वधावन् भद्रा ते पूषन्न् इह रातिर् अस्तु ॥ ३ ॥
३.१.२३	इळाम् अग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
	स्यान् नः सूनुस् तनयो विजावाग्ने सा ते सुमतिर् भूत्व् अस्मे ॥ ४ ॥
१०.४६.१ ...नृषद्वा * * उपस्थे	प्र होता जातो महान् नभोविन् नृषद्मा सीदद् अपां विवर्ते ।
दधिर् * * स ते वयांसि ...	दधद् यो धायि सुते वयांसि यन्ता वसूनि विधते तनूपाः ॥ ५ ॥
७.६.१ * सम्राजो * प्रशस्तिं ...	प्र सम्राजम् असुरस्य प्रशस्तं पुंसः कृष्टीनाम् अनुमाद्यस्य ।
[4]वन्दे दारुं वन्दमानो विवक्मि	इन्द्रस्येव प्र तवसः कृतानि वन्दद्वारा वन्दमाना विवष्टु ॥ ६ ॥
३.२९.२ [2]गर्भ इव सुधितो गर्भिणीषु	अरण्योर् निहितो जातवेदा गर्भ इवेत् सुभृतो गर्भिणीभिः ।
	दिवेदिव ईड्यो जागृवद्भिर् हविष्मद्भिर् मनुष्येभिर् अग्निः ॥ ७ ॥
१०.८७.१९	सनाद् अग्ने मृणसि यातुधानान् न त्वा रक्षांसि पृतनासु जिग्युः ।
* * * क्रव्यादो ...	अनु दह सहमूरान् कयादो मा ते हेत्या मुक्षत दैव्यायाः ॥ ८ ॥ ॥ ८ ॥
	१.९
ऋ ५.१०.१ * * * भर (एवं कौ) ...	अग्न ओजिष्ठम् आ भरा द्युम्नम् अस्मभ्यम् अध्रिगो ।
* * राया परीणसा ...	प्र नो राये पनीयसे रत्सि वाजाय पन्थाम् ॥ १ ॥
ऋग्वेदे नास्ति	यदि वीरो अनुष्याद् अग्निम् इन्धीत मर्त्यः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आजुह्वद् धव्यम् आनुषक् शर्म भक्षीत दैव्यम् ॥ २ ॥
त्वेषस् ते धूम ऋण्वति दिवि सं शुक्र आततः ।
सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥ ३ ॥
त्वं हि क्षैतवद् यशो अग्ने मित्रो न पत्यसे ।
त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥ ४ ॥
प्रातर् अग्निः पुरुप्रियो विश स्तवेतातिथिः ।
विश्वे यस्मिन्न् अमर्त्ये हव्यं मर्तास इन्धते ॥ ५ ॥
यद् वाहिष्ठं तद् अग्नये बृहद् अर्च विभावसो ।
महिषीव त्वद् रयिस् त्वद् वाजा उद् ईरते ॥ ६ ॥
विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥ ७ ॥
बृहद् वयो हि भानवे अर्चा देवायाग्नये ।
यं मित्रं न प्रशस्तये मर्तासो दधिरे पुरः ॥ ८ ॥
अगन्म वृत्रहन्तमं ज्येष्ठम् अग्निम् आनवम् ।
यः स्म श्रुतर्वन्न् आर्क्ष्ये बृहद् अनीक इध्यते ॥ ९ ॥
जातः परेण धर्मणा यत् सवृद्भिः सहाभुवः ।
पिता यत् कश्यपस्याग्निः श्रद्धा माता मनुः कविः ॥ १० ॥

१.१०

सोमं राजानं वरुणम् अग्निम् अन्वारभामहे ।
आदित्यं विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिम् ॥ १ ॥
इत एत उद् आरुहन् दिवः पृष्ठान्य् आरुहन् ।
प्र भूर्जयो यथा पथो द्याम् अङ्गिरसो ययुः ॥ २ ॥
राये अग्ने महे त्वा दानाय सम् इधीमहि ।
ईडिष्वा हि महे वृषं द्यावा होत्राय पृथिवी ॥ ३ ॥
दधन्वे वा यद् ईम् अनु वोचद् ब्रह्मेति वेर् उतत् ।
परि विश्वानि काव्या नेमिश् चक्रम् इवाभुवत् ॥ ४ ॥
त्वम् अग्ने वसुंर् इह रुद्रं आदित्यं उत ।
यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥ ५ ॥
प्रत्य् अग्ने हरसा हरः शृणाहि विश्वतः प्रति ।
यातुधानस्य रक्षसो बलं न्य् उब्ज वीर्यम् ॥ ६ ॥

१.११

पुरु त्वा दाशिवं वोचेद् अरिर् अग्ने तव स्विद् आ ।
तोदस्येव शरण आ महस्या ॥ १ ॥
प्र होत्रे पूर्व्यं वचो ऽग्नये भरता बृहत् ।
विपां ज्योतींषि बिभ्रते न वेधसे ॥ २ ॥

ऋ ६.२.६ ...दिवि षञ्छुक्र *

६.२.१

५.१८.१ [रण्यति
विश्वानि यो अमर्त्यो हव्या मर्तेषु
५.२५.७

८.७४.१

५.१६.१
* * * प्रशस्तिभिर्...
८.७४.४ आगन्म...
यस्य श्रुतर्वा बृहन्नार्क्षो अनीक एधते
ऋग्वेदे नास्ति

[हवामहे
ऋ १०.१४१.३ * * अवसे ऽग्निं गीर्भि-
आदित्यान्...

ऋग्वेदे न स्तः

२.५.३ ...ब्रह्माणि वेरु तत्
...इवाभवत्
१.४५.१
[श्वतस्परि
१०.८७.२५ ...शृणीहि *। कौ ... वि-
* * * वि रुज *

[दाशिवाँ) वोचे...
[1]ऋ १.१५०.१ * * दाश्वान् (कौ
...महस्य (एवं कौ)
३.१०.५

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१.७९.४	अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
* धेहि...	अस्मे देहि जातवेदो महि श्रवः ॥ ३ ॥
३.१०.७	अग्ने यजिष्ठो अध्वरे देवान् देवयते यज ।
[शासत *	होता मन्द्रो वि राजस्यति स्रिधः ॥ ४ ॥
९.१०२.४ जज्ञानं * मातरो वेधाम-	जज्ञानः सप्त मातृभिर् मेधाम् आशासत श्रिये ।
...चिकेत यत्	अयं ध्रुवो रयीणां चिकेतद् आ ॥ ५ ॥
८.१८.७	उत स्या नो दिवा मतिर् अदितिर् ऊत्या गमत् ।
* शंताति * करद् (एवं कौ)...	सा शंताता मयस् करद् अप स्रिधः ॥ ६ ॥
८.२३.१ ईळिष्वा (एवं कौ)...	ईळिष्व हि प्रतीव्यं यजस्व जातवेदसम् ।
	चरिष्णुधूमम् अगृभीतशोचिषम् ॥ ७ ॥
८.२३.१५ ...चन (एवं कौ)...	न तस्य मायया चना रिपुर् ईशीत मर्त्यः ।
...हव्यदातिभिः	यो अग्नये ददाश हव्यदातये ॥ ८ ॥
६.५१.१३	अप त्यं वृजिनं रिपुं स्तेनम् अग्ने दुराध्यम् ।
	दविष्ठम् अस्य सत्पते कृधी सुगम् ॥ ९ ॥
८.२३.१४	श्रुष्टय् अग्ने नवस्य मे स्तोमस्य वीर विश्पते ।
* * तपुषा...	नि मायिनस् तपसा रक्षसो दह ॥ १० ॥ ॥११॥
	१.१२
ऋ ८.१०३.८	प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।
	उपस्तुतासो अग्नये ॥ १ ॥
८.१९.३० .. तिरते वाजभर्मभिः	प्र सो अग्ने तवोतिभिः सुवीराभिस् तरति वाजकर्मभिः ।
...आवरः	यस्य त्वं सख्यम् आविथ ॥ २ ॥
८.१९.१	तं गूर्धया स्वर्णरं देवासो देवम् अरतिं दधन्विरे ।
...ओहिरे	देवत्रा हव्यम् ऊहिषे ॥ ३ ॥
८.१०३.१२ * * हृणीतामतिथिर्...	मा नो हृणीथा अतिथिं वसुर् अग्निः पुरुप्रशस्त एषः ।
	यः सुहोता स्वध्वरः ॥ ४ ॥
८.१९.१९ ...सुभग (एवं कौ) * *	भद्रो नो अग्निर् आहुतो भद्रा रातिः सुभगा भद्रो अध्वरः ।
	भद्रा उत प्रशस्तयः ॥ ५ ॥
८.१९.३	यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारम् अमर्त्यम् ।
	अस्य यज्ञस्य सुक्रतुम् ॥ ६ ॥
८.१९.१५ ...सासहत् (कौ सासाहा)	तद् अग्ने द्युम्नम् आ भर यत् सासह सदने कं चिद्
[* * *	अत्रिणम् ।
...दूढ्यः	मन्युं जनस्य दूढ्यम् ॥ ७ ॥
८.२३.१३ ...विशि	यद् वा उ विश्पतिः शितः सुप्रीतो मनुषो विशे ।
	विश्वेद् अग्निः प्रति रक्षांसि सेधति ॥ ८ ॥
ऋग्वेदे नास्ति । तै १.५.१०.२ का ७.१४	अयम् अग्निः श्रेष्ठतमो अयं वां मधुमत्तमः ।
[(उभे संहिते नाना)	अयं सहस्रसातमो अस्मिन्न् अस्तु सुवीर्यम् ॥ ९ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऋग्वेदे नास्ति । मै ४.१४.१४	आदित्यः शुक्र उद् अगात् पुरस्ताज् ज्योतिः कृण्वन् वि तमो बाधमानः ।
मै ... रोचमाना आगात्	आभासमानः प्रदिशो नु सर्वा भद्रस्य कर्ता रुचयन् न आगात् ॥ १० ॥ ॥१२॥

इत्याग्नेयं पर्व समाप्तम् ॥

१.१३

ऋ ६.४५.२२	तद् वो गाय सुते सचा पुरुहूताय सत्वने ।
	शं यद् गवे न शाकिने ॥ १ ॥
८.९२.१६	यस् ते नूनं शतक्रतव् इन्द्र द्युम्नितमो मदः ।
[वदावटे) ...	तेन नूनं मदे मदेः ॥ २ ॥
८.७२.१२ * उपावतावतं (कौ उप	गाव उपा वदावटे मही यज्ञस्य रप्सुदा ।
	उभा कर्णा हिरण्यया ॥ ३ ॥
८.९२.२५ * * गायति श्रुतकक्षो	अरम् अश्वाय गायत श्रुतकक्षारं गवे ।
[अरं *	अरम् इन्द्रस्य धाम्ने ॥ ४ ॥
८.९३.७	तम् इन्द्रं वाजयामसि महे वृत्राय हन्तवे ।
	स वृषा वृषभो भुवत् ॥ ५ ॥
१०.१५३.२ ...सहसो (एवं कौ) * *	त्वम् इन्द्र बलाद् अधि सहसा जात ओजसः ।
त्वं वृषन् * *	त्वं सन् वृषन् वृषेद् असि ॥ ६ ॥
८.१४.५	यज्ञ इन्द्रम् अवर्धयद् यद् भूमिं व्यवर्तयत् ।
	चक्राण ओपशं दिवि ॥ ७ ॥
८.१४.१	यद् इन्द्राहं यथा त्वम् ईशीय वस्व एक इत् ।
...गोषखा *	स्तोता मे गोसखा स्यात् ॥ ८ ॥
८.२.२५	पन्यंपन्यम् इत् सोतार आ धावत मद्याय ।
	सोमं वीराय शूराय ॥ ९ ॥
८.२.१	इदं वसो सुतम् अन्धः पिबा सुपूर्णम् उदरम् ।
	अनाभयिन् ररिमा ते ॥ १० ॥ ॥१॥

१.१४

ऋ ८.९३.१	उद् घेद् अभि श्रुतामघं वृषभं नर्यापसम् ।
	अस्तारम् एषि सूर्य ॥ १ ॥
८.९३.४	यद् अद्य कच् च वृत्रहन् उदगा अभि सूर्य ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	सर्वं तद् इन्द्र ते वशे ॥ २ ॥
६.४५.१	य आनयत् परावतः सुनीती तुर्वशं यदुम् ।
	इन्द्रः स नो युवा सखा ॥ ३ ॥
८.९२.३१ ...यमन्	मा न इन्द्राभ्य् आदिशः सूरो अक्तुष्व् आ यमत ।
	त्वा युजा वनेम तत् ॥ ४ ॥
१.८.१	एन्द्र सानसिं रयिं सजित्वानं सदासहम् ।
कौ ...भरा	वर्षिष्ठम् ऊतये भर ॥ ५ ॥
ऋ १.७.५	इन्द्रं वयं महाधन इन्द्रम् अर्भे हवामहे ।
	युजं वृत्रेषु वज्रिणम् ॥ ६ ॥
८.४५.२६	अपिबत् कद्रुवः सुतम् इन्द्रः सहस्रबाह्वे ।
अत्रादेदिष्ट *	तत्राददिष्ट पौंस्यम् ॥ ७ ॥
७.३१.४ ...णोनुमो *	वयम् इन्द्र त्वायवो ऽभि प्र नोनुमो वृषन् ।
	विद्धी त्व् अस्य नो वसो ॥ ८ ॥
८.४५.१	आ घा ये अग्निम् इन्धते स्तृणन्ति बर्हिर् आनुषक् ।
	येषाम् इन्द्रो युवा सखा ॥ ९ ॥
८.४५.४०	भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः ।
...भर (एवं कौ)	वसु स्पार्हं तद् आ भरा ॥ १० ॥ ॥२॥
	१.१५
ऋ १.३७.३	इहेव श्रृण्व एषां कशा हस्तेषु यद् वदान् ।
* यामञ् (कौ यामं)...	नि यामैश् चित्रम् ऋञ्जते ॥ १ ॥
८.४५.१६	इम उ त्वा वि चक्षते सखाय इन्द्र सोमिनः ।
	पुष्टावन्तो यथा पशुम् ॥ २ ॥
८.६.४	सम् अस्य मन्यवे विशो विश्वा नमन्त कृष्टयः ।
	समुद्रायेव सिन्धवः ॥ ३ ॥
८.८३.१	देवानाम् इद् अवो महत् तद् आ वृणीमहे वयम् ।
	वृष्णाम् अस्मभ्यम् ऊतये ॥ ४ ॥
१.१८.१ सोमानं...	सोमानां स्वरणं कृणुहि ब्रह्मणस् पते ।
	कक्षीवन्तं य औशिजः ॥ ५ ॥
८.९३.१८ बोधिन्मना...	वोधन्मना इद् अस्तु नो वृत्रहा भूर्यासुतिः ।
	श्रृणोतु शक्र आशिषम् ॥ ६ ॥
५.८२.४ अद्या...	अद्य नो देव सवितः प्रजावत् सावीः सौभगम् ।
...सुव (एवं कौ)	परा दुष्वप्नियं सुवा ॥ ७ ॥
८.६४.७ क ।१ स्य...	क्वास्य वृषभो युवा तुविग्रीवो अनानतः ।
	ब्रह्मा कस् तं सपर्यति ॥ ८ ॥
८.६.२८ * * संगथे...	उपह्वरे गिरीणां संगमे च नदीनाम् ।
	धिया विप्रो अजायता ॥ ९ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८.१६.१	प्र सम्राजं चर्षणीनाम् इन्द्रं स्तोता नव्यं गीर्भिः ।
	नरं नृषाहं मंहिष्ठम् ॥ १० ॥ ॥३॥
	१.१६
ऋ ८.९२.४	अपाद् उ शिप्रिय् अन्धसः सुदक्षस्य प्रहोषिणः ।
	इन्दोर् इन्द्रो यवाशिरः ॥ १ ॥
६.४५.२५ * * * शतक्रतो ऽभि (कौ पुरुवसो ऽभि) * णोनुवुर् (कौ नोनवुर्) *	इमा उ त्वा पुरोवसो अभि प्र नोनुवुर् गिरः ।
इन्द्र * * मातरः	गावो वत्सं न धेनवः ॥ २ ॥
१.८४.१५	अत्राह गोर् अमन्वत नाम त्वष्टुर् अपीच्यम् ।
	इत्था चन्द्रमसो गृहे ॥ ३ ॥
६.५७.४	यद् इन्द्रो अनयद् रितो महीर् अपो वृषन्तमः ।
* पूषाभवत् *	तत्र पूषाभुवत् सचा ॥ ४ ॥
८.९४.१	गौर् धयति मरुतां श्रवस्युर् माता मघोनाम् ।
	युक्ता बह्नी रथानाम् ॥ ५ ॥
८.९३.३१	उप नो हरिभिः सुतं याहि मदानां पते ।
	उप नो हरिभिः सुतम् ॥ ६ ॥
८.९३.२३ ... वृधासो *	इष्टा होत्रा असृक्षतेन्द्रं वृधन्तो अध्वरे ।
	अच्छावभृथम् ओजसा ॥ ७ ॥
८.६.१० ... जग्रभ	अहम् इद् धि पितुः परि मेधाम् ऋतस्य जग्रह ।
	अहं सूर्य इवाजनि ॥ ८ ॥
१.३०.१३	रेवतीर् नः सधमाद इन्द्रे सन्तु तुविवाजाः ।
	क्षुमन्तो याभिर् मदेम ॥ ९ ॥
ऋग्वेदे नास्ति	सोमः पूषा च चेततुर् विश्वासां सुक्षितीनाम् ।
कौ ... हिता	देवत्रा रथ्योर् हितः ॥ १० ॥ ॥४॥
	१.१७
ऋ ८.९२.१	पान्तम् आ वो अन्धस इन्द्रम् अभि प्र गायत ।
	विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् ॥ १ ॥
७.३१.१ ... गायत (एवं कौ)	प्र व इन्द्राय मादनं हर्यश्वाय गायता ।
	सखायः सोमपाव्ने ॥ २ ॥
८.२.१६	वयम् उ त्वा तदिदर्था इन्द्र त्वायन्तः सखायः ।
	कण्वा उक्थेभिर् जरन्ते ॥ ३ ॥
८.९२.१९	इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः ।
	अर्कम् अर्चन्तु कारवः ॥ ४ ॥
८.१७.११	अयं त इन्द्र सोमो निपूतो अधि बर्हिषि ।
	एहीम् अस्य द्रवा पिब ॥ ५ ॥
१.४.१	सुरूपकृत्नुम् ऊतये सुदुघाम् इव गोदुहे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	जुहूमसि द्यविद्यवि ॥ ६ ॥
८.४५.२२	अभि त्वा वृषभा सुते सुतं सृजामि पीतये ।
	तृम्पा व्य् अश्नुही मदम् ॥ ७ ॥
८.८२.७	य इन्द्र चमसेष्व् आ सोमश् चमूषु ते सुतः ।
	पिबेद् अस्य त्वम् ईशिषे ॥ ८ ॥
१.३०.७	योगेयोगे तवस्तरं वाजेवाजे हवामहे ।
	सखाय इन्द्रम् ऊतये ॥ ९ ॥
१.५.१	आ त्व् एता नि षीदतेन्द्रम् अभि प्र गायत ।
	सखायः स्तोमवाहसः ॥ १० ॥ ॥५॥

१.१८

ऋ ३.५१.१०	इदं ह्य् अन्व् ओजसा सुतं राधानां पते ।
पिबा (एवं कौ)...	पिब त्व् अस्य गिर्वणः ॥ १ ॥
१.८.५ * * परश् * नु...	महं इन्द्रः पुरश् च नो महित्वम् अस्तु वज्रिणे ।
	द्यौर् न प्रथिना शवः ॥ २ ॥
८.८१.१ ...ग्राभं (एवं कौ) * *	आ तू न इन्द्र क्षुमन्तं चित्रं राभं सं गृभाय ।
	महाहस्ती दक्षिणेन ॥ ३ ॥
८.६९.४ * * * गिरेन्द्रम् (एवं कौ)	अभि प्र गोपतिं गिर इन्द्रम् अर्च यथा विदे ।
[* * *	सूनुं सत्यस्य सत्पतिम् ॥ ४ ॥
४.३१.१	कया नश् चित्र आ भुवद् ऊती सदावृधः सखा ।
	कया शचिष्ठया वृता ॥ ५ ॥
८.९२.७	त्यम् उ वः सत्रासाहं विश्वासु गीर्ष्व् आयतम् ।
	आ च्यावयस्य् ऊतये ॥ ६ ॥
१.१८.६	सदसस् पतिम् अद्भुतं प्रियम् इन्द्रस्य काम्यम् ।
	सनिं मेधाम् अयासिषम् ॥ ७ ॥
ऋग्वेदे नास्ति । [१.२]शौ ७.५५.१ ये ते पन्था-	ये ते पन्था अथो दिवो येभिर् व्य् अश्वम् ऐरयः ।
[नो ऽव दिवो येभिर्विश्वमैरयः	उत श्रोषन्तु नो भुवः ॥ ८ ॥
८.९३.२८	भद्रंभद्रं न आ भरेषम् ऊर्जं शतक्रतो ।
	यद् इन्द्र मृडयासि नः ॥ ९ ॥
८.९४.४	अस्ति सोमो अयं सुतः पिबन्त्य् अस्य मरुतः ।
	उत स्वराजो अश्विना ॥ १० ॥ ॥६॥

१.१९

ऋ १०.१५३.१	ईङ्खयन्तीर् अपस्युव इन्द्रं जातम् उपासते ।
भेजानासः * [नकिरा *	वन्वानासः सुवीर्यम् ॥ १ ॥
१०.१३४.७ नकिर् * मिनीमसि	न कि देवा इनीमसि न क्य् आ योपयामसि ।
	मन्त्रश्रुत्यं चरामसि ॥ २ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऋग्वेदे नास्ति	दोषो आगाद् बृहद् गाय द्युमद्गामाथर्वण ।
	स्तुहि देवं सवितारम् ॥ ३ ॥
१.४६.१	एषो उषा अपूर्व्या व्यु उच्छति प्रिया दिवः ।
	स्तुषे वाम् अश्विना बृहत् ॥ ४ ॥
१.८४.१३	इन्द्रो दधीचो अस्थभिर् वृत्राण्य् अप्रतिष्कुतः ।
	जघान नवतीर् नव ॥ ५ ॥
१.९.१	इन्द्रेहि मत्स्य् अन्धसो विश्वेभिः सोमपर्वभिः ।
	महं अभिष्टिर् ओजसा ॥ ६ ॥
४.३२.१	आ तू न इन्द्र वृत्रहन्न् अस्माकम् अर्धम् आ गहि ।
	महान् महीभिर् ऊतिभिः ॥ ७ ॥
८.६.५	ओजस् तद् अस्य तित्विष उभे यत् समवर्तयत् ।
	इन्द्रश् चर्मेव रोदसी ॥ ८ ॥
१.३०.४	अयम् उ ते सम् अतसि कपोत इव गर्भधिम् ।
	वचस् तच् चिन् न ओहसे ॥ ९ ॥
१०.१८६.१	वात आ वातु भेषजं शंभु मयोभु नो हृदे ।
* ण...	प्र न आयूंषि तारिषत् ॥ १० ॥ ॥७॥

१.२०

ऋ १.४१.१	यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा ।
नू चित् * * *	न किः स दभ्यते जनः ॥ १ ॥
८.४६.१०	गव्यो षु णो यथा पुराश्वयोत रथया ।
वरिवस्य महामह	वरिवस्या महोनाम् ॥ २ ॥
८.६.१९	इमास् त इन्द्र पृश्नयो घृतं दुहत आशिरम् ।
	एनाम् ऋतस्य पिप्युषीः ॥ ३ ॥
८.९३.१७	अया धिया च गव्यया पुरुणामन् पुरुष्टुत ।
...आभवः	यत् सोमेसोम आभुवः ॥ ४ ॥
१.३.१०	पावका नः सरस्वती वाजेभिर् वाजिनीवती ।
	यज्ञं वष्टु धियावसुः ॥ ५ ॥
ऋग्वेदे नास्ति । कौ ...तर्पयात्	क इमं नाहुषीष्व् आ इन्द्रं सोमस्य तर्पयत् ।
कौ...भरात्	स नो वसून्य् आ भरत् ॥ ६ ॥
ऋ ८.१७.१	आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् ।
	एदं बर्हिः सदो मम ॥ ७ ॥
१०.१८५.१ * * अवो ऽस्तु...	महि त्रीणाम् अवर् अस्तु द्युक्षं मित्रस्यार्यम्णः ।
	दुराधर्षं वरुणस्य ॥ ८ ॥
८.४६.१ * पुरूवसो (एवं कौ)...	त्वावतः पुरोवसो वयम् इन्द्र प्रणेतः ।
	स्मसि स्थातर् हरीणाम् ॥ ९ ॥ ॥८॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	१.२१
ऋ ८.६४.१ उत् * * स्तोमाः...	उ त्वा मन्दन्तु सोमाः कृणुष्व राधो अद्रिवः ।
	अव ब्रह्मद्विषो जहि ॥ १ ॥
३.४०.६	गिर्वणः पाहि नः सुतं मधोर् धाराभिर् अज्यसे ।
[उपानसः *	इन्द्र त्वादातम् इद् यशः ॥ २ ॥
१०.१०५.४ सचायोरिन्द्रश्चर्कृष आँ	सदा व इन्द्रश् चर्कृषद् आ उपो नु स सपर्यन् ।
नदयोर्विव्रतयोः * * (कौ न देवो वृतः)	न देव ऋतः शूर इन्द्रः ॥ ३ ॥
८.९२.२२	आ त्वा विशन्त्व् इन्दवः समुद्रम् इव सिन्धवः ।
	न त्वाम् इन्द्राति रिच्यते ॥ ४ ॥
१.७.१	इन्द्रम् इद् गाथिनो बृहद् इन्द्रम् अर्केभिर् अर्किणः ।
	इन्द्रं वाणीर् अनूषत ॥ ५ ॥
८.९३.३४	इन्द्र इषे ददातु न ऋभुक्षणम् ऋभुं रयिम् ।
	वाजी ददातु वाजिनम् ॥ ६ ॥
२.४१.१०	इन्द्रो अङ्ग महद् भयम् अभी षद् अप चुच्यवत् ।
	स हि स्थिरो विचर्षणिः ॥ ७ ॥
६.४५.२८	इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः ।
वत्सं गावो * *	गावो वत्सं न धेनवः ॥ ८ ॥
६.५७.१	इन्द्रा नु पूषणा वयं सख्याय स्वस्तये ।
[ज्यायाँ * *	हुवेम वाजसातये ॥ ९ ॥
४.३०.१ नकिर् * * उत्तरो *	न कि इन्द्र त्वद् उत्तरं न ज्यायो अस्ति वृत्रहन् ।
नकिरेवा * *	न क्य् एवं यथा त्वम् ॥ १० ॥ ॥९॥
	१.२२
ऋ ८.४५.२८	तरणिं वो जनानां त्रदं वाजस्य गोमतः ।
	समानम् उ प्र शंसिषम् ॥ १ ॥
१.९.४	असृग्रम् इन्द्र ते गिरः प्रति त्वाम् उद् अहासत ।
अजोषा...	सजोषा वृषभं पतिम् ॥ २ ॥
८.४६.४	सुनीथो घा स मर्त्यो यं मरुतो यम् अर्यमा ।
मित्रः (कौ मित्रास्)...	मित्रा पान्त्य् अद्रुहः ॥ ३ ॥
८.४५.४१	यद् वीडाव् इन्द्र यत् स्थिरे यत् पर्शाने पराभृतम् ।
	वसु स्पार्हं तद् आ भर ॥ ४ ॥
८.९३.१६	श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम् ।
आ शुषे * *	आशिषे राधसे महे ॥ ५ ॥
ऋग्वेदे नास्ति	अरं त इन्द्र श्रवसे गमेम शूर त्वावतः ।
	अरं शक्र परेमणि ॥ ६ ॥
३.५२.१	धानावन्तं करम्भिणम् अपूपवन्तम् उक्थिनम् ।
	इन्द्र प्रातर् जुषस्व नः ॥ ७ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

८.१४.१३	अपां फेनेन नमुचेः शिर इन्द्रोद् अवर्तयः । विश्वा यद् अजयः स्पृधः ॥ ८ ॥
ऋग्वेदे नास्ति	इमे त इन्द्र सोमाः सुतासो ये च सोत्वाः । तेषां मत्स्व प्रभूवसो ॥ ९ ॥
८.९३.२५ * सोमा सुता इमे * * * * इन्द्रमा वह (कौ इन्द्र मृडय)	तुभ्यं सुतासः सोमाः स्तीर्णं बर्हिर् विभावसो । स्तोतृभ्य इन्द्र मृडया ॥ १० ॥ ॥१०॥

१.२३

ऋ १.३०.१ । कौ * * * क्रिविं ...	आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम् । मंहिष्ठं सिञ्च इन्दुभिः ॥ १ ॥
८.९२.१० * * * ण...	अतश् चिद् इन्द्र न उपा याहि शतवाजया । इषा सहस्रवाजया ॥ २ ॥
८.४५.४	आ बुन्दं वृत्रहा ददे जातः पृच्छद् वि मातरम् । क उग्राः के ह शृण्विरे ॥ ३ ॥
८.३२.१० साधु...	बृवदुक्थं हवामहे सृप्रकरस्नम् ऊतये । साधः कृण्वन्तम् अवसे ॥ ४ ॥
१.९०.१ ...नयतु *	ऋजुनीती नो वरुणो मित्रो नयति विद्वान् । अर्यमा देवैः सजोषाः ॥ ५ ॥
८.५.१ * * * सती... * * विश्वधा°	दूराद् इहेव यत् सतो अरुणप्सुर् अशिश्वितत् । वि भानुं विश्वथातनत् ॥ ६ ॥
३.६२.१६	आ नो मित्रावरुणा घृतैर् गव्यूतिम् उक्षतम् । मध्वा रजांसि सुक्रतू ॥ ७ ॥
१.३७.१० ...अज्मेष्व् *	उद् उ त्ये सूनवो गिरः काष्ठा यज्ञेष्व् अत्नत । वाश्रा अभिज्ञु यातवे ॥ ८ ॥
१.२२.१७ ...पांसुरे	इदं विष्णुर् वि चक्रमे त्रेधा नि दधे पदम् । समूढम् अस्य पांसुले ॥ ९ ॥ ॥११॥

१.२४

ऋ ८.३२.२१ ...उपारणे इमं रातं...	अतीहि मन्युषाविणं सुषुवांसम् उपैरया । अस्य रातौ सुतं पिब ॥ १ ॥
ऋग्वेदे नास्ति	कद् उ प्रचेतसे महे वचो देवाय शस्यते । तद् इद् ध्य् अस्य वर्धनम् ॥ २ ॥
८.२.१४ * * * अगोररिर् * *	उक्थं चन शस्यमानं नागो रयिर् आ चिकेत । न गायत्रं गीयमानम् ॥ ३ ॥
ऋग्वेदे नास्ति	इन्द्र उक्थेभिर् मन्दिष्ठो वाजानां च वाजपतिः । हरिवान् सुतानां सखा ॥ ४ ॥
१.१५.५ तवेद्धि * *	ब्राह्मणाद् इन्द्र राधसः पिबा सोमम् ऋतुंर् अनु । तवेदं सख्यम् अस्तृतम् ॥ ५ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८.३२.७ ...ष्मसि * * *	वयं घा ते अपि स्मसि स्तोतार इन्द्र गिर्वणः ।
	त्वं नो जिन्व सोमपाः ॥ ६ ॥
८.२.१९ ओ षु प्र याहि वाजेभिर्मा	आ याह्य् उप नः सुतं वाजेभिर् मा हृणीयथाः ।
[हृणीथा अभ्यस्मान्	महं इव युवजानिः ॥ ७ ॥
१०.१०५.१ * * * * आव * * *	कदा वसो स्तोत्रं हर्यत आ अव श्मशा रुधद् वाः ।
* * वाताप्याय(एवं कौ)	दीर्घं सुतं वाताप्याया ॥ ८ ॥
ऋग्वेदे नास्ति	एन्द्र पृक्षु कासु चिन् नृम्णं तनूषु धेहि नः ।
	सत्राजिद् उग्र पौंस्यम् ॥ ९ ॥
१.९.२ एमेनं सृजता सुते * * *	अयम् एनं सचतां सुतो मन्दिम् इन्द्राय मन्दिने ।
	चक्रिं विश्वानि चक्रये ॥ १० ॥ ॥ १२ ॥ ॥१॥
	१.२५
ऋ ७.३२.२२	अभि त्वा शूर नोनुमो अदुग्धा इव धेनवः ।
	ईशानम् अस्य जगतः स्वर्दृशम् ईशानम् इन्द्र तस्थुषः ॥ १ ॥
६.४६.१ ...साता * *	त्वाम् इद् धि हवामहे सातौ वाजस्य कारवः ।
	त्वां वृत्रेष्व् इन्द्र सत्पतिं नरस् त्वां काष्ठास्व् अर्वतः ॥ २ ॥
८.४९.१	अभि प्र वः सुराधसम् इन्द्रम् अर्च यथा विदे ।
...पुरूवसुः (एवं कौ) * *	यो जरितृभ्यो मघवा पुरोवसुः सहस्रेणेव शिक्षति ॥ ३ ॥
८.८८.१	तं वो दस्मम् ऋतीषहं वसोर् मन्दानम् अन्धसः ।
	अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर् नवामहे ॥ ४ ॥
८.६६.१	तरोभिर् वो विदद्वसुम् इन्द्रं सबाध ऊतये ।
	बृहद् गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ ५ ॥
७.३२.२०	तरणिर् इत् सिषासति वाजं पुरन्ध्या युजा ।
	आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्र्वम् ॥ ६ ॥
८.३.१	पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
* * * °माद्यो ...	आपिर् नो बोधि सधमाद्ये वृधे अस्मं अवन्तु ते धियः ॥ ७ ॥
८.६१.७	त्वं ह्य् एहि चेरवे विदा भगं वसुत्तये ।
...इन्द्राश्वमिष्टये (एवं कौ)	उद् वावृषस्व मघवन् गविष्टय उद् इन्द्रो अश्वमिष्टये ॥ ८ ॥
७.५९.३	न हि वश् चरमं चन वसिष्ठः परिमंसते ।
...पिबत *	अस्माकम् अद्य मरुतः सुते सचा विश्वे पिबन्तु कामिनः ॥९॥
८.१.१	मा चिद् अन्यद् वि शंसत सखायो मा रिषण्यत ।
	इन्द्रम् इत् स्तोता वृषणं सचा सुते मुहुर् उक्था च शंसत ॥ १० ॥ ॥१॥
	१.२६
ऋ ८.७०.३	नकिष् टं कर्मणा नशद् यश् चकार सदावृधम् ।
...धृष्णवोजसम्	इन्द्रं न यज्ञैर् विश्वगूर्तम् ऋभ्वसम् अधृष्टं धृष्णुम् ओजसा ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८.१.१२	य ऋते चिद् अभिश्रिषः पुरा जत्रुभ्य आतृदः ।
...पुरूवसुर् (एवं कौ) इष्कर्ता * *	संधाता संधिं मघवा पुरोवसुर् निष्कर्ता विहुतं पुनः ॥ २ ॥
८.१.२४	आ त्वा सहस्रम् आ शतं युक्ता रथे हिरण्यये ।
	ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥ ३ ॥
३.४५.१	आ मन्द्रैर् इन्द्र हरिभिर् याहि मयूररोमभिः ।
* * * * * यमन् विं (कौ येमुर् [इन्]) ...	मा त्वा के चिन् नि येमुर् विं न पाशिनो अति धन्वेव तं इहि ॥ ४ ॥
१.८४.१९	त्वम् अङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम् ।
	न त्वद् अन्यो मघवन्न् अस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ ५ ॥
८.९०.५ ... पते	त्वम् इन्द्र यशा अस्य् ऋजीषी शवसस् पतिः ।
...एक इदनुत्ता चर्षणीधृता	त्वं वृत्राणि हंस्य् अप्रतीन्य् एक इत् पुरुरनुत्तश् चर्षणीधृतिः ॥ ६ ॥
८.३.५	इन्द्रम् इद् देवतातय इन्द्रं प्रयत्य् अध्वरे ।
	इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥ ७ ॥
८.३.३ * * * पुरूवसो (एवं कौ)...	इमा उ त्वा पुरोवसो गिरो वर्धन्तु या मम ।
	पावकवर्णाः शुचयो विपश्चितो अभि स्तोमैर् अनूषत ॥ ८ ॥
८.३.१५	उद् उ त्ये मधुमत्तमा गिरः स्तोमास ईरते ।
...इव (एवं कौ)	सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इवा ॥ ९ ॥
८.४.३	यथा गौरो अपा कृतं तृष्यन्न् एत्य् अवेरिणम् ।
पिब (एवं कौ)	आपित्वे नः प्रपित्वे तूयम् आ गहि कण्वेषु सु सचा पिबा ॥ १० ॥ ॥२॥

१.२७

ऋ ८.६१.५	शग्ध्य् ऊ षु शचीपत इन्द्र विश्वाभिर् ऊतिभिः ।
	भगं न हि त्वा यशसं वसुविदम् अनु शूर चरामसि ॥ १ ॥
८.९७.१	या इन्द्र भुज आभरः स्वर्वां असुरेभ्यः ।
	स्तोतारम् इन् मघवन्न् अस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥ २ ॥
८.१०१.५	प्र मित्राय प्रार्यम्णे सचथ्यम् ऋतावसो ।
वरूथ्यं ...	वरूथ्ये वरुणे छन्द्यं वचः स्तोत्रं राजसु गायत ॥ ३ ॥
८.३.७	अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिर् आयवः ।
	समीचीनास ऋभवः सम् अस्वरन् रुद्रा गृणन्त पूर्व्यम् ॥ ४ ॥
८.८९.३	प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत ।
	वृत्रं हनति वृत्रहा शतक्रतुर् वज्रेण शतपर्वणा ॥ ५ ॥
८.८९.१	बृहद् इन्द्राय गायत मरुतो वृत्रहन्तमम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

...जागृवि (एवं कौ)	येन ज्योतिर् अजनयन्न् ऋतावृधो देवं देवाय जागृ-वीम् ॥ ६ ॥
७.३२.२६	इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा । शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिर् अशीमहि ॥ ७ ॥
८.९७.७ । कौ ...सधमाद्ये	मा न इन्द्र परा वृणग् भवा नः सधमाद्यः ।
* * ऊती (एवं कौ)...	त्वं न ऊतिस् त्वम् इन् न आप्यं मा न इन्द्र परा वृणक् ॥ ८ ॥
८.३३.१	वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः । पवित्रस्य प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते ॥ ९ ॥
६.४६.७	यद् इन्द्र नाहुषीष्व् आ ओजो नृम्णं च कृष्टिषु । यद् वा पञ्च क्षितीनां द्युम्नम् आ भर सत्रा विश्वानि पौंस्या ॥ १० ॥ ॥३॥

१.२८

ऋ ८.३३.१० ...ऽवृतः	सत्यम् इत्था वृषेद् असि वृषजूतिर् नो ऽविता । वृषा ह्य् उग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥ १ ॥
८.९७.४	यच् छक्रासि परावति यद् अर्वावति वृत्रहन् । अतस् त्वा गीर्भिर् द्युगद् इन्द्र केशिभिः सुतावं आ विवासति ॥ २ ॥
८.४६.१४ * * * अन्धसो (एवं कौ)...	अभि वो वीरम् अन्धसा मदेषु गाय गिरा महा विचेतसम् । इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा ॥ ३ ॥
६.४६.९ ...स्वस्तिमत्	इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तये । छर्दिर् यच्छ मघवद्भ्यश् च मह्यं च यावया दिद्युम् एभ्यः ॥ ४ ॥
८.९९.३ * जाते जनमान... दीधिम	श्रायन्त इव सूर्यं विश्वेद् इन्द्रस्य भक्षत । वसूनि जातो जनिमान्य् ओजसा प्रति भागं न दीधिमः ॥ ५ ॥
८.७०.७ * * * आपदिषं * *	न सीम् अदेव आप तद् इषं दीर्घायो मर्त्यः ।
* * * एतशा * हरी इन्द्रो *	एतग्वा चिद् य एतशो युयोजत इन्द्रो हरी युयोजते ॥ ६ ॥
८.९०.१ * * * हव्य इन्द्रः * भूषतु	आ नो विश्वासु हव्यम् इन्द्रं समत्सु भूषत ।
* * * वृत्रहा * ऋषीषमः (कौ ऋचीषम)	उप ब्रह्माणि सवनानि वृत्रहन् परमज्या ऋचीष्म ॥ ७ ॥
७.३२.१६	तवेद् इन्द्रावमं वसु त्वं पुष्यसि मध्यमम् । सत्रा विश्वस्य परमस्य राजसि नकिष् ट्वा गोषु वृण्वते ॥ ८ ॥
८.१.७	क्वेयथ क्वेद् असि पुरुत्रा चिद् धि ते मनः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	अलर्षि युध्म खजकृत् पुरन्दर प्र गायत्रा अगासिषुः ॥९॥
८.६६.७	वयम् एनम् इदा ह्यो ऽपीपेमेह वज्रिणम् ।
* * * समना ...	तस्मा उ अद्य सवने सुतं भरा नूनं भूषत श्रुते
	॥ १० ॥ ॥४॥
	१.२९
ऋ ८.७०.१	यो राजा चर्षणीनां याता रथेभिर् अध्रिगुः ।
* * * ज्येष्ठो ...	विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥ १ ॥
८.६१.१३	यत इन्द्र भयामहे ततो नो अभयं कृधि ।
* * * * * ऊतिभिर् ...	मघवन् शग्धि तव तन् न ऊतये वि द्विषो वि मृधो
	जहि ॥ २ ॥
८.१७.१४	वास्तोष् पते ध्रुवा स्थूणांसत्रं सोम्यानाम् ।
* भेत्ता पुरां...	द्रप्सः पुरां भेत्ता शश्वतीनाम् इन्द्रो मुनीनां सखा ॥ ३ ॥
८.१०१.११	बण् महं असि सूर्य बड् आदित्य महं असि ।
* * * * पनस्यते ऽद्धा * * *	महस् ते सतो महिमा पनिष्टम मह्ना देव महं असि ॥ ४ ॥
८.४.१	यद् इन्द्र प्राग् अपाग् उदङ् न्यग् वा हूयसे नृभिः ।
	सिमा पुरू नृषूतो अस्य् आनवे ऽसि प्रशर्ध तुर्वशे ॥ ५ ॥
७.३२.१४ ...त्वावसुं * * दधर्षति	कस् तम् इन्द्र त्वावसव् आ मर्त्यो दधर्षते ।
* इत् ... [(एवं कौ)	श्रद्धा हि ते मघवन् पार्ये दिवि वाजी वाजं सिषा-
	सति ॥ ६ ॥
८.४.९ * * सुरूप इद् गोमाँ (एवं	अश्वी रथी सुरूपयु गोमं यद् इन्द्र ते सखा ।
... चन्द्रो * * [कौ) इद् * * *	श्वात्रभाजा वयसा सचते सदा चन्द्रैर् याति सभाम्
	उप ॥ ७ ॥
८.७०.५	यद् द्याव इन्द्र ते शतं शतं भूमीर् उत स्युः ।
	न त्वा वज्रिन् सहस्रं सूर्या अनु न जातम् अष्ट
	रोदसी ॥ ८ ॥
६.५९.६	इन्द्राग्नी अपाद् इयं पूर्वागात् पद्वतीभ्यः ।
हित्वी * * वावदच् ...	हित्वा शिरो जिह्वया रारपच् चरत् त्रिंशत् पदा न्य्
	अक्रमीत् ॥ ९ ॥
८.५३.५	इन्द्र नेदीय एद् इहि मितमेधाभिर् ऊतिभिः ।
	आ शंतम शंतमाभिर् अभिष्टिभिर् आ स्वापे स्वा-
	पिभिः ॥ १० ॥ ॥५॥
	१.३०
ऋ ८.९९.७	इत ऊती वो अजरं प्रहेतारम् अप्रहितम् ।
	आशुं जेतारं होतारं रथीतमम् अतूर्तं तुग्रियावृधम् ॥ १ ॥
७.३२.१	मो षु त्वा वाघतश् चनारे अस्मन् नि रीरमन् ।
* चित् ...	आरात्ताद् वा सधमादं न आ गहीह वा सन्न् उप श्रुधि ॥२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

७.३२.८ सुनोता...	सुनोत सोमपाव्ने सोमम् इन्द्राय वज्रिणे । पचता पक्तीर् अवसे कृणुध्वम् इत् पृणन्न् इत् पृणते मयः ॥ ३ ॥
६.४६.३ सहस्रमुष्क...	यः सत्राहा विचर्षणिर् इन्द्रं तं हूमहे वयम् । सहस्रमन्यो तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥ ४ ॥
१.१३९.५ ...दशस्यतम्	शचीभिर् नः शचीवसू दिवा नक्तं दिशस्यतम् । मा वां रातिर् उप दसत् कदा चनास्मद् रातिः कदा चन ॥ ५ ॥
ऋग्वेदे नास्ति	यदा कदा च मीढुषे स्तोता जरेत मर्त्यः । आद् इद् वन्देत वरुणं विपा गिरा धर्तारं विव्रतानाम् ॥ ६ ॥
८.३३.४ * गायान्धसो ... * * * यः सुते सचा वज्री रथो *	पाहि गा अन्धसो मद इन्द्राय मेध्यातिथे । यः संमिश्लो हर्योर् यो हिरण्यय इन्द्रो वज्री हिरण्ययः ॥ ७ ॥
८.६१.१	उभयं शृणवच् च न इन्द्रो अर्वाग् इदं वचः । सत्राच्या मघवा सोमपीतये धिया शविष्ठ आ गमत् ॥ ८ ॥
८.१.५ * * त्वामद्रिवः * * देयाम्	महे चन त्वाद्रिवः परा शुल्काय दीयसे । न सहस्राय नायुताय वज्रिवो न शताय शतामघ ॥ ९ ॥
८.१.६	वस्यं इन्द्रासि मे पितुर् उत भ्रातुर् अभुञ्जतः । माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥ १० ॥ ॥६॥

१.३१

ऋ ७.३२.४	इम इन्द्राय सुन्विरे सोमासो दध्याशिरः । तं आ मदाय वज्रहस्त पीतये हरिभ्यां याह्य् ओक आ ॥ १ ॥
ऋग्वेदे नास्ति	इम इन्द्र मदाय ते सोमाश् चिकित्र उक्थिनः । मधोः पपान उप नो गिरः शृणु रास्व स्तोत्राय गिर्वणः ॥ २ ॥
८.१.१०	आ त्व् अद्य सबर्दुघां हुवे गायत्रवेपसम् । इन्द्रं धेनुं सुदुघाम् अन्याम् इषम् उरुधाराम् अरंकृतम् ॥३॥
८.८८.३ * दित्ससि ...	न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीडवः । यच् छिक्षसि स्तुवते मावते वसु नकिष् टद् आ मिनाति ते ॥ ४ ॥
८.३३.७ ... पिवन्तं (एवं कौ) * * दधे (एवं कौ)	क ईं वेद सुते सचा पिबन्तः कद् वयो दधुः । अयं यः पुरो विभिनत्त्य् ओजसा मन्दानः शिप्रिय्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्धसः (एवं कौ)	अन्धसा ॥ ५ ॥
ऋग्वेदे नास्ति	यद् इन्द्र शासो अव्रतं च्यावया सदसस् परि ।
	अस्माकम् अंशुर् मघवन् पुरुस्पृहं वसव्ये अधि
कौ बर्हय	बर्हया ॥ ६ ॥
ऋग्वेदे नास्ति । शौ ६.४.१	त्वष्टा नो दैव्यं वचः पर्जन्यो ब्रह्मणस् पतिः ।
	पुत्रैर् भ्रातृभिर् अदितिर् नु पातु नो दुष्टरं त्रामणं
	वचः ॥ ७ ॥
ऋ ८.५१.७	कदा चन स्तरीर् असि नेन्द्र सश्चसि दाशुषे ।
...पृच्यते (एवं कौ)	उपोपेन् नु मघवन् भूय इन् नु ते दानं देवस्य पृच्यसे ॥८॥
८.३.१७ युक्ष्वा ...	युङ्क्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः ।
	अर्वाचीनो मघवन् सोमपीतय उग्र ऋष्वेभिर् आ
	गहि ॥ ९ ॥
८.९९.१	त्वाम् इदा ह्यो नरो ऽपीप्यन् वज्रिन् भूर्णयः ।
* * स्तोमवाहसाम् ...	स इन्द्र स्तोमवाहस इह श्रुध्य् उप स्वसरम् आ
	गहि ॥ १० ॥ ॥७॥
	१.३२
ऋ ७.८१.१ प्रत्यु अदर्श्य् (एवं कौ) ...	प्रति वो अदर्श्य् आयत्य् उच्छन्ती दुहिता दिवः ।
* महि व्ययति चक्षसे ...	अपो मही वृणुते चक्षुषा तमो ज्योतिष् कृणोति
	सूनरी ॥ १ ॥
७.७४.१	इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
	अयं वाम् अह्वे ऽवसे शचीवसू विशंविशं हि गच्छथः ॥ २ ॥
ऋग्वेदे नास्ति	कु ष्ठः को वाम् अश्विना तपानो देवा मर्त्यः ।
	घ्नता वाम् अश्नया क्षपमाणो ऽंशुनेत्थम् उ आद् व्
	अन्यथा ॥ ३ ॥
१.४७.१ * * * * * ऋतावृधा	अयं वां मधुमत्तमः सुतः सोमो दिविष्टिषु ।
	तम् अश्विना पिबतं तिरोअह्न्यं धत्तं रत्नानि दाशुषे ॥ ४ ॥
८.१.२० मा ... अहं गिरा	आ त्वा सोमस्य गल्दया सदा याचन्न् अहं ज्या ।
	भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥ ५ ॥
८.४.११	अध्वर्यो द्रावया त्वं सोमम् इन्द्रः पिपासति ।
उप ...	उपो नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ॥ ६ ॥
७.३२.२४	अभी षतस् तद् आ भरेन्द्र ज्यायः कनीयसः ।
पुरूवसुर (एवं कौ) * * सनादसि ...	पुरोवसुर् हि मघवन् बभूविथ भरेभरे च हव्यः ॥ ७ ॥
७.३२.१८	यद् इन्द्र यावतस् त्वम् एतावद् अहम् ईशीय ।
* * दिधिषेय ... रासीय(कौ रंसिषम्)	स्तोतारम् इद् दिधिषे रदावसो न पापत्वाय रंसिषः ॥ ८ ॥
८.९९.५	त्वम् इन्द्र प्रतूर्तिष्व् अभि विश्वा असि स्पृधः ।
* * विश्वतूर् ...	अशस्तिहा जनिता वृत्रतूर् असि त्वं तूर्य तरुष्यतः ॥ ९ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८.८८.५ * हि ... अन्तेभ्यस् * ... अनु स्वधां	प्र यो रिरिक्ष ओजसा दिवः सदोभ्यस् परि । न त्वा विव्याच रज इन्द्र पार्थिवम् अति विश्वं ववक्षिथ ॥ १० ॥ ॥८॥
	१.३३
ऋ ७.२१.१	असावि देवं गोऋजीकम् अन्धो न्यू अस्मिन्न् इन्द्रो जनुषेम् उवोच ।
	बोधामसि त्वा हर्यश्व यज्ञैर् बोधा नः स्तोमम् अन्धसो मदेषु ॥ १ ॥
७.२४.१	योनिष् ट इन्द्र सदने अकारि तम् आ नृभिः पुरुहूत प्र याहि ।
* * * * वृधे च ...	असो यथा नो ऽविता वृधश् चिद् ददो वसूनि ममदश् च सोमैः ॥ २ ॥
५.३२.१	अदर्दर् उत्सम् असृजो वि खानि त्वम् अर्णवान् बद्बधानं अरम्णाः ।
... सृजो वि धारा अव दानवं *	महान्तम् इन्द्र पर्वतं वि यद् वः सृजद् धारा अव यद् दानवान् हन् ॥ ३ ॥
१०.१४८.१ ... ससवांसश् च *	सुष्वाणास इन्द्र स्तुमसि त्वा सनिष्यन्तश् चित् तुविनृम्ण वाजम् ।
* * * * * चाकन् त्मना तना सनुयाम *	आ नो भर सुवितं यस्य कोना तना त्मना सह्यामा त्वोताः ॥ ४ ॥
१०.४७.१ जगृभ्मा ...	जगृह्मा ते दक्षिणम् इन्द्र हस्तं वसूयवो वसुपते वसूनाम् ।
	विद्मा हि त्वा गोपतिं शूर गोनाम् अस्मभ्यं चित्रं वृषणं रयिं दाः ॥ ५ ॥
७.२७.१ ... युनजते (एवं कौ) * *	इन्द्रं नरो नेमधिता हवन्ते यत् पार्या युनजन्ते धियस् ताः ।
* * शवसश्चकान आ...	शूरो नृषाता श्रवसश् च काम आ गोमति व्रजे भजा त्वं नः ॥ ६ ॥
१०.७३.११	वयः सुपर्णा उप सेदुर् इन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
	अप ध्वान्तम् ऊर्णुहि पूर्धि चक्षुर् मुमुग्ध्य् अस्मान् निधयेव बद्धान् ॥ ७ ॥
१०.१२३.६	नाके सुपर्णम् उप यत् पतन्तं हृदा वेनन्तो अभ्य् अचक्षत त्वा ।
	हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥ ८ ॥
ऋग्वेदे नास्ति कौ ... आवः (एवमितरासु संहितासु)	ब्रह्म जज्ञानं प्रथमं पुरस्ताद् वि सीमतः सुरुचो वेन आवत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	स बुध्न्या उपमा अस्य विष्ठाः सतश् च योनिम् असतश् च विवः ॥ ९ ॥
६.३२.१	अपूर्व्या पुरुतमान्य् अस्मै महे वीराय तवसे तुराय ।
...आसा * तक्षम्	विरप्शिने वज्रिणे शंतमानि वचांस्य् अस्मै स्थविराय तक्षुः ॥ १० ॥ ॥१॥
	१.३४
ऋ ८.९६.१३ * * * * इयानः...	अव द्रप्सो अंशुमतीम् अतिष्ठद् ईयानः कृष्णो दशभिः सहस्रैः ।
...स्नेहितीर् * अधत्त	आवत् तम् इन्द्रः शच्या धमन्तम् अप स्नीहितिं नृमणा अधद्राः ॥ १ ॥
८.९६.७	वृत्रस्य त्वा श्वसथाद् ईषमाणा विश्वे देवा अजहुर् ये सखायः ।
	मरुद्भिर् इन्द्र सख्यं ते अस्त्व् अथेमा विश्वाः पृतना जयासि ॥ २ ॥
१०.५५.५	विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार ।
	देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः सम् आन ॥ ३ ॥
८.९६.१६	त्वं ह त्यत् सप्तभ्यो जायमानो ऽशत्रुभ्यो अभवः शत्रुर् इन्द्र ।
	गूढे द्यावापृथिवी अन्व् अविन्दो विभुमद्भ्यो भुवनेभ्यो रणं धाः ॥ ४ ॥
ऋग्वेदे नास्ति	मेळिं न त्वा वज्रिणं भृष्टिमन्तं पुरुधस्मानं वृषभं स्थिरप्स्नुम् ।
	करोष्य् अर्यस् तरुषीर् दुवस्युर् इन्द्र द्युक्षं वृत्रहणं गृणीषे ॥ ५ ॥
७.३१.१० * * * महिवृधे...	प्र वो महे महेवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् ।
* * * चरा...	विशः पूर्वीः प्र चर चर्षणिप्राः ॥ ६ ॥
३.३०.२२	शुनं हुवेम मघवानम् इन्द्रम् अस्मिन् भरे नृतमं वाजसातौ ।
धनानाम्	शृण्वन्तम् उग्रम् ऊतये समत्सु घ्नन्तं वृत्राणि संजितं धनानि ॥ ७ ॥
७.२३.१	उद् उ ब्रह्माण्य् ऐरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ ।
* * * शवसा...	आ यो विश्वानि श्रवसा ततानोपश्रोता म ईवतो वचांसि ॥ ८ ॥
१०.७३.९	चक्रं यद् अस्याप्स्व् आ निषत्तम् उतो तद् अस्मै मध्व् इच् चच्छद्यात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	पृथिव्याम् अतिषितं यद् ऊधः पयो गोष्व् अदधा ओषधीषु ॥ ९ ॥ ॥२॥
	१.३५
ऋ १०.१७८.१ ...सहावानं * *	त्यम् ऊ षु वाजिनं देवजूतं सहोवानं तरुतारं रथानाम् । अरिष्टनेमिं पृतनाजम् आशुं स्वस्तये तार्क्ष्यम् इहा हुवेम ॥ १ ॥
६.४७.११	त्रातारम् इन्द्रम् अवितारम् इन्द्रं हवेहवे सुहवं शूरम् इन्द्रम् ।
ह्वयामि शक्रं * * स्वस्ति नो * धात्व्	हुवे नु शक्रं पुरुहूतम् इन्द्रम् इदं हविर् मघवा वेत्व् इन्द्रः ॥ २ ॥
१०.२३.१	यजामह इन्द्रं वज्रदक्षिणं हरीणां रथ्यं विव्रतानाम् ।
* श्मश्रु * ऊर्ध्वथा भूद् * * दयमानो * *	प्र श्मश्रुभिर् दोधुवद् ऊर्ध्वधा भुवद् वि सेनाभिर् भयमानो वि राधसा ॥ ३ ॥
४.१७.८	सत्राहणं दाधृषिं तुम्रम् इन्द्रं महाम् अपारं वृषभं सुवज्रम् । हन्ता यो वृत्रं सनितोत वाजं दाता मघानि मघवा सुराधाः ॥ ४ ॥
ऋग्वेदे न स्तः	यो नो वनुष्यन्न् अभिदाति मर्त उगणा वा मन्यमानस् तुरो वा । क्षिधी युधा शवसा वा तम् इन्द्राभी ष्याम वृषमणस् त्वोताः ॥ ५ ॥ यं वृत्रेषु क्षितयः स्पर्धमाना यं युक्तेषु तुरयन्तो हवन्ते । यं शूरसातौ यम् अपाम् उपज्मन् यं विप्रासो वाजयन्ते स इन्द्रः ॥ ६ ॥
३.५३.१	इन्द्रापर्वता बृहता रथेन वामीर् इष आ वहतं सुवीराः । वीतं हव्यान्य् अध्वरेषु देवा वर्धेथां गीर्भिर् इडया मदन्ता ॥ ७ ॥
१०.८९.४ ...प्रेरयं *	इन्द्राय गिरो अनिशितसर्गा अपः प्रैरयत् सगरस्य बुध्नात् ।
* * चक्रिया ...	यो अक्षेणेव चक्रियौ शचीभिर् विष्वक् तस्तम्भ पृथिवीम् उत द्याम् ॥ ८ ॥
१०.१०.१ ओ चित् सखायं * ववृत्यां * * * अर्णवं जगन्वान्	आ त्वा सखायः सख्या ववृत्युस् तिरः पुरू चिद् अर्णवां जगम्याः ।
... वेधा अधि क्षमि प्रतरं दीध्यानः	पितुर् नपातम् आ दधीत वेधा अस्मिन् क्षये प्रतरां दीद्यानः ॥ ९ ॥
१.८४.१६	को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आसन्निषून् हृत्स्वसो मयो॰...	आसन्न् एषाम् अप्सुवाहो मयोभून् य एषां भृत्याम्
	ऋणधत् स जीवात् ॥ १० ॥ ॥३॥
	१.३६
ऋ १.१०.१	गायन्ति त्वा गायत्रिणो अर्चन्त्य् अर्कम् अर्किणः ।
	ब्रह्माणस् त्वा शतक्रत उद् वंशम् इव येमिरे ॥ १ ॥
१.११.१	इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसं गिरः ।
	रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥ २ ॥
१.८४.४	इमम् इन्द्र सुतं पिब ज्येष्ठम् अमर्त्यं मदम् ।
	शुक्रस्य त्वाभ्य् अक्षरन् धारा ऋतस्य सादने ॥ ३ ॥
५.३९.१ * * * मेहनास्ति...	यद् इन्द्र चित्र म इह नास्ति त्वादातम् अद्रिवः ।
...भर (एवं कौ)	राधस् तन् नो विदद्वस उभयाहस्तिय् आ भरा ॥ ४ ॥
८.९५.४	श्रुधी हवं तिरश्च्या इन्द्र यस् त्वा सपर्यति ।
	सुवीर्यस्य गोमतो रायस् पूर्धि महं असि ॥ ५ ॥
१.८४.१	असावि सोम इन्द्र ते शविष्ठ धृष्णव् आ गहि ।
	आ त्वा पृणक्त्व् इन्द्रियं रजः सूर्यो न रश्मिभिः ॥६॥
८.३४.१	एन्द्र याहि हरिभिर् उप कण्वस्य सुष्टुतिम् ।
दिवो (एवं कौ)...	देवा अमुष्य शासतो दिवं यय दिवावसो ॥ ७ ॥
८.९५.१	आ त्वा गिरो रथीर् इवास्थुः सुतेषु गिर्वणः ।
* * * * इन्द्र * * मातरः	अभि त्वा सम् अनूषत गावो वत्सं न धेनवः ॥ ८ ॥
८.९५.७	एतो न्व् इन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना ।
* * * शुद्ध...	शुद्धैर् उक्थैर् वावृध्वांसं शुद्धैर् आशीर्वान् ममत्तु ॥ ९ ॥
६.४४.१ * रयिवो रयिंतमो...	यो रयिं वो रयिंतमो यो द्युम्नैर् द्युम्नवत्तमः ।
	सोमः सुतः स इन्द्र ते ऽस्ति स्वधापते मदः ॥ १० ॥ ॥ ४ ॥
	१.३७
ऋ ६.४२.१	प्रत्य् अस्मै पिपीषते विश्वानि विदुषे भर ।
...नरे	अरंगमाय जग्मये ऽपश्चाद्दघ्वने नरः ॥ १ ॥
ऋग्वेदे नास्ति	आ नो वयोवयःशयं महान्तं गह्वरेष्ठाम् ।
	महान्तं पूर्विनेष्ठाम् उग्रं वचो अपावधीः ॥ २ ॥
८.६८.१	आ त्वा रथं यथोतये सुम्नाय वर्तयामसि ।
...इन्द्र * सत्पते	तुविकूर्मिम् ऋतीषहम् इन्द्रं शविष्ठ सत्पतिम् ॥ ३ ॥
८.६३.१ * * महानां...	स पूर्व्यो महोनां वेनः क्रतुभिर् आनजे ।
	यस्य द्वारा मनुः पिता देवेषु धिय आनजे ॥ ४ ॥
५.६१.११ य ईं वहन्त आशुभिः {	यदी वहन्त्य् आशवो भ्राजमाना रथेष्व् आ ।
पिबन्तो * मधु । अत्र श्रवांसि दधिरे {	पिबन्तो मदिरं मधु तत्र श्रवांसि कृण्वते ॥ ५ ॥
६.४४.४	त्यम् उ वो अप्रहणं गृणीषे शवसस् पतिम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इन्द्रं विश्वासहं नरं शचिष्ठं विश्ववेदसम् ॥ ६ ॥
दधिक्राव्णो अकारिषं जिष्णोर् अश्वस्य वाजिनः ।
सुरभि नो मुखा करत् प्र ण आयूंषि तारिषत् ॥ ७ ॥
पुरां भिन्दुर् युवा कविर् अमितौजा अजायत ।
इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥ ८ ॥
॥५॥

१.३८

प्रप्र वस् त्रिष्टुभम् इषं वन्दद्वीरायेन्दवे ।
धिया वो मेधसातये पुरन्ध्या विवासति ॥ १ ॥
कश्यपस्य स्वर्विदो य आहुः सयुजाव् इति ।
ययोर् विश्वम् अपि व्रते यज्ञं धीरा निचाय्या ॥ २ ॥
विश्वानरस्य वस् पतिम् अनानतस्य शवसः ।
एवैश् च चर्षणीनाम् ऊती हुवे रथानाम् ॥ ३ ॥
स घा यस् ते दिवो नरो धिया मर्तस्य शर्मतः ।
ऊती स बृहतो दिवो द्विषो अंहो न तरति ॥ ४ ॥
अर्चत प्रार्चत नरः प्रियमेधासो अर्चत ।
अर्चन्तु पुत्रका उत पुरम् इद् धृष्ण्व् अर्चत ॥ ५ ॥
उक्थम् इन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे ।
शक्रो यथा सुतेषु णो रारणत् सख्येषु च ॥ ६ ॥
विभोष् ट इन्द्र राधसो विभ्वी रातिः शतक्रतो ।
अथा नो विश्वचर्षणे द्युम्नं सुदत्र मंहया ॥ ७ ॥
वयश् चित् ते पतत्रिणो द्विपाच् चतुष्पाद् अर्जुनि ।
उषः प्रारन्न् ऋतुं अनु दिवो अन्तेभ्यस् परि ॥ ८ ॥
अमी ये देवाः स्थन मध्ये ये रोचने दिवः ।
कद् व ऋतं कद् अमृतं का प्रत्ना व आहुतिः ॥ ९ ॥
ऋचं साम यजामहे याभ्यां कर्माणि कृण्वते ।
वि ते सदसि राजतो यज्ञं देवेषु वक्षतः ॥ १० ॥ ॥६॥ ॥३॥

१.३९

विश्वाः पृतना अभिभूतरं नरः सजूस् ततक्षुर् इन्द्रं
जजनुश् च राजसे ।
क्रत्वे वरे स्थेमन्य् आमुरीम् उतोग्रम् ओजिष्ठं तरसं तर-
स्विनम् ॥ १ ॥
श्रत् ते दधामि प्रथमाय मन्यवे अहन् यद् दस्युं नर्यं
विवेर् अपः ।
उभे यत्वा रोदसी धावताम् अनु भ्यसात् ते शुष्मात्

* विश्वासाहं (एवं कौ) * संहिष्ठं विश्वचर्षणिस् }
४.३९.६
कौ ...न * *
१.११.४

ऋ ८.६९.१ ...मन्दद्वी°

ऋग्वेदे नास्ति। कौ * * याव्...
कौ ...व्रतं * * निचाय्य
८.६८.४
[शशस्ते
६.२.४ ऋधद्यस्ते सुदानवे धिया मर्तः
* ष...
८.६९.८ नरः नास्ति
...पुरं न * *
१.१०.५

५.३८.१ उरोष्... [मंहय)
अधा * * द्युम्ना सुक्षत्र मंहय (कौ अपि
१.४९.३ ...द्विपच् चतुष्पद् *
[* *
१.१०५.५ ...त्रिष्वा (कौ मध्य आ)
* * * * अनृतं क * * आहुतिर्वित्तं मे
शौ ७.५४.१ ...कुर्वते [अस्य रोदसी
एते सदसि...यच्छतः

ऋ ८.९७.१० * * * नरं...

क्रत्वा वरिष्ठं वर आमुरिम्... तवसं * {
१०.१४७.१... वृत्रं

* यत् त्वा भवतो रोदसी अनु रेजते *

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	पृथिवी चिद् अद्रिवः ॥ २ ॥
शौ ७.२१.१ * विश्वे वचसा * दिव एको विभूर् * *	समेत विश्वा ओजसा पतिं दिवो य एक इद् भूर् अतिथिर् जनानाम् ।
* * * आविवासत् * वर्तनिर् * * एकमित् पुरु	स पूर्व्यो नूतनम् आजिगीषं तं वर्तनीर् अनु वावृत एक इत् ॥ ३ ॥
ऋ १.५७.४	इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
	नहि त्वद् अन्यो गिर्वणो गिरः सघत् क्षोणीर् इव
प्रति नो हर्य तद् *	प्रति तद् धर्य नो वचः ॥ ४ ॥
३.५१.१	चर्षणीधृतं मघवानम् उक्थ्यम् इन्द्रं गिरो बृहतीर् अभ्य् अनूषत ।
	वावृधानं पुरुहूतं सुवृक्तिभिर् अमर्त्यं जरमाणं दिवे-दिवे ॥ ५ ॥
१०.४३.१ * म * * स्वर्विदः ...	अच्छा व इन्द्रं मतयः स्वर्युवः सध्रीचीर् विश्वा उशतीर् अनूषत ।
* ष्वजन्ते ...	परि ष्वजन्त जनयो यथा पतिं मर्यं न शुन्ध्युं मघवानम् ऊतये ॥ ६ ॥
१.५१.१ * * * * ऋग्मियम् (एवं कौ) ...	अभि त्यं मेषं पुरुहूतम् ऋग्म्यम् इन्द्रं गीर्भिर् मदता वस्वो अर्णवम् ।
* * * * मानुषा ...	यस्य द्यावो न विचरन्ति मानुषं भुजे मंहिष्ठम् अभि विप्रम् अर्चत ॥ ७ ॥
१.५२.१ ...सुभ्वः *	त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभुवः साकम् ईरते ।
	अत्यं न वाजं हवनस्यदं रथम् एन्द्रं ववृत्याम् अवसे सुवृक्तिभिः ॥ ८ ॥
६.७०.१	घृतवती भुवनानाम् अभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
	द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥ ९ ॥
१०.१३४.१	उभे यद् इन्द्र रोदसी आपप्राथोषा इव ।
	महान्तं त्वा महीनां सम्राजं चर्षणीनाम् ।
	देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य् अजीजनत् ॥ १० ॥
१.१०१.१	प्र मन्दिने पितुमद् अर्चता वचो यः कृष्णगर्भा निरहन्न् ऋजिश्वना ।
...हवामहे	अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हुवेमहि ॥ ॥ ११ ॥ ॥१॥
	१.४०
ऋ १.८४.१० ...मध्वः * *	स्वादोर् इत्था विषूवतो मधोः पिबन्ति गौर्यः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

...शोभसे *	या इन्द्रेण सयावरीर् वृष्णा मदन्ति शोभथा वस्वीर्
	अनु स्वराज्यम् ॥ १ ॥
१.८०.१ ...मदे ब्रह्मा * *	इत्था हि सोम इन् मदो ब्रह्म चकार वर्धनम् ।
	शविष्ठ वज्रिन्न् ओजसा पृथिव्या निः शशा अहिम् अर्चन्न्
	अनु स्वराज्यम् ॥ २ ॥
१.८१.१	इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
* * * अजिषूतेम्...	तम् इन् महत्स्व् आजिषूतिम् अर्भे हवामहे स वाजेषु
	प्र नो ऽविषत् ॥ ३ ॥
१.८०.७	इन्द्र तुभ्यम् इद् अद्रिवो ऽनुत्तं वज्रिन् वीर्यम् ।
* * * * * तमु त्वं मायया वधीर्...	यद् ध त्यं मायिनं मृगं तव त्यन् माययावधीर् अर्चन्न्
	अनु स्वराज्यम् ॥ ४ ॥
१.८०.३	प्रेह्य् अभीहि धृष्णुहि न ते वज्रो नि यंसते ।
	इन्द्र नृम्णं हि ते शवो हनो वृत्रं जया अपो ऽर्चन्न्
	अनु स्वराज्यम् ॥ ५ ॥
१.८१.३ ...धना	यद् उदीरत आजयो धृष्णवे धीयते धनम् ।
युक्ष्वा...	युङ्क्ष्वा मदच्युता हरी कं हनः कं वसौ दधो ऽस्मं इन्द्र
	वसौ दधः ॥ ६ ॥
१.८२.२...	अक्षन्न् अमीमदन्त ह्य् अव प्रिया अधूषत ।
	अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्व् इन्द्र
	ते हरी ॥ ७ ॥
१.८२.१	उपो षु श्रृणुही गिरो मघवन् मातथा इव ।
यदा * * * आद्...	कदा नः सूनृतावतः कर इद् अर्थयास इद् योजा न्व् इन्द्र
	ते हरी ॥ ८ ॥
१.१०५.१	चन्द्रमा अप्स्व् अन्तर् आ सुपर्णो धावते दिवि ।
	न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे
	अस्य रोदसी ॥ ९ ॥
५.७५.१	प्रति प्रियतमं रथं वृषणं वसुवाहनम् ।
* * * * स्तोमन प्रति भूषति	स्तोता वाम् अश्विनाव् ऋषिः स्तोमेभिर् भूषति प्रति
	माध्वी मम श्रुतं हवम् ॥ १० ॥ ॥२॥
	१.४१
ऋ ५.६.४	आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
	यद् ध स्या ते पनीयसी समिद् दीदयति द्यवीषं स्तोतृभ्य
	आ भर ॥ १ ॥
१०.२१.१	आग्निं न स्ववृक्तिभिर् होतारं त्वा वृणीमहे ।
यज्ञाय स्तीर्णबर्हिषे वि वो मदे {	शीरं पावकशोचिषं वि वो मदे यज्ञेषु स्तीर्णबर्हिषं
शीरं पावकशोचिषं विवक्षसे {	विवक्षसे ॥ २ ॥

Funding by IKS-MoE

BVBSSMV AWSSBAB
CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५.७९.१	महे नो अद्य बोधयोषो राये दिवित्मती । यथा चिन् नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥ ३ ॥
१०.२५.१ [* * अधा * * अन्धसो (एवं कौ)...रणन्	भद्रं नो अपि वातय मनो दक्षम् उत क्रतुम् । अथा ते सख्ये अन्धसा वि वो मदे रणा गावो न यवसे विवक्षसे ॥ ४ ॥
१.८१.४ * * अनुष्वधं (एवं कौ) * * वावृधे *	क्रत्वा महं अनुष्वधो भीम आ वावृते शवः । श्रिय ऋष्व उपाकयोर् नि शिप्री हरिवान् दधे हस्तयोर् वज्रम् आयसम् ॥ ५ ॥
१.८२.४	स घा तं वृषणं रथम् अधि तिष्ठाति गोविदम् । यः पात्रं हारियोजनं पूर्णम् इन्द्र चिकेतति योजा न्व् इन्द्र ते हरी ॥ ६ ॥
५.६.१	अग्निं तं मन्ये यो वसुर् अस्तं यं यन्ति धेनवः । अस्तम् अर्वन्त आशवो ऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ॥ ७ ॥
१०.१२६.१ कौ ...नयति * *	न तम् अंहो न दुरितं देवासो अष्ट मर्त्यम् । सजोषसो यम् अर्यमा मित्रो नयन्ति वरुणो अति द्विषः ॥ ८ ॥ ॥३॥

१.४२

ऋ ९.१०९.१	परि प्र धन्वेन्द्राय सोम स्वादुर् मित्राय पूष्णे भगाय ॥१॥
९.११०.१ ...ईयसे	पर्यू ऊ षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः । द्विषस् तरध्या ऋणया न ईरसे ॥ २ ॥
९.१०९.४	पवस्व सोम महान् समुद्रः पिता देवानां विश्वाभि धाम ॥ ३ ॥
९.१०९.१० * * क्त्वे...	पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय ॥ ४ ॥
९.१०९.१३	इन्दुः पविष्ट चारुर् मदायापाम् उपस्थे कविर् भगाय ॥ ५ ॥
९.११०.२	अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये । वाजं अभि पवमान प्र गाहसे ॥ ६ ॥
७.५६.१ ...अधा (कौ अथा)	क ईं व्यक्ता नरः सनीडा रुद्रस्य मर्या यथा स्वश्वाः ॥ ७ ॥
४.१०.१	अग्ने तम् अद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम् । ऋध्यामा त ओहैः ॥ ८ ॥
ऋग्वेदे नास्ति कौ सवम् कौ स्वर्गाँ ...	आविर् मर्या आ वाजं वाजिनो ग्मं देवस्य सवितुः सवे । स्वर्गा अर्वन्तो जयत ॥ ९ ॥
ऋ ९.१०९.७ * * * * महाम् (कौ महाँ) अवीनाम् * *	पवस्व सोम द्युम्नी सुधारो महीनाम् अनु पूर्व्यः ॥ १० ॥ ॥४॥

Funding by IKS-MoE
AWSSBAB BVBSSMV

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१.४३

इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम् ।
विदे वृधस्य दक्षस्य महं हि षः ॥ १ ॥
तम् व् अभि प्र गायत पुरुहूतं पुरुष्टुतम् ।
इन्द्रं गीर्भिस् तविषम् आ विवासता ॥ २ ॥
तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम् ।
उ लोककृत्नुम् अद्रिवो हरिश्रियम् ॥ ३ ॥
यत् सोमम् इन्द्र विष्णवे यद् वा घ त्रित आप्त्ये ।
यद् वा मरुत्सु मन्दसे सम् इन्दुभिः ॥ ४ ॥
एद् उ मधोर् मदिन्तरं सिञ्चाध्वर्यो अन्धसा ।
एवा हि वीरः स्तवते सदावृधः ॥ ५ ॥
एन्दुम् इन्द्राय सिञ्चत पिबत सोम्यं मधु ।
प्र राधांसि चोदयता महित्वना ॥ ६ ॥
एतो न्व् इन्द्रं स्तवाम सखायः स्तोम्यं नरम् ।
कृष्टीर् यो विश्वा अभ्य् अस्त्य् एक इत् ॥ ७ ॥
इन्द्राय साम गायत विप्राय बृहते बृहत् ।
ब्रह्मकृते विपश्चिते पनस्यवे ॥ ८ ॥
य एक इद् विदयते वसु मर्ताय दाशुषे ।
ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥ ९ ॥
सखाय आ शिषामहे ब्रह्मेन्द्राय वज्रिणे ।
स्तुष ऊ षु वो नृतमाय धृष्णवे ॥ १० ॥ ॥५॥

१.४४

एन्द्र नो गधि प्रिय सत्राजिद् अगोह्य ।
गिरिर् न विश्वतः पृथुः पतिर् दिवः ॥ १ ॥
यस्य त्यच् छम्बरं मदे दिवोदासाय रन्धयन् ।
अयं स सोम इन्द्र ते सुतः पिबा ॥ २ ॥
गृणे तद् इन्द्र ते शव उपमां देवतातये ।
यद् धंसि वृत्रम् ओजसा शचीपते ॥ ३ ॥
य इन्द्र सोमपातमो मदः शविष्ठ चेतति ।
येना हंसि न्य् अत्रिणं तम् ईमहे ॥ ४ ॥
तुचे तुनाय तत् सु नो द्राघीय आयुर् जीवसे ।
आदित्यासः समहसः कृणोतन ॥ ५ ॥
वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम् ।
अहरहः शुन्ध्युः परिपदाम् इव ॥ ६ ॥
अपामीवाम् अप स्रिधम् अप सेधत दुर्मतिम् ।
आदित्यासो युयोतना नो अंहसः ॥ ७ ॥

८.१३.१ इन्द्रः ... पुनीत *
* * दक्षसो ...
८.१५.१
... विवासत (एवं कौ)
८.१५.४ ... पृत्सु *

८.१२.१६ * * * विष्णवि (एवं कौ) ...

८.२४.१६ * मध्वो * सिञ्च वा-
ध्वर्यो अन्धसः (कौ अपि अन्धसः)

८.२४.१३ ... पिबाति (एवं कौ) * *
* राधसा चोदयाते (कौ चोदयते) *
८.२४.१९

८.९८.१
धर्मकृते ...
१.८४.७

८.२४.१ * * शिषामहि ...

ऋ ८.९८.४ ... प्रियः * अगोह्यः (कौ [अगोह्य)

६.४३.१ ... रन्धयः
... पिब (एवं कौ)
८.६२.८ ... उपमं *
... शचीपते भद्रा इन्द्रस्य रातयः
८.१२.१

८.१८.१८ * तनाय ...
* सुमहसः *
८.२४.२४

८.१८.१०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

७.२२.१	पिबा सोमम् इन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
	सोतुर् बाहुभ्यां सुयतो नार्वा ॥ ८ ॥ ॥६॥
	१.४५
क ८.२१.१३	अभ्रातृव्यो अना त्वम् अनापिर् इन्द्र जनुषा सनाद् असि ।
	युधेद् आपित्वम् इच्छसे ॥ १ ॥
८.२१.९	यो न इदमिदं पुरा प्र वस्य आनिनाय तम् उ वः स्तुषे ।
	सखाय इन्द्रम् ऊतये ॥ २ ॥
८.२०.१ …स्थाता *	आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थात समन्यवः ।
स्थिरा चिन्नमयिष्णवः । कौ दृढा…	दृढाश् चिद् यमयिष्णवः ॥ ३ ॥
८.२१.३ * याहीम इन्दवो…	आ याह्य् अयम् इन्दवे ऽश्वपते गोपत उर्वरापते ।
	सोमं सोमपते पिब ॥ ४ ॥
८.२१.११	त्वया ह स्विद् युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि ।
	संस्थे जनस्य गोमतः ॥ ५ ॥
८.२०.२१	गावश् चिद् घा समन्यवः सजात्येन मरुतः सबन्धवः ।
	रिहते ककुभो मिथः ॥ ६ ॥
८.९८.१० * * * भरँ…	त्वं न इन्द्रा भर ओजो नृम्णं शतक्रतो विचर्षणे ।
* * पृतनाषहम्	आ वीरं पृतनासहम् ॥ ७ ॥
८.९८.७ …कामान्महः ससृज्महे	अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे ।
* यन्त *	उदेव ग्मन्त उदभिः ॥ ८ ॥
८.२१.५ …गोश्रीते मधौ मदिरे	सीदन्तस् ते वयो यथा गोश्रीस्ते मधोर् मदिरे विवक्षणः ।
[विवक्षणे (एवं कौ)	अभि त्वाम् इन्द्र नोनुमः ॥ ९ ॥
८.२१.१	वयम् उ त्वाम् अपूर्व्य स्थूरं न कच् चिद् भरन्तो ऽवस्यवः ।
वाजे…	वज्रिं चित्रं हवामहे ॥ १० ॥ ॥७॥
	१.४६
ऋग्वेदे न स्तः	विश्वतोदावन् विश्वतो न आ भर यं त्वा शविष्ठम् ईमहे ॥ १ ॥
	एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे ॥ २ ॥
५.३१.४^{३.४}	ब्रह्माण इन्द्रं महयन्तो अर्कैर् अवर्धयन्न् अहये हन्तवा उ ॥ ३ ॥
५.३१.४^{१.२} * * * * तक्षन्…	अनवस् ते रथम् अश्वाय तक्षुस् त्वष्टा वज्रं पुरुहूत द्युमन्तम् ॥ ४ ॥
ऋग्वेदे न स्तः	शं पदं मघं रयीषिणे न कामम् अव्रतो हिनोति न स्पृशद् रयिम् ॥ ५ ॥
	सदा गावः शुचयो विश्वधायसः सदा देवा अरेपसः ॥ ६ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१०.१७२.१	आ याहि वनसा सह गावः सचन्त वर्तनिं यद् ऊधभिः ॥ ७ ॥
ऋग्वेदे न सन्ति	उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र ॥ ८ ॥ अर्चन्त्य् अर्कं मरुतः स्वर्का आ स्तोभति श्रुतो युवा स इन्द्रः ॥ ९ ॥ प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते ॥ १० ॥ ॥८॥
	१.४७
ऋ ८.५६.५$^{१.२}$ * * चिकितुर्हव्यवाट् स (कौ हव्यवाड् न) *	अचेत्य् अग्निश् चिकितिर् हव्यवाण् ण सुमद्रथः ॥ १ ॥
५.२४.१$^{१.२}$ ...भवा *	अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥ २ ॥
ऋग्वेदे न स्तः	भगो न चित्रो अग्निर् महोनां दधाति रत्नम् ॥ ३ ॥ विश्वस्य प्र स्तोभ पुरो वा सन् यदि वेह नूनम् ॥ ४ ॥
१०.१७२.४ * * स्वसुस्तमः...	उषा अप स्वसुष् टमः सं वर्तयति वर्तनिं सुजातता ॥ ५ ॥
१०.१५७.१* * * *सीषधामेन्द्रश्...	इमा नु कं भुवना सीषधेमेन्द्रश् च विश्वे च देवाः ॥ ६ ॥
ऋग्वेदे नास्ति । कौ ...कृणुही *	ऊर्जा मित्रो वरुणः पिन्वतेळाः पीवरीम् इषं कृणुहि न इन्द्र ॥ ७ ॥
ऋग्वेदे नास्ति	वि स्रुतयो यथा पथा इन्द्र त्वद् यन्तु रातयः ॥ ८ ॥
६.१७.१५	अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥ ९ ॥
ऋग्वेदे नास्ति	इन्द्रो विश्वस्य राजति ॥ १० ॥ ॥९॥
	१.४८
ऋ २.२२.१ ...तृपत् * ...यथावशत्	त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस् तृम्पत् सोमम् अपिबद् विष्णुना सुतं यथावशम् ।
...स एनं * [...इन्द्रम् * * सत्यमिन्द्रं सत्य इन्दुः । कौ	स ईं ममाद महि कर्म कर्तवे महाम् उरुं सैनं सश्चद् देवो देवं सत्य इन्दुः सत्यम् इन्द्रः ॥ १ ॥
ऋग्वेदे नास्ति । शौ ७.२२.१	अयं सहस्रमानवो दृशः कवीनां मतिर् ज्योतिर् विधर्म ।
शौ ७.२२.२	ब्रध्नः समीचीर् उषसः सम् ऐरयद् अरेपसः सचेतसः स्वसरे मन्युमन्तश् चिता गोः ॥ २ ॥
ऋ १.१३०.१ ...विदथानीव (एवं कौ) * अस्तं ...	एन्द्र याह्य् उप नः परावतो नायम् अच्छा विदथान् एव सत्पतिर् अस्ता राजेव सत्पतिः ।
* * वयं प्रयस्वन्तः सुते सचा * * *	हवामहे त्वा प्रयस्वन्तः सुतेष्व् आ पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये ॥ ३ ॥
८.९७.१३ अप्रतिष्कुतं (एवं कौ) शवांसि(भूरि	तम् इन्द्रं जोहवीमि मघवानम् उग्रं सत्रा दधानम् अप्रतिष्कुतं श्रवांसि भूरि ।
...ववर्तद् * * * [नास्ति)	मंहिष्ठो गीर्भिर् आ च यज्ञियो ववर्त राये नो विश्वा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	सुपथा कृणोतु वज्री ॥ ४ ॥
ऋग्वेदे नास्ति	अभि त्यं देवं सवितारम् ओण्योः कविक्रतुम् अर्चामि
	सत्यसवं रत्नधाम् अभि प्रियं मतिम् ।
	ऊर्ध्वा यस्यामतिर् भा अदिद्युतत् सवीमनि हिरण्यपाणिर्
	अमिमीत सुक्रतुः कृपा स्वः ॥ ५ ॥
२.२२.४	तव त्यन् नर्यं नृतो ऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम् ।
यद् ... । कौ...असु * *	यो देवस्य शवसा प्रारिणा असुं रिणन्न् अपः ।
भुवद् * * आदेवम् * विदाद् * *	भुवो विश्वम् अभ्य् अदेवम् ओजसा विदेद् ऊर्जं शतक्रतुर्
विदाद् *	विदेद् इषम् ॥ ६ ॥
१.१३९.१ ...तच् *	अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु त्यच् छर्धो
	दिव्यं वृणीमह इन्द्रवायू वृणीमहे ।
...विवस्वति * संदायि नव्यसी	यद् ध क्राणा विवस्वते नाभा संदाय नव्यसे ।
* * सू न उप यन्तु * * अच्छा...	अध प्र नूनम् उप यन्ति धीतयो देवं अच्छ न धीतयः
	॥ ७ ॥
५.८७.१	प्र वो महे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवया-
	मरुत् ।
	प्र शर्धाय प्रयज्यवे सुखादये तवसे भन्ददिष्टये धुनि-
	व्रताय शवसे ॥ ८ ॥
९.१११.१	अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति
स्वयुग्वभिः * * स्वयुग्वभिः	सयुग्वभिः सूरो न सयुग्वभिः ।
* सुतस्य ...	धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः ।
* * * परियात्य् ...	विश्वा यद् रूपा परियास्य् ऋक्वभिः सप्तास्येभिर्
	ऋक्वभिः ॥ ९ ॥
१.१२७.१ * * * * वसुं * सहसो	अग्निं होतारं मन्ये दास्वन्तं वसोः सूनुं सहसा जातवेदसं
[(एवं कौ) *	विप्रं न जातवेदसम् ।
	य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
* * अनु वष्टि शोचिषाजुह्वानस्य	घृतस्य विभ्राष्टिम् अनु शुक्रशोचिष आजुह्वानस्य
	सर्पिषः ॥ १० ॥ ॥१०॥ ॥४॥ ॥२॥

१.४९

ऋ ९.६१.१० * * * अन्धसो (एवं कौ)	उच्चा ते जातम् अन्धसा दिवि सद् भूम्य् आ ददे ।
[* षद् ...	उग्रं शर्म महि श्रवः ॥ १ ॥
९.१.१	स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ।
	इन्द्राय पातवे सुतः ॥ २ ॥
९.६५.१०	वृषा पवस्व धारया मरुत्वते च मत्सरः ।
	विश्वा दधान ओजसा ॥ ३ ॥
९.६१.१९	यस् ते मदो वरेण्यस् तेना पवस्वान्धसा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	देवावीर् अघशंसहा ॥ ४ ॥
९.३३.४.	तिस्रो वाच उद् ईरते गावो मिमन्ति धेनवः ।
	हरिर् एति कनिक्रदत् ॥ ५ ॥
९.६४.२२	इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः ।
ऋतस्य * *	अर्कस्य योनिम् आसदम् ॥ ६ ॥
९.६२.४	असाव्य् अंशुर् मदायाप्सु दक्षो गिरिष्ठाः ।
	श्येनो न योनिम् आसदत् ॥ ७ ॥
९.२५.१	पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।
	मरुद्भ्यो वायवे मदः ॥ ८ ॥
९.१८.१ * सुवानो...अक्षाः	परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् ।
	मदेषु सर्वधा असि ॥ ९ ॥
९.९.१	परि प्रिया दिवः कविर् वयांसि नप्त्योर् हितः ।
सुवानो * *	स्वानैर् याति कविक्रतुः ॥ १० ॥ ॥१॥

१.५०

ऋ ९.३२.१ ...मघोनः	प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् ।
	सुता विदथे अक्रमुः ॥ १ ॥
९.३३.१ * * * ऽपां * यन्त्य् *	प्र सोमासो विपश्चितो ऽपो नयन्त ऊर्मयः ।
...इव (एवं कौ)	वनानि महिषा इवा ॥ २ ॥
९.६१.२८	पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।
	विश्वा अप द्विषो जहि ॥ ३ ॥
९.६५.४[१.२]	वृषा ह्य् असि भानुना द्युमन्तं त्वा हवामहे ।
* स्वाध्यः	पवमान स्वर्दृशम् ॥ ४ ॥
९.६४.१० ...मती	इन्दुः पविष्ट चेतनः प्रियः कवीनां मतिः ।
	सृजद् अश्वं रथीर् इव ॥ ५ ॥
९.६४.४	असृक्षत प्र वाजिनो गव्या सोमासो अश्वया ।
	शुक्रासो वीरयाशवः ॥ ६ ॥
९.६३.२२	पवस्व देव आयुषग् इन्द्रं गच्छतु ते मदः ।
	वायुम् आ रोह धर्मणा ॥ ७ ॥
९.६१.१६	पवमानो अजीजनद् दिवश् चित्रं न तन्यतुम् ।
	ज्योतिर् वैश्वानरं बृहत् ॥ ८ ॥
९.१०.४ * सुवानास...	परि स्वानास इन्दवो मदाय बर्हणा गिरा ।
सुता * *	मधो अर्षन्ति धारया ॥ ९ ॥
९.१४.१	परि प्रासिष्यदत् कविः सिन्धोर् ऊर्माव् अधि श्रितः ।
कारं...	कारुं बिभ्रत् पुरुस्पृहम् ॥ १० ॥ ॥२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१.५१

ऋ　९.६१.१३[१.२]	उपो षु जातम् अप्तुरं गोभिर् भङ्गं परिष्कृतम् ।
	इन्दुं देवा अयासिषुः ॥ १ ॥
९.४०.१	पुनानो अक्रमीद् अभि विश्वा मृधो विचर्षणिः ।
	शुम्भन्ति विप्रं धीतिभिः ॥ २ ॥
९.६२.१९	आविशन् कलशं सुतो विश्वा अर्षन्न् अभि श्रियः ।
शूरौ न गोषु तिष्ठति	इन्दुर् इन्द्राय धीयते ॥ ३ ॥
९.३६.१	असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः ।
	कार्ष्मन् वाजी न्य् अक्रमीत् ॥ ४ ॥
९.४१.१ * ये…	प्र यद् गावो न भूर्णयस् त्वेषा अयासो अक्रमुः ।
	घ्नन्तः कृष्णाम् अप त्वचम् ॥ ५ ॥
९.६३.२४	अपघ्नन् पवसे मृधः क्रतुवित् सोम मत्सरः ।
	नुदस्वादेवयुं जनम् ॥ ६ ॥
९.६३.७	अया पवस्व धारया यया सूर्यम् अरोचयः ।
	हिन्वानो मानुषीर् अपः ॥ ७ ॥
९.६१.२२	स पवस्व य आविथेन्द्रं वृत्राय हन्तवे ।
	वव्रिवांसं महीर् अपः ॥ ८ ॥
९.६१.१ * वीती (एवं कौ) …	अया पीती परि स्रव यस् त इन्दो मदेष्व् आ ।
* * नव (एवं कौ)	अवाहन् नवतीर् नवा ॥ ९ ॥
९.५२.१ * द्युक्षः सनद्रयिर् …	परि द्युक्षं सनद् रयिं भरद् वाजं नो अन्धसा ।
सुवानो…	स्वानो अर्ष पवित्र आ ॥ १० ॥　॥३॥

१.५२

ऋ　९.२.६	अचिक्रदद् वृषा हरिर् महान् मित्रो न दर्शतः ।
* * रोचते	सं सूर्येण दिद्युते ॥ १ ॥
९.६५.२८	आ ते दक्षं मयोभुवं वह्निम् अद्या वृणीमहे ।
	पान्तम् आ पुरुस्पृहम् ॥ २ ॥
९.५१.१ …सृज (कौ नय)	अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ नया ।
पुनीहीन्द्राय *	पुनाहीन्द्राय पातवे ॥ ३ ॥
९.५८.१	तरत् स मन्दी धावति धारा सुतस्यान्धसः ।
	तरत् स मन्दी धावति ॥ ४ ॥
९.६३.१	आ पवस्व सहस्रिणं रयिं सोम सुवीर्यम् ।
अस्मे (एवं कौ) * धारय (एवं कौ)	अस्मै श्रवांसि धारया ॥ ५ ॥
९.२३.२	अनु प्रत्नास आयवः पदं नवीयो अक्रमुः ।
	रुचे जनन्त सूर्यम् ॥ ६ ॥
९.६५.१९	अर्षा सोम द्युमत्तमो ऽभि द्रोणानि रोरुवत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

* श्येनो न योनिमा	सीदन् योनौ वनेष्व् आ ॥ ७ ॥
९.६४.१	वृषा सोम द्युमं असि वृषा देव वृषव्रतः ।
...दधिषे	वृषा धर्माणि दध्रिषे ॥ ८ ॥
९.६४.१३	इषे पवस्व धारया मृज्यमानो मनीषिभिः ।
	इन्दो रुचाभि गा इहि ॥ ९ ॥
९.६.१	मन्द्रया सोम धारया वृषा पवस्व देवयुः ।
अव्यो वारेष्व् *	अव्या वारेभिर् अस्मयुः ॥ १० ॥
९.४७.१ * सोमः * महश्चिदभ्यव-	अया सोम सुकृत्यया महान् सन्न् अभ्य् अवर्धथाः ।
* उद् वृषायते [र्धत	मन्दान इद् वृषायसे ॥ ११ ॥
९.६२.१०	अयं विचर्षणिर् हितः पवमानः स चेतति ।
	हिन्वान आप्यं बृहत् ॥ १२ ॥
९.४४.१ * ण * * तन * * * *	प्र न इन्दो महे तु न ऊर्मिं न बिभ्रद् अर्षसि ।
	अभि देवं अयास्यः ॥ १३ ॥
९.६१.२५	अपघ्नन् पवते मृधो ऽप सोमो अराव्णः ।
	गच्छन्न् इन्द्रस्य निष्कृतम् ॥ १४ ॥ ॥४॥

१.५३

ऋ ९.१०७.४	पुनानः सोम धारयापो वसानो अर्षसि ।
...देव	आ रत्नधा योनिम् ऋतस्य सीदस्य् उत्सो देवो हिरण्ययः ॥ १ ॥
१ परीतः...	परीतो षिञ्चता सुतं सोमो य उत्तमं हविः ।
	दधन्वान् यो नर्यो अप्स्व् अन्तर् आ सुषाव सोमम् अद्रिभिः ॥ २ ॥
१० * * सुवानो ...	आ सोम स्वानो अद्रिभिस् तिरो वाराण्य् अव्यया ।
...दधिषे	जनो न पुरि चम्वोर् विशद् धरिः सदो वनेषु दध्रिषे ॥३॥
१२	प्र सोम देववीतये सिन्धुर् न पिप्ये अर्णसा ।
	अंशोः पयसा मदिरो न जागृविर् अच्छा कोशं मधुश्चुतम् ॥ ४ ॥
८ * * सुवाणः...	सोम उ ष्वाणः सोतृभिर् अधि ष्णुभिर् अवीनाम् ।
	अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥५॥
१९	तवाहं सोम रारण सख्य इन्दो दिवेदिवे ।
	पुरूणि बभ्रो नि चरन्ति माम् अव परिधींर् अति तं इहि ॥६॥
२१ * सुहस्त्य...	मृज्यमानः सुहस्त्या समुद्रे वाचम् इन्वसि ।
	रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्य् अर्षसि ॥ ७ ॥
१४	अभि सोमास आयवः पवन्ते मद्यं मदम् ।
* विष्टपि * * स्वर्विदः	समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥८॥

Funding by IKS-MoE

६… अव्यो वारे * *	पुनानः सोम जागृविर् अव्या वारैः परि प्रियः ।
* * * ऽङ्गिरस्तमो … । कौ…णः	त्वं विप्रो अभवो ऽङ्गिरस्तम मध्वा यज्ञं मिमिक्ष नः ॥ ९ ॥
२५	पवमाना असृक्षत पवित्रम् अति धारया ।
	मरुत्वन्तो मत्सरा इन्द्रिया हया मेधाम् अभि प्रयांसि च ॥ १० ॥
२३ * वाजसातये * * काव्या	पवस्व वाजसातमो ऽभि विश्वानि वार्या ।
* समुद्रं प्रथमो वि धारयो * * * ।	त्वं समुद्रः प्रथमे विधर्मन् देवेभ्यः सोम मत्सरः ॥ ११ ॥
१७ [कौ * * * विधर्मं …	इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।
	सहस्रधारो अत्य् अव्यम् अर्षति तम् ईं मृजन्त्य् आयवः ॥ १२ ॥ ॥५॥
	१.५४
ऋ ९.८७.१	प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजम् अर्ष ।
	अश्वं न त्वा वाजिनं मर्जयन्तो अच्छा बर्ही रशनाभिर् नयन्ति ॥ १ ॥
९.९७.७	प्र काव्यम् उशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
	महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्य् एति रेभन् ॥ २ ॥
९.९७.३४	तिस्रो वाच ईरयति प्र वह्निर् ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
	गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥ ३ ॥
९.९७.१	अस्य प्रेषा हेमना पूयमानो देवो देवेभिः सम् अपृक्त रसम् ।
…पशुमान्ति *	सुतः पवित्रं पर्य् एति रेभन् मितेव सद्म पशुमन्ति होता ॥ ४ ॥
९.९७.४०। कौ * * * विधर्मं … राजा	अक्रान् समुद्रः प्रथमे विधर्मन् जनयन् प्रजा भुवनस्य गोपाः ।
सुवान इन्दुः	वृषा पवित्रे अधि सानो अव्ये बृहत् सोमो वावृधे स्वानो अद्रिः ॥ ५ ॥
९.९५.१	कनिक्रन्ति हरिर् आ सृज्यमानः सीदन् वनस्य जठरे पुनानः ।
…गा * मतीर् *	नृभिर् यतः कृणुते निर्णिजं गाम् अतो मतिं जनयत स्वधाभिः ॥ ६ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

९.८७.४ ...वृष्णे * *	एष स्य ते मधुमं इन्द्र सोमो वृषा वृष्णः परि पवित्रे अक्षाः ।
सहस्रसाः शतसा ...	सहस्रदाः शतदा भूरिदावा शश्वत्तमं बर्हिर् आ वाज्य् अस्थात् ॥ ७ ॥
९.९६.१३ ...साना	पवस्व सोम मधुमं ऋतावापो वसानो अधि सानो अव्ये ।
* * * सीद * * *	अव द्रोणानि घृतवन्ति रोह मदिन्तमो मत्सर इन्द्रपानः ॥ ८ ॥
९.९६.५	सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
	जनिताग्नेर जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ ९ ॥
९.९०.२ ...आङ्गूषाणाम् * *	अभि त्रिपृष्ठं वृषणं वयोधाम् अङ्गोषिणम् अवावशन्त वाणीः ।
...सिन्धून् * * *	वना वसानो वरुणो न सिन्धुर् वि रत्नधा दयते वार्याणि ॥ १० ॥ ॥६॥

१.५५

ऋ ९.९६.१	प्र सेनानीः शूरो अग्रे रथानां गव्यन्न् एति हर्षते अस्य सेना ।
	भद्रान् कृण्वन्न् इन्द्रहवान् सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥ १ ॥
९.९७.३१ ...वारान् * * * अव्यान्	प्र ते धारा मधुमतीर् असृग्रन् वारं यत् पूतो अत्येष्य् अव्यम् ।
...जज्ञानः * *	पवमान पवसे धाम गोनां जनयन् सूर्यम् अपिन्वो अर्कैः ॥ २ ॥
९.९७.४ ...हिनोत (एवं कौ) * धनाय (एवं कौ) }	प्र गायताभ्य् अर्चाम देवान् सोमं हिनोता महते धनाया ।
* पवाते ... सीदाति * देवयुर्नः	स्वादुः पवताम् अति वारम् अव्यम् आ सीदतु कलशं देव इन्दुः ॥ ३ ॥
९.९०.१ सनिष्यन्न्	प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिषन्न् अयासीत् ।
	इन्द्रं गच्छन्न् आयुधा संशिशानो विश्वा वसु हस्तयोर् आदधानः ॥ ४ ॥
९.९७.२२ ...ज्येष्ठस्य वा धर्मणि क्षोर्	तक्षद् यदी मनसो वेनतो वाग् ज्येष्ठस्य धर्मं द्युक्षोर् अनीके ।
	आद् ईम् आयन् वरम् आ वावशाना जुष्टं पतिं कलशे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	गाव इन्दुम् ॥ ५ ॥
९.९३.१	साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
	हरिः पर्य् अद्रवज् जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥ ६ ॥
९.९७.१०	इन्दुर् वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन् मदाय ।
* * * * अरातीर्...	हन्ति रक्षो बाधते पर्य् अरातिं वरिवः कृण्वन् वृजनस्य राजा ॥ ७ ॥
९.९४.१ ...सूर्ये	अधि यद् अस्मिन् वाजिनीव शुभः स्पर्धन्ते धियः सूरे न विशः ।
* * * कवीयन्...	अपो वृणानः पवते कवीयान् व्रजं न पशुवर्धनाय मन्म ॥ ८ ॥
९.९७.४१	महत् तत् सोमो महिषश् चकारापां यद् गर्भो ऽवृणीत देवान् ।
	अदधाद् इन्द्रे पवमान ओजो ऽजनयत् सूर्ये ज्योतिर् इन्दुः ॥ ९ ॥
९.९५.३	अपाम् इवेद् ऊर्मयस् तर्तुराणाः प्र मनीषा ईरते सोमम् अच्छ ।
	नमस्यन्तीर् उप च यन्ति सं चा च विशन्त्य् उशतीर् उशन्तम् ॥ १० ॥
९.९७.५२ ...धन्व (एवं कौ)	अया पवा पवस्वैना वसूनि मांश्चत्व इन्दो सरसि प्र धन्वा ।
* * अत्र * * जूतः पुरुमेधश्...	ब्रध्नश् चिद् यस्य वातो न जूतिं पुरुमेधाश् चित् तकवे
* दात्	नरं धात् ॥ ११ ॥
९.९१.१ ...प्रथमो मनीषी	असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमा मनीषा ।
...ऽजन्ति * सदनान्य्	दश स्वसारो अधि सानो अव्ये मृजन्ति वह्निं सदनेष्व् अच्छ ॥ १२ ॥ ॥७॥

१.५६

ऋ ९.१०१.१	पुरोजिती वो अन्धसः सुताय मादयित्नवे ।
	अप श्वानं श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥ १ ॥
९.१०१.७	अयं पूषा रयिर् भगः सोमः पुनानो अर्षति ।
	पतिर् विश्वस्य भूमनो व्य् अख्यद् रोदसी उभे ॥ २ ॥
९.९९.१ ...धनुस्तन्वन्ति *	आ हर्यताय धृष्णवे धनुष् टन्वन्ति पौंस्यम् ।
शुक्रां वयन्त्य् * निर्णिजं...	शुक्रा वि यन्त्य् असुराय निर्णिजे विपाम् अग्रे महीयुवः ॥ ३ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

९.९८.७	परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण ।
	यो देवान् विश्वं इत् परि मदेन सह गच्छति ॥ ४ ॥
९.१०१.४	सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
कौ * अक्षरं ...	पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ॥ ५ ॥
ऋ ९.१०१.१०	सोमाः पवन्त इन्दवो ऽस्मभ्यं गातुवित्तमाः ।
* सुवाना ...	मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः ॥ ६ ॥
९.९८.१ अभि ... पुरुस्पृहम्	अभी नो वाजसातमं रयिम् अर्ष शतस्पृहम् ।
... विभ्वासहम्	इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ॥ ७ ॥
९.१००.१	अभी नवन्ते अद्रुहः प्रियम् इन्द्रस्य काम्यम् ।
	वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः ॥ ८ ॥
९.१०१.१३ * सुन्वानस्यान्धसो * }	प्र सुन्वानायान्धसो मर्तो न वष्ट तद् वचः ।
* वृत ... }	अप श्वानम् अराधसं हता मखं न भृगवः ॥ ९ ॥ ॥८॥

१.५७

ऋ ९.७५.१	अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
	आ सूर्यस्य बृहतो बृहन्न् अधि रथं विष्वञ्चम् अरुहद् विचक्षणः ॥ १ ॥
९.७९.१ ... सुवानासो * दिवेषु	अचोदसो नो धन्वन्त्व् इन्दवः प्र स्वानासो बृहद् देवेषु हरयः ।
* च नशन्न इषो * * नशन्त सनिषन्त	वि चिद् अश्नाना इषयो अरातयो ऽर्यो नः सन्तु सनिषन्तु नो धियः ॥ २ ॥
९.७७.१	एष प्र कोशे मधुमं अचिक्रदद् इन्द्रस्य वज्रो वपुषो वपुष्टमः ।
वपुष्टरः	
... पयसेव धेनवः। कौ अभ्यृ३तस्य ... {	अभीम् ऋतस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसा च धेनवः ॥ ३ ॥
९.८६.१६	प्रो अयासीद् इन्दुर् इन्द्रस्य निष्कृतं सखा सख्युर् न प्र मिनाति संगिरम् ।
... शतयाम्ना	मर्य इव युवतिभिः सम् अर्षति सोमः कलशे शतयामना पथा ॥ ४ ॥
९.७६.१ * * * कृत्व्यो (एवं कौ) ...	धर्ता दिवः पवते कृत्वियो रसो दक्षो देवानाम् अनुमाद्यो नृभिः ।
	हरिः सृजानो अत्यो न सत्वभिर् वृथा पाजांसि
कृणुते * *	कृणुषे नदीष्व् आ ॥ ५ ॥
९.८६.१९ ... अह्नः प्रतरीतोषसो * {	वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्राणा * * अवीवशद् ...	प्राणा सिन्धूनां कलशां अचिक्रदद् इन्द्रस्य हार्द्य् आविशन्
	मनीषिभिः ॥ ६ ॥
९.८२.१	असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि
	गा अचिक्रदत् ।
* * पर्य् एत्य् ...	पुनानो वारम् अत्य् एष्य् अव्ययं श्येनो न योनिं घृत-
* आसदम्	वन्तम् आसदत् ॥ ७ ॥
९.६८.१	प्र देवम् अच्छा मधुमन्त इन्दवो ऽसिष्यदन्त गाव
	आ न धेनवः ।
	बर्हिषदो वचनावन्त ऊधभिः परिस्रुतम् उस्रिया नि-
	र्णिजं धिरे ॥ ८ ॥
९.७०.१ ...दुदुहे * *	त्रिर् अस्मै सप्त धेनवो दुदुह्रिरे सत्याम् आशिरं
पूर्व्ये *	परमे व्योमनि ।
	चत्वार्य् अन्या भुवनानि निर्णिजे चारूणि चक्रे यद्
	ऋतैर् अवर्धत ॥ ९ ॥
९.८५.१ ...स्रवापामीवा (एवं कौ) * *	इन्द्राय सोम सुषुतः परि स्रवा अपामीवा भवतु रक्षसा
	सह ।
	मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह
	सन्त्व् इन्दवः ॥ १० ॥
९.८६.४३ ...मधुनाभ्य् * {	अञ्जते व्य् अञ्जते सम् अञ्जते क्रतुं रिहन्ति मध्वा-
	भ्य् अञ्जते ।
	सिन्धोर् उच्छ्वासे पतयन्तम् उक्षणं हिरण्यपावाः पशुम्
आसु *	अप्सु गृभ्णते ॥ ११ ॥
९.८३.१	पवित्रं ते विततं ब्रह्मणस् पते प्रभुर् गात्राणि पर्य् एषि
	विश्वतः ।
	अतप्ततनूर् न तद् आमो अश्नुते श्रृतास इद् वहन्तः
तत्समाशत	सं तद् आशत ॥ १२ ॥ ॥९॥
	१.५८
ऋ ९.१०६.१	इन्द्रम् अच्छ सुता इमे वृषणं यन्तु हरयः ।
श्रुष्टी ...	श्रुष्टे जातास इन्दवः स्वर्विदः ॥ १ ॥
९.१०६.४	प्र धन्वा सोम जागृविर् इन्द्रायेन्दो परि स्रव ।
...भरा *	द्युमन्तं शुष्मम् आ भर स्वर्विदम् ॥ २ ॥
९.१०४.१	सखाय आ नि षीदत पुनानाय प्र गायत ।
	शिशुं न यज्ञैः परि भूषत श्रिये ॥ ३ ॥
९.१०५.१	तं वः सखायो मदाय पुनानम् अभि गायत ।
* * यज्ञैः ...	शिशुं न हव्यैः स्वदयन्त गूर्तिभिः ॥ ४ ॥
९.१०२.१ क्राणा ...	प्राणा शिशुर् महीनां हिन्वन्न् ऋतस्य दीधितिम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

...द्विता (एवं कौ)	विश्वा परि प्रिया भुवद् अध द्वितानि ॥ ५ ॥
९.१०६.७	पवस्व देववीतय इन्दो धाराभिर् ओजसा ।
	आ कलशं मधुमान् सोम नः सदः ॥ ६ ॥
९.१०६.१० * * ऊर्मिणाव्यो...	सोमः पुनान ऊर्मिणाव्यं वारं वि धावति ।
	अग्रे वाचः पवमानः कनिक्रदत् ॥ ७ ॥
९.१०३.१ ...उद्यतम्	प्र पुनानाय वेधसे सोमाय वच उच्यते ।
	भृतिं न भरा मतिभिर् जुजोषते ॥ ८ ॥
९.१०५.४ ...धन्व (कौ धनिव)	गोमन् न इन्दो अश्ववत् सुतः सुदक्ष धनिवः ।
* ते ...दीधरम्	शुचिं च वर्णम् अधि गोषु धारय ॥ ९ ॥
९.१०४.४	अस्मभ्यं त्वा वसुविदम् अभि वाणीर् अनूषत ।
	गोभिष् टे वर्णम् अभि वासयामसि ॥ १० ॥
९.१०६.१३	पवते हर्यतो हरिर् अति ह्वरांसि रंह्या ।
* अर्षन्...	अभ्य् अर्ष स्तोतृभ्यो वीरवद् यशः ॥ ११ ॥
९.१०३.३ * * * अव्यये वारे *	परि कोशं मधुश्चुतं सोमः पुनानो अर्षति ।
...सप्त *	अभि वाणीर् ऋषीणां सप्ता नूषत ॥ १२ ॥ ॥१०॥

१.५९

ऋ ९.१०८.१	पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
	महि द्युक्षतमो मदः ॥ १ ॥
९ ...देवयुः	अभि द्युम्नं बृहद् यश इषस् पते दिदीहि देव देवयुम् ।
	वि कोशं मध्यमं युव ॥ २ ॥
७	आ सोता परि षिञ्चताश्वं न स्तोमम् अप्तुरं रजस्तुरम् ।
वनऋक्षम् *	वनप्रक्षम् उदप्रुतम् ॥ ३ ॥
११ ...दिवो दुहः	एतम् उ त्यं मदच्युतं सहस्रधारं वृषभं दिवोदुहम् ।
	विश्वा वसूनि बिभ्रतम् ॥ ४ ॥
१३	स सुन्वे यो वसूनां यो रायाम् आनेता य इडानाम् ।
	सोमो यः सुक्षितीनाम् ॥ ५ ॥
३ * * * दैव्या...	त्वं ह्य् अङ्ग दैव्य पवमान जनिमानि द्युमत्तमः ।
* घोषयः (कौ घोषयन्)	अमृतत्वाय घोषयत् ॥ ६ ॥
५ * * * * ऽव्यो...	एष स्य धारया सुतो ऽव्या वारेभिः पवते मदिंतमः ।
...इव (एवं कौ)	क्रीळन्न् ऊर्मिर् अपाम् इवा ॥ ७ ॥
६ * * अप्या अन्तरश्मनो...	य उस्रिया अपि या अन्तर् अश्मनि निर् गा अकृन्तद् ओजसा ।
	अभि व्रजं तत्निषे गव्यम् अश्व्यं वर्मीव धृष्णव् आ रुज ॥ ८ ॥ ॥ ११ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	२.१
ऋ ७.२७.३ ...क्षमि विषुरूपं * अस्ति	इन्द्रो राजा जगतश् चर्षणीनाम् अधि क्षमा विश्वरूपं यद् अस्य ।
...उपस्तुतश् *	ततो ददाति दाशुषे वसूनि चोदद् राध उपस्तुतं चिद् अर्वाक् ॥ १ ॥
१.९१.१८	सं ते पयांसि सम् उ यन्तु वाजाः सं वृष्णियान्य् अभिमातिषाहः ।
	आप्यायमानो अमृताय सोम दिवि श्रवांस्य् उत्तमानि धिष्व ॥ २ ॥
१.९१.२२	त्वम् इमा ओषधीः सोम विश्वास् त्वम् अपो अजनयस् त्वं गाः ।
* आ ततन्थ ... ववर्थ (एवं कौ)	त्वम् आतनोर् उर्व् अन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्था ॥ ३ ॥
आ * * * यशो ...	मयि वर्चो अथो भगम् अथो यज्ञस्य यत् पयः ।
	परमेष्ठी प्रजापतिर् दिवि द्याम् इव दृंहतु ॥ ४ ॥
	इदं छन्दो जमदग्ने ऋतावृधो येन देवासो अमृतत्वम् आयन् ।
	तत्र द्यावापृथिवी धत्तम् अस्मान् यत्र देवानां गुह्यं निधाम ॥ ५ ॥
ऋ २.३५.३	सम् अन्या यन्त्य् उप यन्त्य् अन्याः समानम् ऊर्वं नद्यः पृणन्ति ।
तमू शुचिं (एवं कौ) * * * परि तस्थुर्	तमोशुचं शुचयो दीदिवांसम् अपां नपातम् उप यन्त्य् आपः ॥ ६ ॥
४.१.१६ * * * * धेनोस् * * मातुः परमाणि विन्दन् }	ते मन्वत प्रथमं नाम गोनां त्रिः सप्त परमं नाम जानन् ।
तज् * * * व्रा * भुवद् * * गोः	ता जानतीर् अभ्य् अनूषत क्षा आविर् भुवन्न् अरुणीर् यशसा गावः ॥ ७ ॥
	सहर्षभाः सहवत्सा उद् एत विश्वा रूपाणि बिभ्रतीर् द्व्यूध्नीः ।
	उरुः पृथुर् अयं वो अस्तु लोक इमा आपस् सुप्रपाणा इह स्त ॥ ८ ॥
	आरत् सुपर्णः पततुम् आश्वानम् आशितं करत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तीर्थानि सुप्रपाणानि सुगं गोषदनं करत् ॥ ९ ॥

ऋ १.१.१

अग्निम् ईळे पुरोहितं यज्ञस्य देवम् ऋत्विजम् ।
होतारं रत्नधातमम् ॥ १० ॥ ॥१॥

२.२

आ * * * सुभोजसौ ...

मन्ये वां द्यावापृथिवी सुभोजसा ये अप्रथेथाम् अमितम् अभि योजनम् ।
द्यावापृथिवी भवतं स्योने ते नो मुञ्चतम् अंहसः ॥ १ ॥

आ यशो * * यशो मेन्द्रबृहस्पती

यशसा मा द्यावापृथिवी भगेनेन्द्रबृहस्पती ।
यशो भगस्य विन्दतु यशो मा प्रति मुच्यताम् ।

आरण्यसंहितायां अहं भूयासम् उत्तमः इति न विद्यते

यशस्व्य् अस्याः संसदो ऽहं प्रवदिता स्याम् अहं भूयासम् उत्तमः ॥ २ ॥

आ ...नो वचो *

प्रक्षस्य वृष्णो अरुषस्य नू महः प्र नु वोचो विदथा जातवेदसे ।
वैश्वानराय मतिर् नव्यसे शुचिः सोम इव पवते चारुर् अग्नये ॥ ३ ॥

ऋ ६.५२.१४ * * * * यज्ञिया...

विश्वे देवा मम शृण्वन्तु यज्ञम् उभे रोदसी अपां नपाच् च मन्म ।
मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्व् इद् वो अन्तम् आ वदेम ॥ ४ ॥

ऋ ८.९२.२८

एवा ह्य् असि वीरयुर् एवा शूर उत स्थिरः ।
एवा ते राध्यं मनः ॥ ५ ॥

आ ...ईर्त्सति

आ प्रागाद् भद्रा युवतिर् अह्नः केतून् सम् ईर्त्सति ।

आ * * * * * रात्री (उग्रं * * इति नास्ति)

अभूद् भद्रा निवेशनी विश्वस्य जगतो रात्रिर् उग्रं वाजिन्य् अक्रमीत् ॥ ६ ॥

ऋ ३.२६.७

अग्निर् अस्मि जन्मना जातवेदा घृतं मे चक्षुर् अमृतं म आसन् ।

अर्कस्त्रिधातु * * ऽजसो घर्मो * * नाम

त्रिधातुर् अर्को रजसो विमानो अजस्रं ज्योतिर् हविर् अस्मि सर्वम् ॥ ७ ॥

ऋ ३.५.५ पाति प्रियं रिपो...

पात्य् अग्निर् विपो अग्रं पदं वेः पाति यह्वश् चरणं सूर्यस्य ।
पाति नाभा सप्तशीर्षाणम् अग्निः पाति देवानाम् उपमादम् ऋष्वः ॥ ८ ॥
भ्राजन्त्य् अग्ने समिधान दीदिवो जिह्वा चरत्य् अन्तर् आसनि ।
स त्वं नो अग्ने पयसा वसुविद् रयिं वर्चो दृशे दाः ॥ ९ ॥ ॥२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२.३

ऋ १.३२.१	इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री ।
	अहन्न् अहिम् अन्व् अपस् ततर्द प्र वक्षणा अभिनत्
	पर्वतानाम् ॥ १ ॥
१०.१७०.१	विभ्राड् बृहत् पिबतु सोम्यं मध्व् आयुर् दधद् यज्ञपताव्
	अविह्रुतम् ।
* * * * * पुपोष पुरुधा	वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा
	वि राजति ॥ २ ॥
ऋग्वेदे नास्ति	वसन्त इन् नु रन्त्यो ग्रीष्म इन् नु रन्त्यः ।
	वर्षाण्य् अनु शरदो हेमन्तः शिशिर इन् नु रन्त्यः ॥ ३ ॥
१.१८७.५	तव त्ये पितो ददतस् तव स्वादिष्ठ ते पितो ।
* स्वाद्मानो ...	प्र स्वाद्मानो रसानां तुविग्रीवा इवेरते ॥ ४ ॥
८.६१.१५	इन्द्रः स्फड् उत वृत्रहा परस्पा नो वरेण्यः ।
	स नो रक्षिषच्च् चरमं स मध्यमं स पश्चात् पातु
	नः पुरः ॥ ५ ॥
१०.९०.१	सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
* * विश्वतो ...	स भूमिं सर्वतो वृत्वात्य् अतिष्ठद् दशाङ्गुलम् ॥ ६ ॥
४	त्रिपाद् ऊर्ध्व उद् ऐत् पुरुषः पादो ऽस्येहाभवत् पुनः ।
ततः ... साशनानशने *	तथा विष्वङ् व्य् अक्रामद् अशनानशने अभि ॥ ७ ॥
२[१.२] * * * यद् भूतं * * भव्यं	पुरुष एवेदं सर्वं भव्यं यच्च् च भाव्यम् ।
३[३.४] * * विश्वा ...	पादो ऽस्य सर्वा भूतानि त्रिपाद् अस्यामृतं दिवि ॥ ८ ॥
३[१.२] एतावान् * * अतो ...	तावान् अस्य महिमा ततो ज्यायांश् च पूरुषः ।
२[३.४]	उतामृतत्वस्येशानो यद् अन्नेनातिरोहति ॥ ९ ॥
५ तस्माद् ...	ततो विराड् अजायत विराजो अधि पूरुषः ।
	स जातो अत्य् अरिच्यत पश्चाद् भूमिम् अथो पुरः
	॥ १० ॥ ॥ ३ ॥

२.४

ऋ १०.९०.६	यत् पुरुषेण हविषा देवा यज्ञम् अतन्वत ।
* अस्यासीद् ...	वसन्त एषाम् आसीद् आज्यं ग्रीष्म इध्मः शरद् धविः
	॥ १ ॥
१०.९०.१५	सप्तास्यासन् परिधयस् त्रिः सप्त समिधः कृताः ।
... पशुम्	देवा यद् यज्ञं तन्वाना अबध्नन् पुरुषं हविः ॥ २ ॥
आ ...हरितौ *	हरी त इन्द्र श्मश्रूण्य् उतो ते हरिता हरी ।
* * * कवयः ...	तं त्वा स्तुवन्ति कारवः पुरुषासो वनर्गवः ॥ ३ ॥
	ऋष्यास इन्द्र भुङ् इति मघवन्न् इन्द्र भुङ् इति ।
	इन्द्रस् त्रसरपूतः ॥ ४ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यद् वर्चो हिरण्यस्य यद् वा वर्चो गवाम् उत ।
सत्यस्य ब्रह्मणो वर्चस् तेन मा सं सृजामसि ॥ ५॥

ऋ १.११५.१
चित्रं देवानाम् उद् अगाद् अनीकं चक्षुर् मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस् तस्थुषश् च ॥ ६॥
यद् इतस् तन्वो मम दोषा रसस्य भेजिरे ।
नराशंसेन सोमेनाहं तत् पुनर् आ ददे ।
युष्मद् अप्सरसस् परि ॥ ७॥
यस्येदम् आ रजो युजस् तुजे जने वनं स्वः ।
इन्द्रस्य रन्त्यं बृहत् ॥ ८॥
सहस् तन् न इन्द्र दध्य् ओज ईशे ह्य् अस्य महतो विरप्शिन् ।
क्रतुं न नृम्णं स्थविरं च वाजं वृत्रेषु शत्रून् सुहना कृधी नः ॥ ९॥

ऋ ६.४६.५
येनेमे चित्र * * ओमे * प्राः
इन्द्र ज्येष्ठं न आ भर ओजिष्ठं पपुरि श्रवः ।
यद् दिधृक्षेम वज्रहस्त रोदसी उभे सुशिप्र आ प्राः ॥ १०॥
॥ ४ ॥

२.५

ऋ १.२४.१५
उद् उत्तमं वरुण पाशम् अस्मद् अवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते * * *
अथादित्य व्रते वयं तवानागसो अदितये स्याम ॥ १ ॥
९.९७.५८
त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ २॥
इमं वृषणं कृणुतैकम् इन् माम् ॥ ३॥
९.६१.१२
स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः ।
वरिवोवित् परि स्रव ॥ ४॥
९.६१.११
एना विश्वान्य् अर्य आ द्युम्नानि मानुषाणाम् ।
सिषासन्तो वनामहे ॥ ५॥
८.९३.१३
त्वम् एतद् अधारयः कृष्णासु रोहिणीषु च ।
परुष्णीषु रुशत् पयः ॥ ६॥
१०.१८१.१
प्रथश् च यस्य सप्रथश् च नामानुष्टुभस्य हविषो हविर् यत् ।
धातुर् द्युतानात् सवितुश् च विष्णो रथन्तरम् आ जभारा वसिष्ठः ॥ ७॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१.७.२ इन्द्र इद् धर्योः सचा संमिश्ल आ वचोयुजा ।
इन्द्रो वज्री हिरण्ययः ॥ ८ ॥
१.७.४ इन्द्र वाजेषु नो ऽव सहस्रप्रधनेषु च ।
उग्र उग्राभिर् ऊतिभिः ॥ ९ ॥
९.८३.३ ...बिभर्ति भुवनानि * { अरूरुचद् उषसः पृश्निर् अग्रिय उक्षा मिमेति भुव-
नेषु वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो
गर्भम् आ दधुः ॥ १० ॥ ॥५॥

२.६

ऋ ८.८९.५ ...वृत्रहत्याय (एवम् आ) यज् जायथा अपूर्व्य मघवन् वृत्रहथाय ।
...द्याम् (आ उतो दिवम्) तत् पृथिवीम् अप्रथयस् तद् अस्तभ्ना उत दिवम् ॥ १ ॥
९.६६.१९ अग्न आयूंषि पवस आ सुवोर्जम् इषं च नः ।
आरे बाधस्व दुच्छुनाम् ॥ २ ॥
१०.१८९.१ आयं गौः पृश्निर् अक्रमीद् असदन् मातरं पुनः ।
पितरं च प्रयन् स्वः ॥ ३ ॥
२ अन्तश् चरति रोचनास्य प्राणाद् अपानती ।
व्य् अख्यन् महिषो दिवम् ॥ ४ ॥
३ त्रिंशद् धाम वि राजति वाक् पतङ्गाय धीयते ।
प्रति वस्तोर् अह द्युभिः ॥ ५ ॥ ॥ ६ ॥

२.७

विदा मघवन् विदा गातुम् अनु शंसिषो दिशः ।
शिक्षा शचीनां पते पूर्वीणां पुरोवसो ॥
आभिष् ट्वम् अभिष्टिभिः । प्रचेतन प्रचेतया । इन्द्र द्युम्नाय
न इषे । एवा हि शक्रः । राये वाजाय वज्रिवः । शविष्ठ
वज्रिन्न् ऋञ्जसे । मंहिष्ठ वज्रिन्न् ऋञ्जसे । आ याहि
पिब मत्स्व ॥ १ ॥
विदा राये सुवीर्यं भुवो वाजानां पतिर् वशां अनु ।
मंहिष्ठ वज्रिन्न् ऋञ्जसे यः शविष्ठः शूराणाम् ।
यो मंहिष्ठो मघोनां चिकित्वो अभि नो नय ।
इन्द्रो विदे तम् उ स्तुहि ॥
ईशे हि शक्रस् तम् ऊतये हवामहे जेतारम् अपराजितम् ।
स नः पर्षद् अति द्विषः क्रतुश् छन्द ऋतं बृहत् ॥ २ ॥
इन्द्रं धनस्य सातये हवामहे जेतारम् अपराजितम् ।
स नः पर्षद् अति द्विषः स नः पर्षद् अति द्विषः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पूर्वस्य यत् ते अद्रिवः ॥
सुम्न आ धेहि नो वसो पूर्तिः शविष्ठ शस्यते ।
वशी हि शक्रो नूनं तन् नव्यं सन्यसे ॥
प्रभुर् जनस्य वृत्रहन् सम् अर्येषु स्तवामहे ।
शूरो यो गोषु गच्छति सखा सुशेवो अद्वयुः ॥ ३ ॥
एवा ह्य् एवा । एवा ह्य् अग्ने । एवा हीन्द्रा ।
एवा हि पूषन् । एवा हि देवाः ॥ ४ ॥ ॥७॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

11846

	३.१
	नमः पितृभ्यः पूर्वसद्भ्यो नमः साकंनिषद्भ्यः ।
	युञ्जे वाचं शतपदीं गये सहस्रवर्तनि ॥ १ ॥
	गायत्रं त्रैष्टुभं जगद् विश्वा रूपाणि संभृतम् ।
	देवा ओकांसि चक्रिरे ॥ २ ॥
ऋ ९.११.१	उपास्मै गायता नरः पवमानायेन्दवे ।
	अभि देवं इयक्षते ॥ ३ ॥
२	अभि ते मधुना पयो ऽथर्वाणो अशिश्रयुः ।
* * देवयु (एवं कौ)	देवं देवाय देवयुम् ॥ ४ ॥
३	स नः पवस्व शं गवे शं जनाय शम् अर्वते ।
	शं राजन्न् ओषधीभ्यः ॥ ५ ॥
९.६४.२८	दविद्युतत्या रुचा परिष्टोभन्त्या कृपा ।
	सोमाः शुक्रा गवाशिरः ॥ ६ ॥
२९	हिन्वानो हेतृभिर् हित आ वाजं वाज्य् अक्रमीत् ।
	सीदन्तो वनुषो यथा ॥ ७ ॥
३० ... दिवः कविः	ऋधक् सोम स्वस्तये संजग्मानो दिवा कवे ।
	पवस्व सूर्यो दृशे ॥ ८ ॥
९.६६.१०	पवमानस्य ते कवे वाजिन् सर्गा असृक्षत ।
	अर्वन्तो न श्रवस्यवः ॥ ९ ॥
११	अच्छा कोशं मधुश्चुतम् असृग्रं वारे अव्यये ।
* धीतयः (एवं कौ)	अवावशन्त धीतये ॥ १० ॥
१२	अच्छा समुद्रम् इन्दवो ऽस्तं गावो न धेनवः ।
	अग्मन्न् ऋतस्य योनिम् आ ॥ ११ ॥ ॥१॥
	३.२
ऋ ६.१६.१०	अग्न आ याहि वीतये गृणानो हव्यदातये ।
	नि होता सत्सि बर्हिषि ॥ १ ॥
११	तं त्वा समिद्भिर् अङ्गिरो घृतेन वर्धयामसि ।
	बृहच् छोचा यविष्ठ्य ॥ २ ॥
१२	स नः पृथु श्रवाय्यम् अच्छा देव विवाससि ।
	बृहद् अग्ने सुवीर्यम् ॥ ३ ॥
३.६२.१६	आ नो मित्रावरुणा घृतैर् गव्यूतिम् उक्षतम् ।
	मध्वा रजांसि सुक्रतू ॥ ४ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३.६२.१७	उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः ।
	द्राघिष्ठाभिः शुचिव्रता ॥ ५ ॥
१८	गृणाना जमदग्निना योनाव् ऋतस्य सीदतम् ।
	पातं सोमम् ऋतावृधा ॥ ६ ॥
८.१७.१	आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् ।
	एदं बर्हिः सदो मम ॥ ७ ॥
२	आ त्वा ब्रह्मयुजा हरी वहताम् इन्द्र केशिना ।
	उप ब्रह्माणि नः शृणु ॥ ८ ॥
३ * त्वा वयं युजा ...	ब्रह्माणस् त्वा युजा वयं सोमपाम् इन्द्र सोमिनः ।
	सुतावन्तो हवामहे ॥ ९ ॥
३.१२.१	इन्द्राग्नी आ गतं सुतं गीर्भिर् नभो वरेण्यम् ।
	अस्य पातं धियेषिता ॥ १० ॥
२	इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः ।
	अया पातम् इमं सुतम् ॥ ११ ॥
३	इन्द्रम् अग्निं कविच्छदा यज्ञस्य जूत्या वृणे ।
	ता सोमस्येह तृम्पताम् ॥ १२ ॥ ॥२॥

३.३

ऋ ९.६१.१० * * * अन्धसो (एवं कौ)	उच्चा ते जातम् अन्धसा दिवि सद् भूम्य् आ ददे ।
[* * भूमिर् * *	उग्रं शर्म महि श्रवः ॥ १ ॥
१२	स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः ।
* * स्रव (एवं कौ)	वरिवोवित् परि स्रवा ॥ २ ॥
११ * विश्वान्य् (एवं कौ) ...	एना विश्वन्न् अर्य आ द्युम्नानि मानुषाणाम् ।
	सिषासन्तो वनामहे ॥ ३ ॥
९.१०७.४	पुनानः सोम धारयापो वसानो अर्षसि ।
...देव	आ रत्नधा योनिम् ऋतस्य सीदस्य् उत्सो देवो हिरण्ययः ॥ ४ ॥
५	दुहान ऊधर् दिव्यं मधु प्रियं प्रत्नं सधस्थम् आसदत् ।
...अर्षति * धूतो *	आ पृच्छ्यं धरुणं वाज्य् अर्षसि नृभिर् धौतो विचक्षणः ॥ ५ ॥
९.८७.१	प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजम् अर्ष ।
	अश्वं न त्वा वाजिनं मर्जयन्तो ऽच्छा बर्ही रशनाभिर् नयन्ति ॥ ६ ॥
२ ...वृजनं *	स्वायुधः पवते देव इन्दुर् अशस्तिहा वृजना रक्षमाणः ।
	पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः ॥ ७ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३ ऋषिर् विप्रः पुरएता जनानाम् ऋभुर् धीर उशना काव्येन ।
स चिद् विवेद निहितं यद् आसाम् अपीच्यं गुह्यं नाम
गोनाम् ॥ ८ ॥ ॥ ३ ॥

३.४

ऋ ७.३२.२२ अभि त्वा शूर नोनुमो ऽदुग्धा इव धेनवः ।
ईशानम् अस्य जगतः स्वर्दृशम् ईशानम् इन्द्र त-
स्थुषः ॥ १ ॥
२३ न त्वावां अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्न् इन्द्र वाजिनो गव्यन्तस् त्वा हवा-
महे ॥ २ ॥
४.३१.१ कया नश् चित्र आ भुवद् ऊती सदावृधः सखा ।
कया शचिष्ठया वृता ॥ ३ ॥
२ कस् त्वा सत्यो मदानां मंहिष्ठो मत्सद् अन्धसः ।
दृढा चिद् आरुजे वसु ॥ ४ ॥
३ अभी षु णः सखीनाम् अविता जरितॄणाम् ।
* * ऊतिभिः शतं भवास्य् ऊतये ॥ ५ ॥
८.८८.१ तं वो दस्मम् ऋतीषहं वसोर् मन्दानम् अन्धसः ।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर् नवामहे ॥ ६ ॥
२ द्युक्षं सुदानुं तविषीभिर् आवृतं गिरिं न पुरुभोजसम् ।
क्षुमन्तं वाजं शतिनं सहस्रिणं मक्षू गोमन्तम् ईमहे ॥ ७ ॥
८.६६.१ तरोभिर् वो विदद्वसुम् इन्द्रं सबाध ऊतये ।
बृहद् गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ ८ ॥
२ ...मदे सुशिप्रम् * न यं दुध्रा वरन्ते न स्थिरा मुरो मदेषु शिप्रम् अन्धसः ।
य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम्
॥ ९ ॥ ॥ ४ ॥

३.५

ऋ ९.१.१ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ।
इन्द्राय पातवे सुतः ॥ १ ॥
२ ...अयोहतम् रक्षोहा विश्वचर्षणिर् अभि योनिम् अयोहते ।
द्रुणा * * द्रोणे सधस्थम् आसदत् ॥ २ ॥
३ * भव... वरिवोधातमो भुवो मंहिष्ठो वृत्रहन्तमः ।
पर्षि राधो मघोनाम् ॥ ३ ॥
९.१०६.१४ (द्वितीयतृतीयपादयोर् विपर्यासः) अया पवस्व देवयू रेभन् पवित्रं पर्य् एषि विश्वतः ।
मधोर् धारा असृक्षत ॥ ४ ॥
१३ पवते हर्यतो हरिर् अति ह्वरांसि रंह्या ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	अभ्यर्षन् स्तोतृभ्यो वीरवद् यशः ॥ ५ ॥
९.१०१.१	पुरोजिती वो अन्धसः सुताय मादयित्नवे ।
	अप श्वानं श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥ ६ ॥
२	यो धारया पावकया परिप्रस्यन्दते सुतः ।
	इन्दुर् अश्वो न कृत्वियः ॥ ७ ॥
३	तं दुरोषम् अभी नरः सोमं विश्वाच्या धिया ।
यशं हिन्वन्त्यद्रिभिः	यज्ञाय सन्त्व् अद्रयः ॥ ८ ॥
९.७५.१	अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
	आ सूर्यस्य बृहतो बृहन्न् अधि रथं विष्वञ्चम् अरुहद् विचक्षणः ॥ ९ ॥
२	ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर् धियो अस्या अदाभ्यः ।
...रोचने	दधाति पुत्रः पित्रोर् अपीच्यं नाम तृतीयम् अधि रोचनं दिवः ॥ १० ॥
३ ...येमानः *	अव द्युतानः कलशं अचिक्रदन् नृभिर् यमाणः कोश आ हिरण्यये ।
अभीम्... राजति	अभी ऋतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि राजसि ॥ ११ ॥
६.४८.१	यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।
...शंसिषम् (एवं कौ)	प्रप्र वयम् अमृतं जातवेदसं प्रियं मित्रं न शंसिषः ॥ १२ ॥
२	ऊर्जो नपातं स हिनायम् अस्मयुर् दाशेम हव्यदातये ।
	भुवद् वाजेष्व् अविता भुवद् वृध उत त्राता तनूनाम् ॥ १३ ॥ ॥५॥

३.६

क ९.१६.१६	एह्य् ऊ षु ब्रवाणि ते अग्न इत्थतरा गिरः ।
	एभिर् वर्धास इन्दुभिः ॥ १ ॥
१७	यत्र क्व च ते मनो दक्षं दधस उत्तरम् ।
तत्रासदः *	तत्र योनिं कृणवसे ॥ २ ॥
१८...वसो	नहि ते पूर्तम् अक्षिपद् भुवन् नेमानां पते ।
	अथा दुवो वनवसे ॥ ३ ॥
८.२१.१	वयम् उ त्वाम् अपूर्व्य स्थूरं न कच्च् चिद् भरन्तो ऽवस्यवः ।
वाजे * *	वज्रिं चित्रं हवामहे ॥ ४ ॥
	उप त्वा कर्मन्न् ऊतये स नो युवोग्रश् चक्राम यो धृषत् ।
	त्वाम् इद् ध्य् अवितारं ववृमहे सखाय इन्द्र

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	सानसिम् ॥ ५ ॥
८.९८.७ अधा (एवं कौ)...कामान्	अथा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे ।
* * यन्त * [महः ससृज्महे	उद् एव ग्मन्त उदभिः ॥ ६ ॥
८	वार् ण त्वा यव्याभिर् वर्धन्ति शूर ब्रह्माणि ।
	वावृध्वांसं चिद् अद्रिवो दिवेदिवे ॥ ७ ॥
९ ...उरुयुगे (वचोयुजा इति नास्ति) ।	युञ्जन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे वचोयुजा ।
इन्द्रवाहा वचोयुजा ॥	इन्द्रवाहा स्वर्विदा ॥ ८ ॥
	इन्द्र जुषस्व प्र वहा याहि शूर हरिह ।
	पिबा सुतस्य मतिर् न मधोश् चकानश् चारुर् मदाय ॥ ९ ॥
ऋग्वेदे न सन्ति	इन्द्र जठरं नव्यं न पृणस्व मधोर् दिवो न ।
	अस्य सुतस्य स्वर् णोप त्वा मदाः सुवाचो अस्थुः ॥ १० ॥
	इन्द्रस् तुराषाण् मित्रो न जघान वृत्रं यतिर् न ।
	बिभेद वलं भृगुर् न ससाहे शत्रून् मदे सोमस्य ॥ ११ ॥
	॥ ६ ॥

३.७

ऋ ८.९२.१	पान्तम् आ वो अन्धस इन्द्रम् अभि प्र गायत ।
	विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् ॥ १ ॥
२	पुरुहूतं पुरुष्टुतं गाथान्या सनश्रुतम् ।
	इन्द्र इति ब्रवीतन ॥ २ ॥
३ * * * महानां...	इन्द्र इन् नो महानां दाता वाजानां नृतुः ।
महाँ अभिज्ञ्व् आ (एवं कौ) *	महं अभिज्ञुवा यमत् ॥ ३ ॥
७.३१.१	प्र व इन्द्राय मादनं हर्यश्वाय गायत ।
	सखायः सोमपाव्ने ॥ ४ ॥
२	शंसेद् उक्थं सुदानव उत द्युक्षं यथा नरः ।
	चकृमा सत्यराधसे ॥ ५ ॥
३	त्वं न इन्द्र वाजयुस् त्वं गव्युः शतक्रतो ।
	त्वं हिरण्ययुर् वसो ॥ ६ ॥
८.२.१६	वयम् उ त्वा तदिदर्था इन्द्र त्वायन्तः सखायः ।
	कण्वा उक्थेभिर् जरन्ते ॥ ७ ॥
१७	न घेम् अन्यद् आ पपन वज्रिन्न् अपसो नविष्टौ ।
...स्तोमं *	तवेद् उ स्तोमैश् चिकेत ॥ ८ ॥
१८	इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति ।
	यन्ति प्रमादम् अतन्द्राः ॥ ९ ॥
८.९२.१९	इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः ।
	अर्कम् अर्चन्तु कारवः ॥ १० ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२०	यस्मिन् विश्वा अधि श्रियो रणन्ति सप्त संसदः ।
	इन्द्रं सुते हवामहे ॥ ११ ॥
२१	त्रिकद्रुकेषु चेतनं देवासो यज्ञम् अत्नत ।
	तम् इद् वर्धन्तु नो गिरः ॥ १२ ॥ ॥७॥
	३.८
ऋ ८.१७.११	अयं त इन्द्र सोमो निपूतो अधि बर्हिषि ।
...पिब (एवं कौ)	एहीम् अस्य द्रवा पिबा ॥ १ ॥
१२	शाचिगो शाचिपूजनायं रणाय ते सुतः ।
	आखण्डल प्र हूयसे ॥ २ ॥
१३ * * * नपात्...	यस् ते शृङ्गवृषो णपात् प्रणपात् कुण्डपाय्यः ।
	न्य् अस्मिन् दध्र आ मनः ॥ ३ ॥
८.८१.१	आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय ।
	महाहस्ती दक्षिणेन ॥ ४ ॥
२	विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् ।
	तुविमात्रम् अवोभिः ॥ ५ ॥
३	नहि त्वा शूर देवा न मर्तासो दित्सन्तम् ।
	भीमं न गां वारयन्ते ॥ ६ ॥
८.४५.२२	अभि त्वा वृषभा सुते सुतं सृजामि पीतये ।
	तृम्पा व्य् अश्नुही मदम् ॥ ७ ॥
२३	मा त्वा मूरा अविष्यवो मोपहस्वान आ दभन् ।
* ब्रह्मद्विषो *	माकीं ब्रह्मद्विषं वनः ॥ ८ ॥
२४ * * गोपरीणसा...	इह त्वा गोपरीणसं महे मन्दन्तु राधसे ।
	सरो गौरो यथा पिब ॥ ९ ॥
८.२.१	इदं वसो सुतम् अन्धः पिबा सुपूर्णम् उदरम् ।
	अनाभयिन् ररिमा ते ॥ १० ॥
२ * धूतः * * अव्यो...	नृभिर् धौतः सुतो अश्नैर् अव्या वारैः परिपूतः ।
	अश्वो न निक्तो नदीषु ॥ ११ ॥
३	तं ते यवं यथा गोभिः स्वादुम् अकर्म श्रीणन्तः ।
	इन्द्र त्वास्मिन् सधमादे ॥ १२ ॥ ॥८॥
	३.९
ऋ ३.५१.१०	इदं ह्य् अन्व् ओजसा सुतं राधानां पते ।
	पिबा त्व् अस्य गिर्वणः ॥ १ ॥
१२	प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः ।
...राधसे	प्र बाहू शूर राधसा ॥ २ ॥
११	यस् ते अनु स्वधाम् असत् सुते नि यच्छ तन्वम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

...सोम्यम्	स त्वा ममत्तु सोम्य ॥ ३ ॥
१.५.१	आ त्व् एता नि षीदतेन्द्रम् अभि प्र गायत ।
	सखायः स्तोमवाहसः ॥ ४ ॥
२	पुरूतमं पुरूणाम् ईशानं वार्याणाम् ।
	इन्द्रं सोमे सचा सुते ॥ ५ ॥
३ ...पुरन्ध्याम्	स घा नो योग आ भुवत् स राये स पुरन्ध्या ।
	गमद् वाजेभिर् आ स नः ॥ ६ ॥
१.३०.७	योगेयोगे तवस्तरं वाजेवाजे हवामहे ।
	सखाय इन्द्रम् ऊतये ॥ ७ ॥
८	आ घा गमद् यदि श्रवत् सहस्रिणीभिर् ऊतिभिः ।
	वाजेभिर् उप नो हवम् ॥ ८ ॥
९	अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम् ।
	यं ते पूर्वं पिता हुवे ॥ ९ ॥
८.१३.१ इन्द्रः...पुनीत *	इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम् ।
* * दक्षसो ...	विदे वृधस्य दक्षस्य महान् हि षः ॥ १० ॥
२	स प्रथमे व्योमनि देवानां सदने वृधः ।
	सुपारः सुश्रवस्तमः सम् अप्सुजित् ॥ ११ ॥
३ * अह्व...	तम् उ हुवे वाजसातय इन्द्रं भराय शुष्मिणम् ।
	भवा नः सुम्ने अन्तमः सखा वृधे ॥ १२ ॥ ॥९॥
	३.१०
ऋ ७.१६.१	एना वो अग्निं नमसोर्जो नपातम् आ हुवे ।
	प्रियं चेतिष्ठम् अरतिं स्वध्वरं विश्वस्य दूतम् अमृतम् ॥ १ ॥
२	स योजते अरुषा विश्वभोजसा स दुद्रवत् स्वाहुतः ।
[कौ) * *	सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानाम् ॥ २ ॥
७.८१.१ प्रत्यु अदर्श्यायत्युछन्ती (एवं	प्रति वो दृश्यायत्य् उच्छन्ती दुहिता दिवः ।
अपो महि व्ययति चक्षसे * * *	अपो मही वृणुते चक्षुषा तमो ज्योतिष् कृणोति सूनरी ॥ ३ ॥
२	उद् उस्रियाः सृजते सूर्यः सचा उद्यन् नक्षत्रम् अर्चिवत् ।
	तवेद् उषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि ॥ ४ ॥
७.७४.१	इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
* * अह्व ऽवसे (एवं कौ) * * * *	अयं वाम् अंहुयवसे शचीवसू विशंविशं हि गच्छथः ॥५॥
२	युवं चित्रं ददथुर् भोजनं नरा चोदेथां सूनृतावते ।
	अर्वाग् रथं समनसा नि यच्छतं पिबतं सोम्यं मधु ॥ ६ ॥ ॥१०॥
	३.११
ऋ ९.५४.१	अस्य प्रत्नाम् अनु द्युतं शुक्रं दुदुह्रे अह्रयः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	पयः सहस्रसाम् ऋषिम् ॥ १ ॥
२	अयं सूर्य इवोपदृग् अयं सरांसि धावति ।
	सप्त प्रवत आ दिवम् ॥ २ ॥
३	अयं विश्वानि तिष्ठति पुनानो भुवनोपरि ।
	सोमो देवो न सूर्यः ॥ ३ ॥
९.३.९	एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।
	हरिः पवित्रे अर्षति ॥४॥
९.४२.२[१.२]	एष प्रत्नेन मन्मना देवो देवेभ्यस् परि ।
८.४४.१२[३]	कविर् विप्रेण वावृधे ॥ ५ ॥
९.४२.४ * प्रत्नमित् (एवं कौ)...	दुहानः प्रत्नवित् पयः पवित्रे परि षिच्यसे ।
* * अजीजनत्	क्रन्दन् देवं अजीजनः ॥ ६ ॥
९.१९.६ ... शत्रुषु	उप शिक्षापतस्थुषो भियसम् आ धेहि शत्रवे ।
	पवमान विदा रयिम् ॥ ७ ॥
९.६१.१३	उपो षु जातम् अप्तुरं गोभिर् भङ्गं परिष्कृतम् ।
	इन्दुं देवा अयासिषुः ॥ ८ ॥
९.११.१	उपास्मै गायता नरः पवमानायेन्दवे ।
	अभि देवं इयक्षते ॥ ९ ॥ ॥११॥
	३.१२
ऋ ९.३३.१ * * * ऽपां न यन्त्य् *	प्र सोमासो विपश्चितो अपो नयन्त ऊर्मयः ।
	वनानि महिषा इव ॥ १ ॥
२	अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया ।
	वाजं गोमन्तम् अक्षरन् ॥ २ ॥
३	सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः ।
* अर्षन्ति *	सोमा अर्षन्तु विष्णवे ॥ ३ ॥
९.१०७.१२	प्र सोम देववीतये सिन्धुर् न पिप्ये अर्णसा ।
	अंशोः पयसा मदिरो न जागृविर् अच्छा कोशं मधुश्चुतम् ॥ ४ ॥
१३ * * अर्जुने ...	आ हर्यतो अर्जुनो अत्के अव्यत प्रियः सूनुर् न मर्ज्यः ।
	तम् ईं हिन्वन्त्य् अपसो यथा रथं नदीष्व् आ गभस्त्योः ॥ ५ ॥
९.३२.१ ... मघोनः	प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् ।
	सुता विदथे अक्रमुः ॥ ६ ॥
९.१०६.१३	पवते हर्यतो हरिर् अति ह्वरांसि रंह्या ।
	अभ्यर्षन् स्तोतृभ्यो वीरवद् यशः ॥ ७ ॥
९.१०१.१३ * सुन्वानस्यान्धसो * * वृत * *	प्र सुन्वानायान्धसो मर्तो न वष्ट तद् वचः ।
	अप श्वानम् अराधसं हता मखं न भृगवः ॥ ८ ॥ ॥१२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	३.१३
ऋ ९.६२.२५	पवस्व वाचो अग्रियः सोम चित्राभिर् ऊतिभिः ।
	अभि विश्वानि काव्या ॥ १ ॥
२६	त्वं समुद्रिया अपो ऽग्रियो वाच ईरयन् ।
* विश्वमेजय	पवस्व विश्वचर्षणे ॥ २ ॥
२७	तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे ।
* अर्षन्ति सिन्धवः	तुभ्यं धावन्ति धेनवः ॥ ३ ॥
९.६१.२८	पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।
	विश्वा अप द्विषो जहि ॥ ४ ॥
२९ अस्य ... (द्वितीयतृतीयपादयोर्	यस्य ते सख्ये वयं सासह्याम पृतन्यतः ।
विपर्यासः)	तवेन्दो द्युम्न उत्तमे ॥ ५ ॥
३०	या ते भीमान्य् आयुधा तिग्मानि सन्ति धूर्वणे ।
	रक्षा समस्य नो निदः ॥ ६ ॥
९.६४.१	वृषा सोम द्युमं असि वृषा देव वृषव्रतः ।
* * दधिषे	वृषा धर्माणि दध्रिषे ॥ ७ ॥
२ ... मदः	वृष्णस् ते वृष्ण्यं शवो वृषा वनं वृषा सुतः ।
सत्यं * * *	स त्वं वृषन् वृषेद् असि ॥ ८ ॥
३ * * चक्रदो (एवं कौ) ...	अश्वो न चक्रदद् वृषा सं गा इन्दो सम् अर्वतः ।
	वि नो राये दुरो वृधि ॥ ९ ॥
९.६५.४$^{१.२}$	वृषा ह्य् असि भानुना द्युमन्तं त्वा हवामहे ।
११^{२}	पवमान स्वर्दृशम् ॥ १० ॥
६ * * * मृज्यमानो गभस्त्योः	यद् अद्भिः परिषिच्यसे मर्मृज्यमान आयुभिः ।
द्रुणा ...	द्रोणे सधस्थम् अश्नुषे ॥ ११ ॥
५	आ पवस्व सुवीर्यं मन्दमानः स्वायुध ।
	इहो ष्व् इन्दव् आ गहि ॥ १२ ॥
९.६१.४	पवमानस्य ते वयं पवित्रम् अभ्युन्दतः ।
	सखित्वम् आ वृणीमहे ॥ १३ ॥
५	ये ते पवित्रम् ऊर्मयो ऽभिक्षरन्ति धारया ।
... मृळय (कौ मृडय)	तेभिर् नः सोम मृडया ॥ १४ ॥
६	स नः पुनान आ भर रयिं वीरवतीम् इषम् ।
	ईशानः सोम विश्वतः ॥ १५ ॥ ॥१३॥
	३.१४
ऋ १.१२.१	अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
	अस्य यज्ञस्य सुक्रतुम् ॥ १ ॥
२	अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	हव्यवाहं पुरुप्रियम् ॥ २ ॥
३	अग्ने देवं इहावह जज्ञानो वृक्तबर्हिषे ।
	असि होता न ईड्यः ॥ ३ ॥
१.२३.४ [जाता *	मित्रं वयं हवामहे वरुणं सोमपीतये ।
जज्ञाना (या नास्ति) पूतदक्षसा । कौ *	या जज्ञाना पूतदक्षसा ॥ ४ ॥
५	ऋतेन याव् ऋतावृधाव् ऋतस्य ज्योतिषस् पती ।
	ता मित्रावरुणा हुवे ॥ ५ ॥
६	वरुणः प्राविता भुवन् मित्रो विश्वाभिर् ऊतिभिः ।
	करतां नः सुराधसः ॥ ६ ॥
१.७.१	इन्द्रम् इद् गाथिनो बृहद् इन्द्रम् अर्केभिर् अर्किणः ।
	इन्द्रं वाणीर् अनूषत ॥ ७ ॥
२	इन्द्र इद् धर्योः सचा संमिश्ल आ वचोयुजा ।
	इन्द्रो वज्री हिरण्ययः ॥ ८ ॥
४ * * नो ऽव (एवं कौ)...	इन्द्र वाजेषु णो अव सहस्रप्रधनेषु च ।
	उग्र उग्राभिर् ऊतिभिः ॥ ९ ॥
७.९४.४	इन्द्रे अग्ना नमो बृहत् सुवृक्तिम् एरयामहे ।
	धिया धेना अवस्यवः ॥ १० ॥
५	ता हि शश्वन्त ईडत इत्था विप्रास ऊतये ।
	सबाधो वाजसातये ॥ ११ ॥
६ * * * विपन्यवः...	ता वां गीर्भिर् विपन्युवः प्रयस्वन्तो हवामहे ।
	मेधसाता सनिष्यवः ॥ १२ ॥ ॥ १४ ॥

३.१५

ऋ ९.६५.१०	वृषा पवस्व धारया मरुत्वते च मत्सरः ।
	विश्वा दधान ओजसा ॥ १ ॥
११	तं त्वा धर्तारम् ओण्योः पवमान स्वर्दृशम् ।
	हिन्वे वाजेषु वाजिनम् ॥ २ ॥
१२	अया चित्तो विपानया हरिः पवस्व धारया ।
* * चोदय (एवं कौ)	युजं वाजेषु चोदया ॥ ३ ॥
९.९७.१३	वृषा शोणो अभिकनिक्रदद् गा नदयन्न् एषि पृथिवीम् उत द्याम् ।
...प्रचेतयन्नर्षति	इन्द्रस्येव वग्नुर् आ शृण्व आजौ प्रचोदयन्न् अर्षसि वाचम् एमाम् ॥ ४ ॥
१४	रसाय्यः पयसा पिन्वमान ईरयन्न् एषि मधुमन्तम् अंशुम् ।
पवमानः ...	पवमान संतनिम् एषि कृण्वन्न् इन्द्राय सोम परिषिच्यमानः ॥ ५ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१५ ...वधस्नैः — एवा पवस्व मदिरो मदायोदग्राभस्य नमयन् वधस्नुम् ।
परि वर्णं भरमाणो रुशन्तं गव्युर् नो अर्ष परि सोम
सिक्तः ॥ ६ ॥
६.४६.१ ...साता * * — त्वाम् इद् धि हवामहे सातौ वाजस्य कारवः ।
त्वां वृत्रेष्व् इन्द्र सत्पतिं नरस् त्वां काष्ठास्व् अर्वतः ॥ ७ ॥
२ — स त्वं नश् चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः ।
गाम् अश्वं रथ्यम् इन्द्र सं किर सत्रा वाजं न जिग्युषे ॥ ८ ॥
८.४९.१ — अभि प्र वः सुराधसम् इन्द्रम् अर्च यथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥ ९ ॥
२ — शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
गिरेर् इव प्र रसा अस्य पिन्विरे दत्राणि पुरुभो-
जसः ॥ १० ॥
८.९९.१ — त्वाम् इदा ह्यो नरो ऽपीप्यन् वज्रिन् भूर्णयः ।
* * स्तोमबाहसाम् ... — स इन्द्र स्तोमवाहस इह श्रुध्य् उप स्वसरम् आ गहि ॥११॥
२ * सुशिप्र * तद् ... — मत्स्वा सुशिप्रिन् हरिवस् तम् ईमहे त्वय् आ
भूषन्ति वेधसः ।
* * * उक्थ्या ... — तव श्रवांस्य् उपमान्य् उक्थ्य सुतेष्व् इन्द्र गिर्वणः
॥ १२ ॥ ॥१५॥

३.१६

ऋ ९.६१.१९ — यस् ते मदो वरेण्यस् तेना पवस्वान्धसा
देवावीर् अघशंसहा ॥ १ ॥
२० — जघ्निर् वृत्रम् अमित्रियं सस्निर् वाजं दिवेदिवे ।
गोषा उ * * — गोषातिर् अश्वसा असि ॥ २ ॥
२१ * * भव ... — संमिश्लो अरुषो भुवः सूपस्थाभिर् न धेनुभिः ।
सीदन् श्येनो न योनिम् आ ॥ ३ ॥
९.१०८.१ — पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
महि द्युक्षतमो मदः ॥ ४ ॥
९.१०६.१ — इन्द्रम् अच्छ सुता इमे वृषणं यन्तु हरयः ।
श्रुष्टी ... — श्रुष्टे जातास इन्दवः स्वर्विदः ॥ ५ ॥
९.१०१.७ — अयं पूषा रयिर् भगः सोमः पुनानो अर्षति ।
पतिर् विश्वस्य भूमनो व्य् अख्यद् रोदसी उभे ॥६॥
८ — सम् उ प्रिया अनूषत गावो मदाय घृष्वयः ।
सोमासः कृण्वते पथः पवमानास इन्दवः ॥ ७ ॥
९ — य ओजिष्ठस् तम् आ भर पवमान श्रवाय्यम् ।
...वनामहै — यः पञ्च चर्षणीर् अभि रयिं येन वनामहे ॥ ८ ॥
९.८६.१९ ...अह्नः * — वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां
दिवः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्राणा * * अवीवशद् ...	प्राणा सिन्धूनां कलशां अचिक्रदद् इन्द्रस्य हार्द्यं आविशन् मनीषिभिः ॥ ९ ॥
२० अचिक्रदत्	मनीषिभिः पवते पूर्व्यः कविर् नृभिर् यतः परि कोशां असिष्यदत् ।
... क्षरद् * वायोः * कर्तवे	त्रितस्य नाम जनयन् मधु क्षरन्न् इन्द्रस्य वायुं सख्याय वर्धयन् ॥ १० ॥
२१ * * * वि रोचयद् ...	अयं पुनान उषसो अरोचयद् अयं सिन्धुभ्यो अभवद् उ लोककृत् ।
	अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ॥ ११ ॥
८.९२.२८	एवा ह्य् असि वीरयुर् एवा शूर उत स्थिरः ।
	एवा ते राध्यं मनः ॥ १२ ॥
२९	एवा रातिस् तुवीमघ विश्वेभिर् धायि धातृभिः ।
* * * मे *	अधा चिद् इन्द्र नः सचा ॥ १३ ॥
३०	मो षु ब्रह्मेव तन्द्रयुर् भुवो वाजानां पते ।
	मत्स्वा सुतस्य गोमतः ॥ १४ ॥
१.११.१	इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसं गिरः ।
	रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥ १५ ॥
२	सख्ये त इन्द्र वाजिनो मा भेम शवसस् पते ।
* * * णोनुमो ...	त्वाम् अभि प्र नोनुमो जेतारम् अपराजितम् ॥ १६ ॥
३	पूर्वीर् इन्द्रस्य रातयो न वि दस्यन्त्य् ऊतयः ।
यदी ...	यदा वाजस्य गोमतः स्तोतृभ्यो मंहते मघम् ॥ १७ ॥
	॥१६॥

३.१७

क ९.६२.१	एते असृग्रम् इन्दवस् तिरः पवित्रम् आशवः ।
	विश्वान्य् अभि सौभगा ॥ १ ॥
२	विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः ।
तना * अर्वते	त्मना कृण्वन्तो अर्वतः ॥ २ ॥
	कृण्वन्तो वरिवो गवे ऽभ्य् अर्षन्ति सुष्टुतिम् ।
	इडाम् अस्मभ्यं संयतम् ॥ ३ ॥
९.६५.१६	राजा मेधाभिर् ईयते पवमानो मनाव् अधि ।
	अन्तरिक्षेण यातवे ॥ ४ ॥
१८	आ नः सोम सहो जुवो रूपं न वर्चसे भर ।
	सुष्वाणो देववीतये ॥ ५ ॥
१७ * * * शतग्विनं ...	आ न इन्दो शातग्विनं गवां पोषं स्वश्व्यम् ।
	वहा भगत्तिम् ऊतये ॥ ६ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

९.४८.१	तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः ।
* सुकृत्ययेमहे (एवं कौ)	चारुं सुकृत्ययैमहि ॥ ७ ॥
२	संवृक्तधृष्णुम् उक्थ्यं महामहिव्रतं मदम् ।
	शतं पुरो रुरुक्षणिम् ॥ ८ ॥
३ * * रयिमभि राजानं * *	अतस् त्वा रयिर् अभ्य् अयद् राजानं सुक्रतो दिवः ।
* अव्यथिर् *	सुपर्णो अव्यथी भरत् ॥ ९ ॥
४	विश्वस्मा इत् स्वर् दृशे साधारणं रजस्तुरम् ।
	गोपाम् ऋतस्य विर् भरत् ॥ १० ॥
५	अधा हिन्वान इन्द्रियं ज्यायो महित्वम् आनशे ।
	अभिष्टिकृद् विचर्षणिः ॥ ११ ॥
९.६४.१३	इषे पवस्व धारया मृज्यमानो मनीषिभिः ।
	इन्दो रुचाभि गा इहि ॥ १२ ॥
१४	पुनानो वरिवस् कृध्य् ऊर्जं जनाय गिर्वणः ।
	हरे सृजान आशिरम् ॥ १३ ॥
१५	पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् ।
* * यतः	द्युतानो वाजिभिर् हितः ॥ १४ ॥ ॥ १७ ॥

३.१८

ऋ १.१२.६	अग्निनाग्निः सम् इध्यते कविर् गृहपतिर् युवा ।
	हव्यवाड् जुह्वास्यः ॥ १ ॥
८	यस् त्वाम् अग्ने हविष्पतिर् दूतं देव सपर्यति ।
	तस्य स्म प्राविता भव ॥ २ ॥
९	यो अग्निं देववीतये हविष्मं आविवासति ।
* * मृळय (कौ मृडय)	तस्मै पावक मृडया ॥ ३ ॥
१.२.७	मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् ।
	धियं घृताचीं साधन्ता ॥ ४ ॥
८	ऋतेन मित्रावरुणाव् ऋतावृधाव् ऋतस्पृशा ।
* * आशाथे (एवं कौ)	क्रतुं बृहन्तम् आशाथे ॥ ५ ॥
९	कवी नो मित्रावरुणा तुविजाता उरुक्षया ।
	दक्षं दधाते अपसम् ॥ ६ ॥
१.६.७	इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा ।
	मन्दू समानवर्चसा ॥ ७ ॥
४	आद् अह स्वधाम् अनु पुनर् गर्भत्वम् एरिरे ।
	दधाना नाम यज्ञियम् ॥ ८ ॥
५ वीळु (कौ वीडु)...	वीडु चिद् आरुजत्नुभिर् गुहा चिद् इन्द्र वह्निभिः ।
	अविन्द उस्रिया अनु ॥ ९ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६.६०.४	ता हुवे ययोर् इदं पप्ने विश्वं पुरा कृतम् । इन्द्राग्नी न मर्धतः ॥ १० ॥
५	उग्रा विघनिना मृध इन्द्राग्नी हवामहे । ता नो मृडात ईदृशे ॥ ११ ॥
६ हतो * * हतो * * हतो ...	हथो वृत्राण्य् आर्या हथो दासानि सत्पती । हथो विश्वा अप द्विषः ॥ १२ ॥ ॥१८॥
	३.१९
ऋ ९.१०७.१४ * विष्टपि * * स्वर्विदः	अभि सोमास आयवः पवन्ते मद्यं मदम् । समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥ १ ॥
१५ अर्षन्...	तरत् समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् । अर्षा मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥२॥
१६ * येमानो ...	नृभिर् येमाणो हर्यतो विचक्षणो राजा देवः समुद्र्यः ॥ ३ ॥
९.९७.३४	तिस्रो वाच ईरयति प्र वह्निर् ऋतस्य धीतिं ब्रह्मणो मनीषाम् । गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥ ४ ॥
३५	सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ।
* * पूयते अज्यमानः ...	सोमः सुत ऋच्यते पूयमानः सोमे अर्कास् त्रिष्टुभः सं नवन्ते ॥ ५ ॥
३६	एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति ।
* * * * रवेण ...	इन्द्रम् आ विश बृहता मदेन वर्धया वाचं जनया पुरंधिम् ॥ ६ ॥
८.७०.५	यद् द्याव इन्द्र ते शतं शतं भूमीर् उत स्युः । न त्वा वज्रिन् सहस्रं सूर्या अनु न जातम् अष्ट रोदसी ॥ ७ ॥
६	आ पप्राथ महिना वृष्ण्या वृषन् विश्वा शविष्ठ शवसा । अस्मं अव मघवन् गोमति व्रजे वज्रिन् चित्राभिर् ऊतिभिः ॥ ८ ॥
८.३३.१	वयं घ त्वा सुतावन्तः आपो न वृक्तबर्हिषः । पवित्रस्य प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते ॥ ९ ॥
२	स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
... गमः * *	कदा सुतं तृषाण ओक आ गमद् इन्द्र स्वब्दीव वंसगः ॥ १० ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३	कण्वेभिर् धृष्णव् आ धृषद् वाजं दर्षि सहस्रिणम् ।
	पिशङ्गरूपं मघवन् विचर्षणे मक्षू गोमन्तम् ईमहे ॥ ११ ॥
७.३२.२०	तरणिर् इत् सिषासति वाजं पुरंध्या युजा ।
	आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्र्वम् ॥ १२ ॥
२१ * दुष्टुती मर्त्यो विन्दते वसु }	न दुष्टुतिर् द्रविणोदेषु शस्यते न स्रेधन्तं रयिर् नशत् ।
* * * * }	सुशक्तिर् इन् मघवन् तुभ्यं मावते देष्णं यत् पार्ये
	दिवि ॥ १३ ॥ ॥१९॥
	३.२०
ऋ ९.३३.४	तिस्रो वाच उद् ईरते गावो मिमन्ति धेनवः ।
	हरिर् एति कनिक्रदत् ॥ १ ॥
५	अभि ब्रह्मीर् अनूषत यह्वीर् ऋतस्य मातरः ।
मर्मृज्यन्ते * *	मर्जयन्तीर् दिवः शिशुम् ॥ २ ॥
६ रायः (एवं कौ)...	राये समुद्रांश चतुरो ऽस्मभ्यं सोम विश्वतः ।
...सहस्त्रिणः (एवं कौ)	आ पवस्व सहस्रिणम् ॥ ३ ॥
९.१०८.७	आ सोता परि षिञ्चताश्वं न स्तोमम अप्तुरं रजस्तुरम् ।
वनऋक्षम् *	वनप्रक्षम उदप्रुतम ॥ ४ ॥
९.१०४.१	सखाय आ नि षीदत पुनानाय प्र गायत !
	शिशुं न यज्ञैः परि भूषत श्रिये ॥ ५ ॥
९.१०१.४	सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
	पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ॥ ६ ॥
५	इन्दुर् इन्द्राय पवत इति देवासो अब्रुवन् ।
* * मखस्यते (एवं कौ) ...। कौ .. ओजसः	वाचस् पतिर् मघस्यते विश्वस्येशान ओजसा ॥ ७ ॥
६	सहस्रधारः पवते समुद्रो वाचमीङ्खयः ।
	सोमस् पती रयीणां सखेन्द्रस्य दिवेदिवे ॥ ८ ॥
९.८३.१	पवित्रं ते विततं ब्रह्मणस् पते प्रभुर् गात्राणि पर्य् एषि
	विश्वतः ।
	अतप्ततनूर् न तद् आमो अश्नुते श्रृतास इद् वहन्तः
तत् सम् (विपर्यासेन) *	सं तद् आशत ॥ ९ ॥
२ कौ * * * * अर्चन्तो...	तपोष् पवित्रं विततं दिवस् पदे शोचन्तो अस्य तन्तवो
	व्य् अस्थिरन् ।
* * पवीतारम्...	अवन्त्य् अस्य पवितारम् आशवो दिवः पृष्ठम् अधि
* चेतसा । कौ रोहन्ति *	तिष्ठन्ति तेजसा ॥ १० ॥
३ * * * * * बिभर्ति भुवनानि । }	अरूरुचद् उषसः पृश्निर् अग्रिय उक्षा मिमाति भुवनेषु
कौ ... मिमेति * }	वाजयुः ।
	मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भम्
	आ दधुः ॥ ११ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८.१०३.८	प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे । उपस्तुतासो अग्नये ॥ १२ ॥
९ ...द्युम्न्य् (एवं कौ) * ...नवीयस्य् * *	आ वंसते मघवा वीरवद् यशः समिद्धो द्युम्न आहुतः । कुविन् नो अस्य सुमतिर् भवीयस्य् अच्छा वाजेभिर् आगमत् ॥ १३ ॥
८.१५.४ ...पृत्सु *	तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम् । उ लोककृत्नुम् अद्रिवो हरिश्रियम् ॥ १४ ॥
५	येन ज्योतींष्य् आयवे मनवे च विवेदिथ । मन्दानो अस्य बर्हिषो वि राजसि ॥ १५ ॥
६	तद् अद्या चित् त उक्थिनो अनु ष्टुवन्ति पूर्वथा । वृषपत्नीर् अपो जया दिवेदिवे ॥ १६ ॥
८.९५.४	श्रुधी हवं तिरश्च्या इन्द्र यस् त्वा सपर्यति । सुवीर्यस्य गोमतो रायस् पूर्धि महं असि ॥ १७ ॥
५ इन्द्र यस्ते (विपर्यासेन)...	यस् त इन्द्र नवीयसीं गिरं मन्द्राम् अजीजनत् । चिकित्विन्मनसं धियं प्रत्नाम् ऋतस्य पिप्युषीम् ॥ १८ ॥
६	तम् उ ष्टवाम यं गिर इन्द्रम् उक्थानि वावृधुः । पुरूण्य् अस्य पौंस्या सिषासन्तो वनामहे ॥ १९ ॥ ॥२०॥
	३.२१
ऋ ९.८६.४ * * * * धीजुवो...	प्र त आश्विनीः पवमान धेनवो दिव्या असृग्रन् पयसा धरीमणि ।
प्रान्तर्ऋषयः स्थाविरीरसृक्षत * * * ऋषिषाण *	प्रान्तरिक्षात् स्थाविरीस् ते असृक्षत ये त्वा मृजन्त्य् उषिषाण वेधसः ॥ १ ॥
६	उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः ।
...योना *	यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योनौ कलशेषु सीदति ॥ २ ॥
५ ...प्रभोस्ते * *	विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोष् टे सतः परि यन्ति केतवः ।
व्यानशिः * * धर्मभिः ...	व्यानशी पवसे सोम धर्मणा पतिर् विश्वस्य भुवनस्य राजसि ॥ ३ ॥
९.६१.१६	पवमानो अजीजनद् दिवश् चित्रं न तन्यतुम् । ज्योतिर् वैश्वानरं बृहत् ॥ ४ ॥
१७ कौ प्रथमपादयोर् विपर्यासः १८	पवमानस्य ते रसो मदो राजन्न् अदुच्छुनः । वि वारम् अव्यम् अर्षति ॥ ५ ॥ पवमान रसस् तव दक्षो वि राजति द्युमान् । ज्योतिर् विश्वं स्वर् दृशे ॥ ६ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

९.४१.१ * ये...	प्र यद् गावो न भूर्णयस् त्वेषा अयासो अक्रमुः ।
	घ्नन्तः कृष्णाम् अप त्वचम् ॥ ७ ॥
२ * मनामहे * * दुराव्यम्	सुवितस्य वनामहे अति सेतुं दुराय्यम् ।
साह्वांसो ...	साह्याम दस्युम् अव्रतम् ॥ ८ ॥
३	शृण्वे वृष्टेर् इव स्वनः पवमानस्य शुष्मिणः ।
	चरन्ति विद्युतो दिवि ॥ ९ ॥
४	आ पवस्व महीम् इषं गोमद् इन्दो हिरण्यवत् ।
* वाजवत् सुतः	अश्ववत् सोम वीरवत् ॥ १० ॥
५ स पवस्व विचर्षण * * * पृण (एवं कौ)	पवस्व विश्वचर्षण आ मही रोदसी पृणा ।
	उषाः सूर्यो न रश्मिभिः ॥ ११ ॥
६ कौ * नः...	परि णः शर्मयन्त्या धारया सोम विश्वतः ।
	सरा रसेव विष्टपम् ॥ १२ ॥
९.३९.१	आशुर् अर्ष बृहन्मते परि प्रियेण धाम्ना ।
	यत्र देवा इति ब्रुवन् ॥ १३ ॥
२	परिष्कृण्वन्न् अनिष्कृतं जनाय यातयन्न् इषः ।
	वृष्टिं दिवः परि स्रव ॥ १४ ॥
४	अयं स यो दिवस् परि रघुयामा पवित्र आ ।
	सिन्धोर् ऊर्मा व्य् अक्षरत् ॥ १५ ॥
३	सुत एति पवित्र आ त्विषिं दधान ओजसा ।
	विचक्षाणो विरोचयन् ॥ १६ ॥
५	आविवासन् परावतो अथो अर्वावतः सुतः ।
	इन्द्राय सिच्यते मधु ॥ १७ ॥
६	समीचीना अनूषत हरिं हिन्वन्त्य् अद्रिभिः ।
योनावृतस्य सीदत	इन्दुम् इन्द्राय पीतये ॥ १८ ॥
९.६५.१	हिन्वन्ति सूरम् उस्रयः स्वसारो जामयस् पतिम् ।
	महाम् इन्दुं महीयुवः ॥ १९ ॥
२ * रुचारुचा देवो देवेभ्यस्परि	पवमान रुधारुचा देव देवेभ्यः सुतः ।
...विश (एवं कौ)	विश्वा वसून्य् आ विशा ॥ २० ॥
३	आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः ।
	इषे पवस्व संयतम् ॥ २१ ॥ ॥२१॥

३.२२

ऋ ६.१६.३४	अग्निर् वृत्राणि जङ्घनद् द्रविणस्युर् विपन्यया ।
	समिद्धः शुक्र आहुतः ॥ १ ॥
३५	गर्भे मातुः पितुष् पिता विदिद्युतानो अक्षरे ।
	सीदन्न् ऋतस्य योनिम् आ ॥ २ ॥
३६	ब्रह्म प्रजावद् आ भर जातवेदो विचर्षणे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अग्ने यद् दीदयद् दिवि ॥ ३ ॥
५.११.१ जनस्य गोपा अजनिष्ट जागृविर् अग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद् वि भाति भरतेभ्यः शुचिः ॥ ४ ॥
६ त्वाम् अग्ने अङ्गिरसो गुहा हितम् अन्व् अविन्दन् शिश्रियाणं वनेवने ।
स जायसे मथ्यमानः सहो महत् त्वाम् आहुः सहसस् पुत्रम् अङ्गिरः ॥ ५ ॥
२ यज्ञस्य केतुं प्रथमं पुरोहितम् अग्निं नरस् त्रिषधस्थे सम् इन्धते ।
* * ईधिरे
इन्द्रेण देवैः सरथं स बर्हिषि सीदन् नि होता यजथाय सुक्रतुः ॥ ६ ॥
२.४१.४ अयं वां मित्रावरुणा सुतः सोम ऋतावृधा ।
ममेद् इह श्रुतं हवम् ॥ ७ ॥
५ राजानाव् अनभिद्रुहा ध्रुवे सदस्य् उत्तमे ।
* आसाते सहस्रस्थूण आशाते ॥ ८ ॥
६ ता सम्राजा घृतासुती आदित्या दानुनस् पती ।
सचेते अनवह्वरम् ॥ ९ ॥
१.८४.१३ इन्द्रो दधीचो अस्थभिर् वृत्राण्य् अप्रतिष्कुतः ।
जघान नवतीर् नव ॥ १० ॥
१४ इच्छन्न् अश्वस्य यच् छिरः पर्वतेष्व् अपश्रितम् ।
तद् विदच् छर्यणावति ॥ ११ ॥
१५ अत्राह गोर् अमन्वत नाम त्वष्टुर् अपीच्यम् ।
इत्था चन्द्रमसो गृहे ॥ १२ ॥
७.९४.१ इयं वाम् अस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः ।
अभ्राद् वृष्टिर् इवाजनि ॥ १३ ॥
२ शृणुतं जरितुर् हवम् इन्द्राग्नी वनतं गिरः ।
ईशाना पिप्यतं धियः ॥ १४ ॥
३ मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये ।
मा नो रीरधतं निदे ॥ १५ ॥ ॥२२॥

३.२३

ऋ ९.२५.१ पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।
मरुद्भ्यो वायवे मदः ॥ १ ॥
३ सं देवैः शोभते वृषा कविर् योनाव् अधि प्रियः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृत्रहा देववीतमः	पवमानो अदाभ्यः ॥ २ ॥
२	पवमान धिया हितो ऽभि योनिं कनिक्रदत् ।
...विश । कौ * * आरुहः	धर्मणा वायुम् आ रुह ॥ ३ ॥
९.१०७.१९	तवाहं सोम रारण सख्य इन्दो दिवेदिवे ।
	पुरूणि बभ्रो नि चरन्ति माम् अव परिधीँर् अति तं इहि ॥४॥
२० उताहं * * * * * सख्याय * *	तवाहं नक्तम् उत सोम ते दिवा दुहानो बभ्र ऊधनि।
...पप्तिम (एवं कौ)	घृणा तपन्तम् अति सूर्यं परः शकुना इव पप्तिमा ॥ ५ ॥
९.४०.१	पुनानो अक्रमीद् अभि विश्वा मृधो विचर्षणिः ।
	शुम्भन्ति विप्रं धीतिभिः ॥ ६ ॥
२ ...इन्द्रं * सुतः	आ योनिम् अरुणो रुहद् गमद् इन्द्रो वृषा सुतम्।
...सीदति	ध्रुवे सदसि सीदतु ॥ ७ ॥
३	नू नो रयिं महाम् इन्दो ऽस्मभ्यं सोम विश्वतः ।
	आ पवस्व सहस्रिणम् ॥ ८ ॥
७.२२.१	पिबा सोमम् इन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः।
	सोतुर् बाहुभ्यां सुयतो नार्वा ॥ ९ ॥
३	बोधा सु मे मघवन् वाचम् एमां यां ते वसिष्ठो अर्चति प्रशस्तिम् ।
...जुषस्व (एवं कौ)	इमा ब्रह्म सधमादे जुषस्वा ॥ १० ॥
२	यस् ते मदो युज्यश् चारुर् अस्ति येन वृत्राणि हर्यश्व हंसि ।
	स त्वाम् इन्द्र प्रभूवसो ममत्तु ॥ ११ ॥
८.९७.१०	विश्वा पृतना अभिभूतरं नरः सजूस् ततक्षुर् इन्द्रं जजनुश् च राजसे ।
ऋत्वा वरिष्ठं वर आमुरिम् * * तवसं *	क्रत्वे वरे स्थेमन्य् आमुरीम् उतोग्रम् ओजिष्ठं तरसं तरस्विनम् ॥ १२ ॥
१२ ...अभिस्वरा	नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरे ।
	सुदीतयो वो अद्रुहो ऽपि कर्णे तरस्विनः सम् ऋक्वभिः॥ १३ ॥
११ * ईं...	सम् उ रेभासो अस्वरन्न् इन्द्रं सोमस्य पीतये ।
स्वर्पतिं यदीं...	स्वःपतिर् यदी वृधे धृतव्रतो ह्य् ओजसा सम् ऊतिभिः ॥१४॥
८.७०.१	यो राजा चर्षणीनां याता रथेभिर् अध्रिगुः ।
* * * ज्येष्ठः...	विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥ १५ ॥
२	इन्द्रं तं शुम्भ पुरुहन्मन्न् अवसे यस्य द्विता विधर्तरि।
हस्ताय ... महो दिवे * *	हस्तेन वज्रः प्रति धायि दर्शतो महान् देवो नं सूर्यः ॥ १६ ॥ ॥२३॥
	३.२४
क ९.९.१	परि प्रिया दिवः कविर् वयांसि नप्त्योर् हितः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुवानो…	स्वानैर् याति कविक्रतुः ॥ १ ॥
२ …अद्रुहे	प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहः ।
* * चनिष्ठया	वीत्य् अर्ष पनिष्टये ॥ २ ॥
३	स सूनुर् मातरा शुचिर् जातो जाते अरोचयत् ।
	महान् मही ऋतावृधा ॥ ३ ॥
९.१०८.३ * * * दैव्या…	त्वं ह्य् अङ्ग दैव्य पवमान जनिमानि द्युमत्तमः ।
* घोषयः	अमृतत्वाय घोषयन् ॥ ४ ॥
४ * नवग्वो…	येना नवग्वा दध्यङ्ङ् अपोर्णुते येन विप्रास आपिरे ।
…आनशुः	देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्य् आशत ॥ ५ ॥
९.१०६.१० * * ऊर्मिणाव्यो (कौ [ऊर्मिणाव्यं) * * *	सोमः पुनान ऊर्मिणा अव्यं वारं वि धावति ।
	अग्रे वाचः पवमानः कनिक्रदत् ॥ ६ ॥
११ * हिन्वन्ति…	धीभिर् मृजन्ति वाजिनं वने क्रीडन्तम् अत्यविम् ।
	अभि त्रिपृष्ठं मतयः सम् अस्वरन् ॥ ७ ॥
१२ * * * मीळ्हे…	असर्जि कलशां अभि मीढ्वान् सप्तिर् न वाजयुः ।
	पुनानो वाचं जनयन्न् असिष्यदत् ॥ ८ ॥
९.९६.५	सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
	जनिताग्नेर् जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ ९ ॥
६	ब्रह्मा देवानां पदवीः कवीनाम् ऋषिर् विप्राणां महिषो मृगाणाम् ।
	श्येनो गृध्राणां स्वधितिर् वनानां सोमः पवित्रम् अत्य् एति रेभन् ॥ १० ॥
७ …सोमः *	प्रावीविपद् वाच ऊर्मिं न सिन्धुर् गिरः स्तोमान् पवमानो मनीषाः ।
	अन्तः पश्यन् वृजनेमावराण्य् आ तिष्ठति वृषभो गोषु जानन् ॥ ११ ॥
८.१०२.७	अग्निं वो वृधन्तम् अध्वराणां पुरूतमम् ।
	अच्छा नप्त्रे सहस्वते ॥ १२ ॥
८	अयं यथा न आभुवत् त्वष्टा रूपेव तक्ष्या ।
	अस्य क्रत्वा यशस्वतः ॥ १३ ॥
९	अयं विश्वा अभि श्रियो अग्निर् देवेषु पत्यते ।
	आ वाजैर् उप नो गमत् ॥ १४ ॥
१.८४.४	इमम् इन्द्र सुतं पिब ज्येष्ठम् अमर्त्यं मदम् ।
	शुक्रस्य त्वाभ्य् अक्षरन् धारा ऋतस्य सादने ॥ १५ ॥
६	नकिष् ट्वद् रथीतरो हरी यद् इन्द्र यच्छसे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	नकिष् ट्वानु मज्मना नकिः स्वश्व आनशे ॥ १६ ॥
५	इन्द्राय नूनम् अर्चतोक्थानि च ब्रवीतन ।
	सुता अमत्सुर् इन्दवो ज्येष्ठं नमस्यता सहः ॥ १७ ॥ ॥२४॥
	३.२५
ऋ ९.८६.३९	गोवित् पवस्व वसुविद् धिरण्यविद् रेतोधा इन्दो भुवनेष्व् अर्पितः ।
कौ ...नर * *	त्वं सुवीरो असि सोम विश्वावित् तं त्वा विप्रा उप गिरेम आसते ॥ १ ॥
३८	त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
	स नः पवस्व वसुमद् धिरण्यवद् वयं स्याम भुवनेषु जीवसे ॥ २ ॥
३७ कौ * * * ईयसे...	ईशान इमा भुवनानि वीयसे युजान इन्दो हरितः सुपर्ण्यः ।
	तास् ते क्षरन्तु मधुमद् घृतं पयस् तव व्रते सोम तिष्ठन्तु कृष्टयः ॥ ३ ॥
९.६४.७	पवमानस्य विश्ववित् प्र ते सर्गा असृक्षत ।
	सूर्यस्येव न रश्मयः ॥ ४ ॥
८	केतुं कृण्वन् दिवस् परि विश्वा रूपाभ्य् अर्षसि ।
	समुद्रः सोम पिन्वसे ॥ ५ ॥
९ हिन्वानो...	जज्ञानो वाचम् इष्यसि पवमान विधर्मणि ।
अक्रान् * * *	क्रन्दं देवो न सूर्यः ॥ ६ ॥
९.२४.१	प्र सोमासो अधन्विषुः पवमानास इन्दवः ।
* * मृजत	श्रीणाना अप्सु वृञ्जते ॥ ७ ॥
२	अभि गावो अधन्विषुर् आपो न प्रवता यतीः ।
	पुनाना इन्द्रम् आशत ॥ ८ ॥
३ * * * * पातवे	प्र पवमान धन्वसि सोमेन्द्राय मादनः ।
	नृभिर् यतो वि नीयसे ॥ ९ ॥
५ ...परिधावसि	इन्दो यद् अद्रिभिः सुतः पवित्रं परिदीयसे ।
	अरम् इन्द्रस्य धाम्ने ॥ १० ॥ ॥ २५ ॥
	३.२६
ऋ ९.२४.४ ...चर्षणीसहे	त्वं सोम नृमादनः पवस्व चर्षणीधृतिः ।
	सस्निर् यो अनुमाद्यः ॥ १ ॥
६ * वृत्रहन्तमोक्थेभिर् *	पवस्व वृत्रहन्तम उक्थेभिर् अनुमाद्यः ।
	शुचिः पावको अद्भुतः ॥ २ ॥
७ * * * * सुतस्य मध्वः	शुचिः पावक उच्यते सोमः सुतः स मधुमान् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	देवावीर् अघशंसहा ॥ ३ ॥
९.२०.१ * * * ऽव्यो * अर्षति	प्र कविर् देववीतये अव्या वारेभिर् अर्षत ।
	साह्वान् विश्वा अभि स्पृधः ॥ ४ ॥
२	स हि ष्मा जरितृभ्य आ वाजं गोमन्तम् इन्वति ।
* सहस्रिणम् (एवं कौ)	पवमानः सषासति ॥ ५ ॥
३ * * * मृशसे...	परि विश्वानि चेतसा मृज्यसे पवसे मती ।
	स नः सोम श्रवो विदः ॥ ६ ॥
४	अभ्य् अर्ष बृहद् यशो मघवद्भ्यो ध्रुवं रयिम् ।
	इषं स्तोतृभ्य आ भर ॥ ७ ॥
५	त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ ।
	पुनानो वह्ने अद्भुत ॥ ८ ॥
६	स वह्निर् अप्सु दुष्टरो मृज्यमानो गभस्त्योः ।
	सोमश् चमूषु सीदति ॥ ९ ॥
७ क्रीळुर्मखो... । कौ क्रीडुर् ...	क्रीडुर् मखो न मंहयुः पवित्रं सोम गच्छसि ।
	दधत् स्तोत्रे सुवीर्यम् ॥ १० ॥ ॥ २६ ॥
	३.२७
ऋ ९.५५.१	यवंयवं नो अन्धसा पुष्टंपुष्टं परि स्रव ।
सोम विश्वा च *	विश्वा च सोम सौभगा ॥ १ ॥
२	इन्दो यथा तव स्तवो यथा ते जातम् अन्धसः ।
	नि बर्हिषि प्रिये सदः ॥ २ ॥
३	उत नो गोविद् अश्ववित् पवस्व सोमान्धसा ।
	मक्षूतमेभिर् अहभिः ॥ ३ ॥
४	यो जिनाति न जीयते हन्ति शत्रुम् अभीत्य ।
	स पवस्व सहस्रजित् ॥ ४ ॥
९.६२.७	यास् ते धारा मधुश्चुतो असृग्रम् इन्द ऊतये ।
	ताभिः पवित्रम् आसदः ॥ ५ ॥
८ ...रोमाण्य् *	सो अर्षेन्द्राय पीतये तिरो वाराण्य् अव्यया ।
सीदन्योना वनेष्वा	सीदन्न् ऋतस्य योनिम् आ ॥ ६ ॥
९ * इन्दो ...	त्वं सोम परि स्रव स्वादिष्ठो अङ्गिरोभ्यः ।
	वरिवोविद् घृतं पयः ॥ ७ ॥ ॥ २७ ॥
	३.२८
ऋ ५.१३.२ * * मनामहे (एवं कौ)...	अग्नेः स्तोमं वनामहे सिध्रम् अद्य दिविस्पृशः ।
	देवस्य द्रविणस्यवः ॥ १ ॥
३	अग्निर् जुषत नो गिरो होता यो मानुषेष्व् आ ।
	स यक्षद् दैव्यं जनम् ॥ २ ॥
४	त्वम् अग्ने सप्रथा असि जुष्टो होता वरेण्यः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	त्वया यज्ञं वि तन्वते ॥ ३ ॥
१०.९१.५ ... चित्राश् * * । कौ * * * * अग्नेश्चिकित्र *	तव श्रियो वर्ष्यस्येव विद्युतो अग्ने चिकित्व उषसाम्
न केतवः	इवेतयः ।
	यद् ओषधीर् अभिसृष्टो वनानि च परि स्वयं चिनुषे
* आस्ये	अन्नम् आसनि ॥ ४ ॥
७ वातोपधूत ...	वातोपजूत इषितो वशां अनु तृषु यद् अन्ना वेविषद्
	वितिष्ठसे ।
... अजराणि	आ ते यतन्ते रथ्यो यथा पृथक् शर्धांस्य् अग्ने अजरस्य
	धक्षतः ॥ ५ ॥
८ कौ ... परिभूतरं	मेधाकारं विदथस्य प्रसाधनम् अग्निं होतारं परिभूतमं
	मतिम् ।
तमिदर्भे हविष्या * * तमिन्महे *	त्वाम् अर्भस्य हविषः समानम् इत् त्वां महो वृणते
	नान्यं त्वत् ॥ ६ ॥
५.७०.१	पुरूरुणा चिद् ध्य् अस्त्य् अवो नूनं वां वरुण ।
	मित्र वंसि वां सुमतिम् ॥ ७ ॥
२ * * * * * धायसे	ता वां सम्यग् अद्रुह्वाणेषम् अश्याम धाम च ।
* ते रुद्रा *	वयं वां मित्रा स्याम ॥ ८ ॥
३ * * रुद्रा ...	पातं नो मित्रा पायुभिर् उत त्रायेथां सुत्रात्रा ।
तुर्याम * * । कौ * दस्यूं *	साह्याम दस्यून् तनूभिः ॥ ९ ॥
८.७६.१० * * * पीत्वी ...	उत्तिष्ठन्न् ओजसा सह पीत्वा शिप्रे अवेपयः ।
	सोमम् इन्द्र चमू सुतम् ॥ १० ॥
११ * * * * ऋक्षमाणमकृपेताम्। कौ ... अददेताम्	अनु त्वा रोदसी उभे स्पर्धमानम् अददाताम् ।
* * °भवः (एवं कौ)	इन्द्र यद् दस्युहाभुवः ॥ ११ ॥
१२ ... ऋतस्पृशम्	वाचम् अष्टापदीम् अहं नवस्रक्तिम् ऋतावृधम् ।
	इन्द्रात् परि तन्वं ममे ॥ १२ ॥
६.६०.७	इन्द्राग्नी युवाम् इमे ऽभि स्तोमा अनूषत ।
	पिबतं शंभुवा सुतम् ॥ १३ ॥
८	या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा ।
	इन्द्राग्नी ताभिर् आ गतम् ॥ १४ ॥
९	ताभिर् आ गच्छतं नरोपेदं सवनं सुतम् ।
	इन्द्राग्नी सोमपीतये ॥ १५ ॥ ॥२८॥

३.२९

ऋ ९.६५.१९	अर्षा सोम द्युमत्तमो ऽभि द्रोणानि रोरुवत् ।
* श्येनो न योनिमा	सीदन् योनौ वनेष्व् आ ॥ १ ॥
२०	अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सोमो अर्षति *	सोमा अर्षन्तु विष्णवे ॥ २ ॥
२१	इषं तोकाय नो दधद् अस्मभ्यं सोम विश्वतः ।
	आ पवस्व सहस्रिणम् ॥ ३ ॥
९.१०७.८ * * षुवाणः...	सोम उ ष्वाणः सोतृभिर् अधि ष्णुभिर् अवीनाम् ।
	अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥ ४ ॥
९	अनूपे गोमान् गोभिर् अक्षाः सोमो दुग्धाभिर् अक्षाः ।
	समुद्रं न संवरणान्य् अग्मन् मन्दी मदाय तोशते ॥ ५ ॥
९.१९.१	यत् सोम चित्रम् उक्थ्यं दिव्यं पार्थिवं वसु ।
	तन् नः पुनान आ भर ॥ ६ ॥
३ * * आयुषु...	वृषा पुनान आयूंषि स्तनयन्न् अधि बर्हिषि ।
...आसदत्	हरिः सन् योनिम् आसदः ॥ ७ ॥
२ * * * स्वर्पती...	युवं हि स्थः स्वःपती इन्द्रश् च सोम गोपती ।
	ईशाना पिप्यतं धियः ॥ ८ ॥
१.८१.१	इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
* * * आजिषूतेम्...	तम् इन् महत्स्व् आजिषूतिम् अर्भे हवामहे स वाजेषु प्र नो ऽविषत् ॥ ९ ॥
२	असि हि वीर सन्यो ऽसि भूरि परादृदिः ।
	असि दभ्रस्य चिद् वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥ १० ॥
३ ...धना	यद् उदीरत आजयो धृष्णवे धीयते धनम् ।
युक्ष्वा...	युङ्क्ष्वा मदच्युता हरी कं हनः कं वसौ दधो ऽस्मा इन्द्र वसौ दधः ॥ ११ ॥
१.८४.१० * * * मध्वः...	स्वादोर् इत्था विषूवतो मधोः पिबन्ति गौर्यः ।
...शोभसे *	या इन्द्रेण सयावरीर् वृष्णा मदन्ति शोभथा वस्वीर् अनु स्वराज्यम् ॥ १२ ॥
११	ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः ।
	प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं वस्वीर् अनु स्वराज्यम् ॥ १३ ॥
१२	ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः ।
	व्रतान्य् अस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीर् अनु स्वराज्यम् ॥ १४ ॥ ॥ २९ ॥

३.३०

ऋ ९.६२.४	असाव्य् अंशुर् मदायाप्सु दक्षो गिरिष्ठाः ।
	श्येनो न योनिम् आसदत् ॥ १ ॥
५ ...धूतो * सुतः	शुभ्रम् अन्धो देववातम् अप्सु धौतं नृभिः सुतम् ।
	स्वदन्ति गावः पयोभिः ॥ २ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६ * ईम् (एवं कौ) * * हेतारो…	आद् ईद् अश्वं न हेतारम् अशूशुभन्न् अमृताय ।
मध्वो…	मधो रसं सधमादे ॥ ३ ॥
९.१०८.९ … दिदीहि (एवं कौ) * देवयुः	अभि द्युम्नं बृहद् यश इषस् पते दीदिहि देव देवयुम् ।
	वि कोशं मध्यमं युवा ॥ ४ ॥
१०	आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर् न विश्पतिः ।
… अपां जिन्व *	वृष्टिं दिवः पवस्व रीतिम् अपो जिन्वन् गविष्टये धियः ॥ ५ ॥
९.१०२.१ क्राणा…	प्राणा शिशुर् महीनां हिन्वन्न् ऋतस्य दीधितिम् ।
	विश्वा परि प्रिया भुवद् अध द्विता ॥ ६ ॥
३ … एरय *	त्रीणि त्रितस्य धारया पृष्ठेष्व् ऐरयद् रयिम् ।
	मिमीते अस्य योजना वि सुक्रतुः ॥ ७ ॥
२	उप त्रितस्य पाष्योर् अभक्त यद् गुहा पदम् ।
	यज्ञस्य सप्त धामभिर् अध प्रियम् ॥ ८ ॥
९.१००.६ * वाजासातमः…	पवस्व वाजसातये पवित्रे धारया सुतः ।
कौ… मधुमत्तरः	इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तमः ॥ ९ ॥
७ * * मातरो…	त्वां रिहन्ति धीतयो हरिं पवित्रे अद्रुहः ।
* * * धेनवः पवमान *	वत्सं जातं न मातरः पवमाना विधर्मणि ॥ १० ॥
९	त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे ।
	प्रति द्रापिम् अमुञ्चथाः पवमान महित्वना ॥ ११ ॥
९.९७.१०	इन्दुर् वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन् मदाय ।
* * * * अरातीर्…	हन्ति रक्षो बाधते पर्य् अरातिं वरिवः कृण्वन् वृजनस्य राजा ॥ १२ ॥
११	अध धारया मध्वा पृचानस् तिरो रोम पवते अद्रिदुग्धः ।
	इन्दुर् इन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ॥ १३ ॥
१२ * प्रियाणि…	अभि व्रतानि पवते पुनानो देवो देवान् स्वेन रसेन पृञ्चन् ।
	इन्दुर् धर्माण्य् ऋतुथा वसानो दश क्षिपो ऽव्यत सानो अव्ये ॥ १४ ॥
५.६.४	आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
	यद् ध स्या ते पनीयसी समिद् दीदयति द्यवीषं स्तोतृभ्य आ भर ॥ १५ ॥
५ … शोचिषस् *	आ ते अग्न ऋचा हविः शुक्रस्य ज्योतिषस् पते ।
	सुश्चन्द्र दस्म विश्पते हव्यवाद् तुभ्यं हूयत इषं स्तोतृभ्य आ भर ॥ १६ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

९ उभे * सर्पिषो...	ओभे सुश्चन्द्र विश्पते दर्वी श्रीणीष आसनि । उतो न उत् पुपूर्या उक्थेषु शवसस् पत इषं स्तोतृभ्य आ भर ॥ १७ ॥
८.९८.१ धर्मकृते...	इन्द्राय साम गायत विप्राय बृहते बृहत् । ब्रह्मकृते विपश्चिते पनस्यवे ॥ १८ ॥
२	त्वम् इन्द्राभिभूर् असि त्वं सूर्यम् अरोचयः । विश्वकर्मा विश्वदेवो महं असि ॥ १९ ॥
३ विभ्राजन्...	विभ्राजं ज्योतिषा स्वर् अगच्छो रोचनं दिवः । देवास् त इन्द्र सख्याय येमिरे ॥ २० ॥
१.८४.१	असावि सोम इन्द्र ते शविष्ठ धृष्णव् आ गहि । आ त्वा पृणक्त्व् इन्द्रियं रजः सूर्यो न रश्मिभिः ॥ २१ ॥
३	आ तिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी । अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥ २२ ॥
२ ऋषीणां च सुष्टुतीर् * * * *	इन्द्रम् इद् धरी वहतो ऽप्रतिधृष्टशवसम् । ऋषीणां सुष्टुतीर् उप यज्ञं च मानुषाणाम् ॥ २३ ॥ ॥३०॥
	३.३१
ऋ ९.८६.१०	ज्योतिर् यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः । दधाति रत्नं स्वधयोर् अपीच्यं मदिंतमो मत्सर इन्द्रियो रसः ॥ १ ॥
११	अभिक्रन्दन् कलशं वाज्य् अर्षति पतिर् दिवः शतधारो विचक्षणः । हरिर् मित्रस्य सदनेषु सीदति मर्मृजानो ऽविभिः सिन्धुभिर् वृषा ॥ २ ॥
१२ * * * अर्षत्य्... * * भजते महाधनं * * पूयते वृषा	अग्रे सिन्धूनां पवमानो अर्षस्य् अग्रे वाचो अग्रियो गोषु गच्छसि । अग्रे वाजस्य भजसे महद् धनं स्वायुधः सोतृभिः सोम सूयसे ॥ ३ ॥
९.६४.४	असृक्षत प्र वाजिनो गव्या सोमासो अश्वया । शुक्रासो वीरयाशवः ॥ ४ ॥
५	शुम्भमाना ऋतायुभिर् मृज्यमाना गभस्त्योः । पवन्ते वारे अव्यये ॥ ५ ॥
६	ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा । पवन्ताम् आन्तरिक्ष्या ॥ ६ ॥
९.२.१	पवस्व देववीर् अति पवित्रं सोम रंह्या । इन्द्रम् इन्दो वृषा विश ॥ ७ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२	आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः । आ योनिं धर्णसिः सदः ॥ ८ ॥
३	अधुक्षत प्रियं मधु धारा सुतस्य वेधसः । अपो वसिष्ट सुक्रतुः ॥ ९ ॥
४	महान्तं त्वा महीर् अन्व् आपो अर्षन्ति सिन्धवः । यद् गोभिर् वासयिष्यसे ॥ १० ॥
५	समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः । सोमः पवित्रे अस्मयुः ॥ ११ ॥
६ * * रोचते	अचिक्रदद् वृषा हरिर् महान् मित्रो न दर्शतः । सं सूर्येण दिद्युते ॥ १२ ॥
७	गिरस् त इन्द्र ओजसा मर्मृज्यन्ते अपस्युवः । याभिर् मदाय शुम्भसे ॥ १३ ॥
८ * प्रशस्तयो महीः	तं त्वा मदाय घृष्वय उ लोककृत्नुम् ईमहे । तव प्रशस्तये महे ॥ १४ ॥
१०	गोषा इन्दो नृषा अस्य् अश्वसा वाजसा उत । आत्मा यज्ञस्य पूर्व्यः ॥ १५ ॥
९ * * इन्द्रयुर् मध्वः * *	अस्मभ्यम् इन्दव् इन्द्रियं मधोः पवस्व धारया । पर्जन्यो वृष्टिमं इव ॥ १६ ॥
९.४.१	सना च सोम जेषि च पवमान महि श्रवः । अथा नो वस्यसस् कृधि ॥ १७ ॥
२	सना ज्योतिः सना स्वर् विश्वा च सोम साभगा । अथा नो वस्यसस् कृधि ॥ १८ ॥
३	सना दक्षम् उत क्रतुम् अप सोम मृधो जहि । अथा नो वस्यसस् कृधि ॥ १९ ॥
४	पवीतारः पुनीतन सोमम् इन्द्राय पातवे । अथा नो वस्यसस् कृधि ॥ २० ॥
५ * * न (एवं कौ)...	त्वं सूर्ये ण आ भज तव क्रत्वा तवोतिभिः । अथा नो वस्यसस् कृधि ॥ २१ ॥
६	तव क्रत्वा तवोतिभिर् ज्योक् पश्येम सूर्यम् । अथा नो वस्यसस् कृधि ॥ २२ ॥
७	अभ्य् अर्ष स्वायुध सोम द्विबर्हसं रयिम् । अथा नो वस्यसस् कृधि ॥ २३ ॥
८ * * रयिं * *	अभ्य् अर्षानपच्युतो वाजिन् समत्सु सासहिः । अथा नो वस्यसस् कृधि ॥ २४ ॥
९	त्वां यज्ञैर् अवीवृधन् पवमान विधर्मणि । अथा नो वस्यसस् कृधि ॥ २५ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१० रयिं नश् चित्रम् अश्विनम् इन्दो विश्वायुम् आ भर ।
अथा नो वस्यसस् कृधि ॥ २६ ॥
९.५८.१ तरत् स मन्दी धावति धारा सुतस्यान्धसः ।
तरत् स मन्दी धावति ॥ २७ ॥
२ उस्रा वेद वसूनां मर्तस्य देव्य् अवसः ।
तरत् स मन्दी धावति ॥ २८ ॥
३ ध्वस्रयोः पुरुषन्त्योर् आ सहस्राणि दद्महे ।
तरत् स मन्दी धावति ॥ २९ ॥
४ आ ययोस् त्रिंशतं तना सहस्राणि च दद्महे ।
तरत् स मन्दी धावति ॥ ३० ॥
९.६२.२२ एते सोमा असृक्षत गृणानाः शवसे महे ।
मर्दितमस्य धारया ॥ ३१ ॥
२३ अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि ।
सनद्वाजः परि स्रव ॥ ३२ ॥
२४ उत नो गोमतीर् इषो विश्वा अर्ष परिष्टुभः ।
गृणानो जमदग्निना ॥ ३३ ॥ ॥३१॥

३.३२

ऋ १०.१८७.१ प्राग्नये वाचम् ईरय वृषभाय क्षितीनाम् ।
स नः पर्षद् अति द्विषः ॥ १ ॥
२ यः परस्याः परावतस् तिरो धन्वातिरोचते ।
स नः पर्षद् अति द्विषः ॥ २ ॥
४ यो विश्वाभि विपश्यति भुवना सं च पश्यति ।
स नः पर्षद् अति द्विषः ॥ ३ ॥
१.९४.१ इमं स्तोमम् अर्हते जातवेदसे रथम् इव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिर् अस्य संसद्य् अग्ने सख्ये मा रिषामा वयं तव ॥ ४ ॥
४ भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयम् ।
* प्रतरं... जीवातवे प्रतरां साधया धियो ऽग्ने सख्ये मा रिषामा वयं तव ॥ ५ ॥
३ शकेम त्वा समिधं साधया धियस् त्वे देवा हविर् अदन्त्य् आहुतम् ।
त्वम् आदित्यं आ वह तान् ह्य् उश्मस्य् अग्ने सख्ये मा रिषामा वयं तव ॥ ६ ॥
७.६६.७ प्रति वां सूर उदिते मित्रं गृणीषे वरुणम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	अर्यमणं रिशादसम् ॥ ७ ॥
८	राया हिरण्यया मतिर् इयम् अवृकाय शवसे ।
	इयं विप्रा मेधसातये ॥ ८ ॥
९	ते स्याम देव वरुण ते मित्र सूरिभिः सह ।
	इषं स्वश् च धीमहि ॥ ९ ॥
८.४५.४०	भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः ।
	वसु स्पार्हं तद् आ भर ॥ १० ॥
४२ * * विश्वमानुषो * * *	यस्य ते विश्वम् आनुषग् भूरेर् दत्तस्य वेदति ।
	वसु स्पार्हं तद् आ भर ॥ ११ ॥
४१	यद् वीडाव् इन्द्र यत् स्थिरे यत् पर्शाने पराभृतम् ।
	वसु स्पार्हं तद् आ भर ॥ १२ ॥
८.३८.१	यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु ।
	इन्द्राग्नी तस्य बोधतम् ॥ १३ ॥
२	इदं वां मदिरं मध्व् अधुक्षन्न् अद्रिभिर् नरः ।
	इन्द्राग्नी तस्य बोधतम् ॥ १४ ॥
३	तोशासा रथयावाना वृत्रहणापराजिता ।
	इन्द्राग्नी तस्य बोधतम् ॥ १५ ॥ ॥३२॥
	३.३३
ऋ ९.६४.२२	इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः ।
ऋतस्य ...	अर्कस्य योनिम् आसदम् ॥ १ ॥
२३ ...वेधसः	तं त्वा विप्रा वचोविदः परिष् कृण्वन्ति धर्णसिम् ।
	सं त्वा मृजन्त्य् आयवः ॥ २ ॥
२४ * * * * पिबन्ति...	रसं ते मित्रो अर्यमा पिबन्तु वरुणः कवे ।
	पवमानस्य मरुतः ॥ ३ ॥
९.१०७.२१ * सुहस्त्य...	मृज्यमानः सुहस्त्या समुद्रे वाचम् इन्वसि ।
	रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्य् अर्षसि ॥ ४ ॥
२२ मृजानो * * * वृषाव चक्रदो *	पुनानो वारे पवमानो अव्यये वृषो अचिक्रदद् वने ।
	देवानां सोम पवमान निष्कृतं गोभिर् अञ्जानो अर्षसि ॥ ५ ॥
९.६१.७	एतम् उ त्यं दश क्षिपो मृजन्ति सिन्धुमातरम् ।
	सम् आदित्येभिर् अख्यत ॥ ६ ॥
८	सम् इन्द्रेणोत वायुना सुत एति पवित्र आ ।
* सूर्यस्य (एवं कौ) *	सं सूर्येण रश्मिभिः ॥ ७ ॥
९	स नो भगाय वायवे पूष्णे पवस्व मधुमान् ।
	चारुर् मित्रे वरुणे च ॥ ८ ॥
१.३०.१३ * नः (एवं कौ)...	रेवतीर् णः सधमाद इन्द्रे सन्तु तुविवाजाः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्षुमन्तो याभिर् मदेम ॥ ९ ॥
१४ * * * त्मनाक्षः * * इयानः आ घ त्वावान् त्मना युक्तः स्तोतृभ्यो धृष्णव् ईयानः ।
ऋणोर् अक्षं न चक्रयोः ॥ १० ॥
१५ आ यद् दुवः शतक्रतव् आ कामं जरितॄणाम् ।
ऋणोर् अक्षं न शचीभिः ॥ ११ ॥
१.४.१ सुरूपकृत्नुम् ऊतये सुदुघाम् इव गोदुहे ।
जुहूमसि द्यविद्यवि ॥ १२ ॥
३ अथा ते अन्तमानां विद्याम सुमतीनाम् ।
मा नो अति ख्य आ गहि ॥ १३ ॥
२ उप नः सवना गहि सोमस्य सोमपाः पिब ।
गोदा इद् रेवतो मदः ॥ १४ ॥
१०.१३४.१ उभे यद् इन्द्र रोदसी आपप्राथोषा इव ।
महान्तं त्वा महीनां सम्राजं चर्षणीनाम् ।
देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य् अजीजनत् ॥ १५ ॥
६ दीर्घं ह्य् अङ्कुशं यथा शक्तिं बिभर्षि मन्तुमः ।
* * पदाजो वयां * * पूर्वेण मघवन् पदा वयाम् अजो यथा यमः ।
देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य् अजीजनत् ॥ १६ ॥
३ अव त्या बृहतीर् इषो विश्वश्चन्द्रा अमित्रहन् ।
* * धूनुहीन्द्र * * शचीभिः शक्र धूनुष इन्द्र विश्वाभिर् ऊतिभिः ।
देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य् अजीजनत् ॥ १७॥
॥३३॥

३.३४

ऋ ९.१८.१ * सुवानो ... अक्षाः परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् ।
मदेषु सर्वधा असि ॥ १ ॥
२ त्वं विप्रस् त्वं कविर् मधु प्र जातम् अन्धसः ।
मदेषु सर्वधा असि ॥ २ ॥
३ तव ... त्वे विश्वे सजोषसो देवासः पीतिम् आशत ।
मदेषु सर्वधा असि ॥ ३ ॥
९.१०८.१३ स सुन्वे यो वसूनां यो रायाम् आनेता य इडानाम् ।
सोमो यः सुक्षितीनाम् ॥ ४ ॥
१४ * न ... वार्यमणा (एवं कौ) * यस्य त इन्द्रः पिबाद् यस्य मरुतो यस्य वार्यमणा भगः ।
आ येन मित्रावरुणा करामह एन्द्रम् अवसे महे ॥ ५ ॥
९.१०५.१ तं वः सखायो मदाय पुनानम् अभि गायत ।
* * यज्ञैः * * शिशुं न हव्यैः स्वदयन्त गूर्तिभिः ॥ ६ ॥
२ सं वत्स इव मातृभिर् इन्दुर् हिन्वानो अज्यते ।
देवावीर् मदो मतिभिः परिष्कृतः ॥ ७ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३ कौ * * मधुमत्तरः *	अयं दक्षाय साधनो ऽयं शर्धाय वीतये । अयं देवेभ्यो मधुमत्तमः सुतः ॥ ८ ॥
९.१०१.१० * सुवाना ...	सोमाः पवन्त इन्दवो ऽस्मभ्यं गातुवित्तमाः । मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः ॥ ९ ॥
११ एते पूताः ... सूर्यासो...	ते पूतासो विपश्चितः सोमासो दध्याशिरः । सूरासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥ १० ॥
१२	सुष्वाणासो व्य् अद्रिभिश् चिताना गोर् अधि त्वचि । इषम् अस्मभ्यम् अभितः सम् अस्वरन् वसुविदः ॥ ११ ॥
९.९७.५२ * * अत्र * * जूतः पुरुमेधश् * * * दात्	अया पवा पवस्वैना वसूनि मांश्चत्व इन्दो सरसि प्र धन्व । ब्रध्नश् चिद् यस्य वातो न जूतिं पुरुमेधाश् चित् तकवे नरं धात् ॥ १२ ॥
५३	उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे । षष्टिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद् रणाय ॥ १३ ॥
५४	महीमे अस्य वृषनाम शूषे मांश्चत्वे वा पृशने वा वधत्रे । अस्वापयन् निगुतः स्नेहयच् चापामित्रं अपाचितो अचेतः ॥ १४ ॥
५.२४.१ .. भवा *	अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥ १५ ॥
२ ...द्युमत्तमं * *	वसुर् अग्निर् वसुश्रवा अच्छा नक्षि द्युमत्तमो रयिं दाः ॥ १६ ॥
४	तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनम् ईमहे सखिभ्यः ॥ १७ ॥
१०.१५७.१ ...सीषधामेन्द्रश्...	इमा नु कं भुवना सीषधेमेन्द्रश् च विश्वे च देवाः ॥ १८ ॥
२ ...चीक्लृपाति }	यज्ञं च नस् तन्वं च प्रजां चादित्यैर् इन्द्रः सह सीषधातु ॥ १९ ॥
३ * * * * अस्माकं भूत्ववविता [तनूनाम्	आदित्यैर् इन्द्रः सगणो मरुद्भिर् अस्मभ्यं भेषजा करत् ॥ २० ॥
ऋग्वेदे न सन्ति	प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते ॥ २१ ॥ अर्चन्त्य् अर्कं मरुतः स्वर्का आ स्तोभति श्रुतो युवा स इन्द्रः ॥ २२ ॥ उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र ॥ २३ ॥ ॥३४॥
	३.३५
ऋ ९.९७.७	प्र काव्यम् उशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति । महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्य् एति रेभन् ॥ १ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८ * * तृपलं मन्युम् * * *	प्र हंसासस् तृपला वग्नुम् अच्छामाद् अस्तं वृषगणा अयासुः ।
आङ्गूष्यं * * * साकं * * वाणम्	अङ्गोषिणं पवमानं सखायो दुर्मर्षं वाणं प्र वदन्ति साकम् ॥ २ ॥
९ * रंहत ...	स योजत उरुगायस्य जूतिं वृथा क्रीडन्तं मिमते न गावः । परीणसं कृणुते तिग्मशृङ्गो दिवा हरिर् ददृशे नक्तम् ऋज्रः ॥ ३ ॥
९.१०.१	प्र स्वानासो रथा इवार्वन्तो न श्रवस्यवः । सोमासो राये अक्रमुः ॥ ४ ॥
२	हिन्वानासो रथा इव दधन्विरे गभस्त्योः । भरासः कारिणाम् इव ॥ ५ ॥
३	राजानो न प्रशस्तिभिः सोमासो गोभिर् अञ्जते । यज्ञो न सप्त धातृभिः ॥ ६ ॥
४ * सुवानास ... सुता ...	परि स्वानास इन्दवो मदाय बर्हणा गिरा । मधो अर्षन्ति धारया ॥ ७ ॥
५ * * जनन्त ...	आपानासो विवस्वतो जिन्वन्त उषसो भगम् । सूरा अण्वं वि तन्वते ॥ ८ ॥
६	अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः । वृष्णो हरस आयवः ॥ ९ ॥
८ * * * * * चक्षुश्चित्सूर्यें सचा	नाभा नाभिं न आ ददे चक्षुषा सूर्यं दृशे । कवेर् अपत्यम् आ दुहे ॥ १० ॥ ॥३५॥

३.३६

क ९.१०.७ * आसते ... । कौ ... सप्त- [जानयः	समीचीनास आशत होतारः सप्तजामयः । पदम् एकस्य पिप्रतः ॥ १ ॥
९ * प्रिया ...	अभि प्रियं दिवस् पदम् अध्वर्युभिर् गुहा हितम् । सूरः पश्यति चक्षसा ॥ २ ॥
९.७.१ * * योजनम्	असृग्रम् इन्दवः पथा धर्मन्न् ऋतस्य सुश्रियः । विदाना अस्य योजना ॥ ३ ॥
२ * * मध्वो ...	प्र धारा मधो अग्रियो महीर् अपो वि गाहते । हविर् हविःषु वन्द्यः ॥ ४ ॥
३ * युजो * * वृषाव चक्रदद् *	प्र युजा वाचो अग्रियो वृषो अचिक्रदद् वने । सद्माभि सत्यो अध्वरः ॥ ५ ॥
४ ... वसानो *	परि यत् काव्या कविर् नृम्णा पुनानो अर्षति । स्वर् वाजी सिषासति ॥ ६ ॥
५	पवमानो अभि स्पृधो विशो राजेव सीदति । यद् ईम् ऋण्वन्ति वेधसः ॥ ७ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६ अव्यो...	अव्या वारे परि प्रियो हरिर् वनेषु सीदति ।
...मती (एवं कौ)	रेभो वनुष्यते मती ॥ ८ ॥
७	स वायुम् इन्द्रम् अश्विना साकं मदेन गच्छति ।
...धर्मभिः	रणा यो अस्य धर्मणा ॥ ९ ॥
८ * मित्रावरुणा भगं मध्वः * *	आ मित्रे वरुणे भगे मधोः पवन्त ऊर्मयः ।
	विदाना अस्य शक्मभिः ॥ १० ॥ ॥३६॥

३.३७

ऋ ९.७.९	अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये ।
	श्रवो वसूनि सं जितम् ॥ १ ॥
९.६५.२८	आ ते दक्षं मयोभुवं वह्निम् अद्या वृणीमहे ।
	पान्तम् आ पुरुस्पृहम् ॥ २ ॥
२९	आ मन्द्रम् आ वरेण्यम् आ विप्रम् आ मनीषिणम् ।
	पान्तम् आ पुरुस्पृहम् ॥ ३ ॥
३०	आ रयिम् आ सुचेतनम् आ सुक्रतो तनूष्व् आ ।
	पान्तम् आ पुरुस्पृहम् ॥ ४ ॥ ॥३७॥

३.३८

अन्यत्र संहितासु न सन्ति	वैश्वानरो अजीजनद् अग्निर् नो नव्यसीं मतिम् ।
	क्षमया वृधा न ओजसा ॥ १ ॥
	दिवि पृष्टो अरोचताग्निर् वैश्वानरो बृहत् ।
	ज्योतिषा बाधते तमः ॥ २ ॥
	स नः पावक दीदिह्य् अग्ने वैश्वानर द्युमान् ।
	जमदग्नेर् भराहुतः ॥ ३ ॥
ऋ ६.७.१	मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरम् ऋत आ जातम् अग्निम् ।
* * * * आसन्ना...	कविं सम्राजम् अतिथिं जनानाम् आसन्नः पात्रं जनयन्त देवाः ॥ ४ ॥
४	त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते ।
	तव क्रतुभिर् अमृतत्वम् आयन् वैश्वानर यत् पित्रोर् अदीदेः ॥ ५ ॥
२	नाभिं यज्ञानां सदनं रयीणां महाम् आहावम् अभि सं नवन्त ।
	वैश्वानरं रथ्यम् अध्वराणां यज्ञस्य केतुं जनयन्त देवाः ॥ ६ ॥
५.६८.१	प्र वो मित्राय गायत वरुणाय विपा गिरा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	महिक्षत्राव् ऋतं बृहत् ॥ ७ ॥
२	सम्राजा या घृतयोनी मित्रश् चोभा वरुणश् च ।
	देवा देवेषु प्रशस्ता ॥ ८ ॥
३	ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य ।
	महि वां क्षत्रं देवेषु ॥ ९ ॥
१.३.४	इन्द्रा याहि चित्रभानो सुता इमे त्वायवः ।
	अण्वीभिस् तना पूतासः ॥ १० ॥
५	इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः ।
	उप ब्रह्माणि वाघतः ॥ ११ ॥
६	इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः ।
	सुत दधिष्व नश् चनः ॥ १२ ॥ ॥३८॥
	३.३९
ऋ ९.८६.१६	प्रो अयासीद् इन्दुर् इन्द्रस्य निष्कृतं सखा सख्युर् न प्र मिनाति संगिरम् ।
...शतयाम्ना	मर्य इव युवतिभिः सम् अर्षति सोमः कलशे शतयामना पथा ॥ १ ॥
१७ ...संवसनेषु	प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवरणेष्व् अक्रमुः ।
सोमं मनीषा * * * * * पयसेम्	हरिं क्रीडन्तम् अभ्य् अनूषत स्तुभो ऽभि धेनवः पयसेद् अशिश्रयुः ॥ २ ॥
१८	आ नः सोम संयतं पिप्युषीम् इषम् इन्दो पवस्व पवमान ऊर्मिणा ।
अस्रिधम्	या नो दोहते त्रिर् अहन्न् असश्चुषी क्षुमद् वाजवन् मधुमत् सुवीर्यम् ॥ ३ ॥
८.७०.३	नकिष् टं कर्मणा नशद् यश् चकार सदावृधम् ।
...धृष्ण्वोजसम् {	इन्द्रं न यज्ञैर् विश्वगूर्तम् ऋभ्वसम् अधृष्टं धृष्णुम् ओजसा ॥ ४ ॥
४	अषाढम् उग्रं पृतनासु सासहिं यस्मिन् महीर् उरुज्रयः ।
* * * * द्यावः क्षामो (कौ द्यावः क्षामीर्) * }	सं धेनवो जायमाने अनोनवुर् प्राव क्षामैर् अनोनवुः ॥ ५ ॥ ॥३९॥
	३.४०
ऋ ९.१०८.५ * * * * ऽव्यो ...	एष स्य धारया सुतो ऽव्या वारेभिः पवते मदिन्तमः ।
	क्रीडन्न् ऊर्मिर् अपाम् इव ॥ १ ॥
६ * * अप्या अन्तरश्मनो * * *	य उस्रिया अपिया अन्तर् अश्मनि निर् गा अकृन्तद् ओजसा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	अभि व्रजं तत्निषे गव्यम् अश्व्यं वर्मीव धृष्णव् आ
रुज (एवं कौ)	रुजा ॥ २ ॥
९.१०४.१	सखाय आ नि षीदत पुनानाय प्र गायत ।
	शिशुं न यज्ञैः परि भूषत श्रिये ॥ ३ ॥
२ ...गयसाधनम् (एवं कौ)	सम् ई वत्सं न मातृभिः सृजता गायसाधनम् ।
	देवाव्यं मदम् अभि द्विशवसम् ॥ ४ ॥
३	पुनाता दक्षसाधनं यथा शर्धाय वीतये ।
...शंतमः	यथा मित्राय वरुणाय शंतमम् ॥ ५ ॥
९.१०९.१६ * सुवानो...	प्र वाज्य् अक्षाः सहस्रधारस् तिरः पवित्रं वि वारम्
	अव्यम् ॥ ६ ॥
१७	स वाज्य् अक्षाः सहस्ररेता अद्भिर् मृजानो गोभिः
	श्रीणानः ॥ ७ ॥
१८ ...येमानो *	प्र सोम याहीन्द्रस्य कुक्षा नृभिर् येमाणो अद्रिभिः
	सुतः ॥ ८ ॥
९.६५.२२	ये सोमासः परावति ये अर्वावति सुन्विरे ।
	ये वादः शर्यणावति ॥ ९ ॥
२३	य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम् ।
	ये वा जनेषु पञ्चसु ॥ १० ॥
२४	ते नो वृष्टिं दिवस् परि पवन्ताम् आ सुवीर्यम् ।
सुवाना...	स्वाना देवास इन्दवः ॥ ११ ॥
८.११.७	आ ते वत्सो मनो यमत् परमाच् चित् सधस्थात् ।
* त्वांकामया *	अग्ने त्वां कामये गिरा ॥ १२ ॥
८ * * * * विशो...	पुरुत्रा हि सदृङ्ङ् असि दिशो विश्वा अनु प्रभुः ।
	समत्सु त्वा हवामहे ॥ १३ ॥
९	समत्स्व् अग्निम् अवसे वाजयन्तो हवामहे ।
	वाजेषु चित्रराधसम् ॥ १४ ॥
८.९८.१०	त्वं न इन्द्रा भर ओजो नृम्णं शतक्रतो विचर्षणे ।
* * पृतनाषहम्	आ वीरं पृतनासहम् ॥ १५ ॥
११	त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ ।
अधा...	अथा ते सुम्नम् ईमहे ॥ १६ ॥
१२ ...शतक्रतो	त्वां शुष्मिन् पुरुहूत वाजयन्तम् उप ब्रुवे सहस्कृत ।
	स नो रास्व सुवीर्यम् ॥ १७ ॥
५.३९.१ * * * मेहनास्ति * *	यद् इन्द्र चित्र म इह नास्ति त्वादातम् अद्रिवः ।
	राधस् तन् नो विदद्वस उभयाहस्त्य् आ भर ॥ १८ ॥
३ * * दित्सु...	यत् ते दिक्षु प्रराध्यं मनो अस्ति श्रुतं बृहत् ।
	तेन दृढा चिद् अद्रिव आ वाजं दर्षि सातये ॥ १९ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२	यन् मन्यसे वरेण्यम् इन्द्र द्युक्षं तद् आ भर ।
कौ ...दांवनंः	विद्याम तस्य ते वयम् अकूपारस्य दावने ॥ २० ॥ ॥४०॥
	३.४१
ऋ ९.९६.१७ ...वर्हिं * *	शिशुं जज्ञानं हर्यतं मृजन्ति शुम्भन्ति विप्रं मरुतो गणेन ।
	कविर् गीर्भिः काव्येन कविः सन् सोमः पवित्रम् अत्य् एति रेभन् ॥ १ ॥
१८ ...सहस्रणीथः * *	ऋषिमना य ऋषिकृत् स्वर्षाः सहस्रनीथः पदवीः कवीनाम् ।
	तृतीयं धाम महिषः सिषासन् सोमो विराजम् अनु राजति ष्टुप् ॥ २ ॥
१९	चमूषच् छ्येनः शकुनो विभृत्वा गोविन्दुर् द्रप्स आयुधानि बिभ्रत् ।
	अपाम् ऊर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥ ३ ॥
९.८.१	एते सोमा अभि प्रियम् इन्द्रस्य कामम् अक्षरन् ।
	वर्धन्तो अस्य वीर्यम् ॥ ४ ॥
२	पुनानासश् चमूषदो गच्छन्तो वायुम् अश्विना ।
* * धान्तु *	ते नो धत्त सुवीर्यम् ॥ ५ ॥
३	इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय ।
ऋतस्य * *	देवानां योनिम् आसदम् ॥ ६ ॥
४	मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः ।
	अनु विप्रा अमादिषुः ॥ ७ ॥
५	देवेभ्यस् त्वा मदाय कं सृजानम् अति मेष्यः ।
	सं गोभिर् वासयामसि ॥ ८ ॥
६	पुनानः कलशेष्व् आ वस्त्राण्य् अरुषो हरिः ।
	परि गव्यान्य् अव्यत ॥ ९ ॥
७	मघोन आ पवस्व नो जहि विश्वा अप द्विषः ।
	इन्दो सखायम् आ विश ॥ १० ॥ ॥४१॥
	३.४२
ऋ ९.८.९	नृचक्षसं त्वा वयम् इन्द्रपीतं स्वर्विदम् ।
	भक्षीमहि प्रजाम् इषम् ॥ १ ॥
८	वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि ।
	सहो नः सोम पृत्सु धाः ॥ २ ॥
९.१३.१	सोमः पुनानो अर्षति सहस्रधारो अत्यविः ।
	वायोर् इन्द्रस्य निष्कृतम् ॥ ३ ॥
२	पवमानम् अवस्यवो विप्रम् अभि प्र गायत ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	सुष्वाणं देववीतये ॥ ४ ॥
३	पवन्ते वाजसातये सोमाः सहस्रपाजसः ।
	गृणाना देववीतये ॥ ५ ॥
४	उत नो वाजसातये पवस्व बृहतीर् इषः ।
	द्युमद् इन्दो सुवीर्यम् ॥ ६ ॥
५	ते नः सहस्रिणं रयिं पवन्ताम् आ सुवीर्यम् ।
सुवाना * *	स्वाना देवास इन्दवः ॥ ७ ॥
६	अत्या हियाना न हेतृभिर् असृग्रं वाजसातये ।
	वि वारम् अव्यम् आशवः ॥ ८ ॥
७ ...धेनवः	वाश्रा अर्षन्तीन्दवो ऽभि वत्सं न मातरः ।
	दधन्विरे गभस्त्योः ॥ ९ ॥
८	जुष्ट इन्द्राय मत्सरः पवमानः कनिक्रदत् ।
	विश्वा अप द्विषो जहि ॥ १० ॥ ॥४२॥
	३.४३
ऋ ९.१३.९	अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः ।
	योनाव् ऋतस्य सीदत ॥ १ ॥
९.१२.१ ...सादने	सोमा असृग्रम् इन्दवः सुता ऋतस्य धारया ।
	इन्द्राय मधुमत्तमाः ॥ २ ॥
२ ...मातरः	अभि विप्रा अनूषत गावो वत्सं न धेनवः ।
	इन्द्रं सोमस्य पीतये ॥ ३ ॥
३	मदच्युत् क्षेति सादने सिन्धोर् ऊर्मा विपश्चित् ।
	सोमो गौरी अधि श्रितः ॥ ४ ॥
४ * * * ऽव्यो...	दिवो नाभा विचक्षणो अव्या वारे महीयते ।
	सोमो यः सुक्रतुः कविः ॥ ५ ॥
५	यः सोमः कलशेष्व् आ अन्तः पवित्र आहितः ।
	तम् इन्दुः परि षस्वजे ॥ ६ ॥
६	प्र वाचम् इन्दुर् इष्यति समुद्रस्याधि विष्टपि ।
	जिन्वन् कोशं मधुश्चुतम् ॥ ७ ॥
७ * * धीनाम् * सबर्दुघः	नित्यस्तोत्रो वनस्पतिर् धेनाम् अन्तः सबर्दुघाम् ।
...युगा	हिन्वानो मानुषा युजा ॥ ८ ॥
९	आ पवमान धारय रयिं सहस्रवर्चसम् ।
	अस्मे इन्दो स्वाभुवम् ॥ ९ ॥
८ अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति । विप्रस्य धारया कविः ॥ कौ द्वितीयस्मिन् पादे विप्रः स * *	अभि प्रिया दिवः कविर् विप्रस्य धारया सुतः । सोमो हिन्वे परावति ॥ १० ॥ ॥४३॥
	३.४४
ऋ ९.५०.१	उत् ते शुष्मास ईरते सिन्धोर् ऊर्मेर् इव स्वनः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	वाणस्य चोदया पविम् ॥ १ ॥
२	प्रसवे त उद् ईरते तिस्रो वाचो मखस्युवः ।
	यद् अव्य एषि सानवि ॥ २ ॥
३ अव्यो वारे...	अव्या वारैः परि प्रियं हरिं हिन्वन्त्य् अद्रिभिः ।
	पवमानं मधुश्चुतम् ॥ ३ ॥
४	आ पवस्व मदिन्तम पवित्रं धारया कवे ।
	अर्कस्य योनिम् आसदम् ॥ ४ ॥
५	स पवस्व मदिन्तम गोभिर् अञ्जानो अक्तुभिः ।
इन्दविन्द्राय पीतये	एन्द्रस्य जठरं विश ॥ ५ ॥
९.६१.२२	स पवस्व य आविथेन्द्रं वृत्राय हन्तवे ।
	वव्रिवांसं महीर् अपः ॥ ६ ॥
२४ ...आसुरः	त्वोतासस् तवावसा स्याम वन्वन्तः किकरः ।
	सोम व्रतेषु जागृहि ॥ ७ ॥
२३	सुवीरासो वयं धना जयेम सोम मीढ्वः ।
	पुनानो वर्ध नो गिरः ॥ ८ ॥
२५	अपघ्नन् पवते मृधो ऽप सोमो अराव्णः ।
	गच्छन्न् इन्द्रस्य निष्कृतम् ॥ ९ ॥
२७	न त्वा शतं चन ह्रुतो राधो दित्सन्तम् आ मिनन् ।
	यत् पुनानो मखस्यसे ॥ १० ॥ ॥४४॥
	३.४५
ऋ ९.६१.२६	महो नो राय आ भर पवमान जही मृधः ।
	रास्वेन्दो वीरवद् यशः ॥ १ ॥
१	अया वीती परि स्रव यस् त इन्दो मदेष्व् आ ।
	अवाहन् नवतीर् नव ॥ २ ॥
२	पुरः सद्य इत्थाधिये दिवोदासाय शंबरम् ।
	अध त्यं तुर्वशं यदुम् ॥ ३ ॥
३ * णो ..	परि नो अश्वम् अश्वविद् गोमद् इन्दो हिरण्यवत् ।
	क्षरा सहस्रिणीर् इषः ॥ ४ ॥ ॥४५॥
	३.४६
ऋ ८.४३.१४	त्वं ह्य् अग्ने अग्निना विप्रो विप्रेण सन् सता ।
	सखा सख्या समिध्यसे ॥ १ ॥
१५ स त्वं विप्राय दाशुषे * * *	त्वं सुन्वते यजमानाय रयिं देहि सहस्रिणम् ।
	अग्ने वीरवतीम् इषम् ॥ २ ॥
१६	अग्ने भ्रातः सहस्कृत रोहिदश्व शुचिव्रत ।
...मे	इमं स्तोमं जुषस्व नः ॥ ३ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

७.३.१	अग्निं वो देवम् अग्निभिः सजोषा यजिष्ठं दूतम् अध्वरे कृणुध्वम् ।
	यो मर्त्येषु निध्रुविर् ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥ ४ ॥
२	प्रोथद् अश्वो न यवसे ऽविष्यन् यदा महः संवरणाद् व्य् अस्थात् ।
	आद् अस्य वातो अनु वाति शोचिर् अध स्म ते व्रजनं कृष्णम् अस्ति ॥ ५ ॥
३	उद् यस्य ते नवजातस्य वृष्णो ऽग्ने चरन्त्य् अजरा इधानाः ।
* * * * एति ...	अच्छा द्याम् अरुषो धूम एषि सं दूतो अग्न ईयसे हि देवान् ॥ ६ ॥
७.६६.४	यद् अद्य सूर उदिते अनागा मित्रो अर्यमा ।
	सुवाति सविता भगः ॥ ७ ॥
५	सुप्रावीर् अस्तु स क्षयः प्र नु यामन् सुदानवः ।
	यो नो अंहो ऽतिपिप्रति ॥ ८ ॥
६	उत स्वराजो अदितिर् अदब्धस्य व्रतस्य ये ।
	महो राजान ईशते ॥ ९ ॥
८.९३.७	तम् इन्द्रं वाजयामसि महे वृत्राय हन्तवे ।
	स वृषा वृषभो भुवत् ॥ १० ॥
८...मदे *	इन्द्रः स दामने कृत ओजिष्ठः स बले हितः ।
	द्युम्नी श्लोकी स सोम्यः ॥ ११ ॥
९	गिरा वज्रो न संभृतः सबलो अनपच्युतः ।
* ऋष्वो *	ववक्ष उग्रो अस्तृतः ॥ १२ ॥ ॥४६॥
	३.४७
ऋ ९.५१.१ ...सृज	अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ नय ।
पुनीहीन्द्राय *	पुनाहीन्द्राय पातवे ॥ १ ॥
३ ...अश्नते	तव त्य इन्दो अन्धसो देवा मधोर् व्य् आशत ।
	पवमानस्य मरुतः ॥ २ ॥
२	दिवः पीयूषम् उत्तमं सोमम् इन्द्राय वज्रिणे ।
	सुनोता मधुमत्तमम् ॥ ३ ॥
९.७६.१	धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानाम् अनुमाद्यो नृभिः ।
...कृणुते	हरिः सृजानो अत्यो न सत्वभिर् वृथा पाजांसि कृणुषे नदीष्व् आ ॥ ४ ॥
२	शूरो न धत्त आयुधा गभस्त्योः स्वः सिषासन् रथिरो गविष्टिषु ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	इन्द्रस्य शुष्मम् ईरयन्न् अपस्युभिर् इन्दुर् हिन्वानो अज्यते मनीषिभिः ॥ ५ ॥
३	इन्द्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्व् आ विश ।
कौ * नः ... न * *	प्र णः पिन्व विद्युद् अभ्रेव रोदसी धिया नो वाजं उप
कौ माहि *	मासि शश्वतः ॥ ६ ॥
८.४.१	यद् इन्द्र प्राग् अपाग् उदङ् न्यग् वा हूयसे नृभिः ।
	सिमा पुरू नृषूतो अस्य् आनवे ऽसि प्रशर्ध तुर्वशे ॥ ७ ॥
२	यद् वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा ।
* * ब्रह्मभिः स्तोमवाहस ...	कण्वासस् त्वा स्तोमेभिर् ब्रह्मवाहस इन्द्रा यच्छन्त्य् आ गहि ॥ ८ ॥
८.६१.१	उभयं शृणवच् च न इन्द्रो अर्वाग् इदं वचः ।
* मघवा...	सत्राच्या मघवान् सोमपीतये धिया शविष्ठ आ गमत् ॥ ९ ॥
२ ...ओजसे * *	तं हि स्वराजं वृषभं तम् ओजसा धिषणे निष्टतक्षतुः ।
	उतोपमानां प्रथमो नि षीदसि सोमकामं हि ते मनः ॥ १० ॥ ॥४७॥

३.४८

ऋ ९.६३.२२ * देवायुषग्...	पवस्व देव आयुषग् इन्द्रं गच्छतु ते मदः ।
	वायुम् आ रोह धर्मणा ॥ १ ॥
२३	पवमान नि तोशसे रयिं सोम श्रवाय्यम् ।
प्रियः...	इन्दो समुद्रम् आ विश ॥ २ ॥
२४	अपघ्नन् पवसे मृधः क्रतुवित् सोम मत्सरः ।
	नुदस्वादेवयुं जनम् ॥ ३ ॥
९.९८.१ अभि...पुरुस्पृहम्	अभी नो वाजसातमं रयिम् अर्ष शतस्पृहम् ।
...विभ्वासहम्	इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ॥ ४ ॥
३ * ष्य सुवानो अक्षा...	परि स्य स्वानो अक्षरद् इन्दुर् अव्ये मदच्युतः ।
* * * * * नैति *	धारा य ऊर्ध्वो अध्वरे भ्राजा न याति गव्ययुः ॥ ५ ॥
५ * * * वृत्रहन्वसो वस्वः *	वयं ते अस्य राधसो वसोर् वसो पुरुस्पृहः ।
* * * * सुम्नस्याध्रिगो	नि नेदिष्ठतमा इषः स्याम सुम्ने ते अध्रिगो ॥ ६ ॥
९.१०९.४	पवस्व सोम महान् समुद्रः पिता देवानां विश्वाभि धाम ॥ ७ ॥
५ ...प्रजायै	शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजाभ्यः ॥ ८ ॥
६	दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन् वाजी पवस्व ॥ ९ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८.८४.१	प्रेष्ठं वो अतिथिं स्तुषे मित्रम् इव प्रियम् ।
अग्निं…	अग्ने रथं न वेद्यम् ॥ १० ॥
२ * * प्रचेतसं * * अध *	कविम् इव प्रशंस्यं यं देवास इति द्विता ।
	नि मर्त्येष्वू आदधुः ॥ ११ ॥
३ …श्रृणुधी *	त्वं यविष्ठ दाशुषो नॄंः पाहि श्रृणुही गिरः ।
	रक्षा तोकम् उत त्मना ॥ १२ ॥
८.९८.४ …प्रियः * अगोह्यः	एन्द्र नो गधि प्रिय सत्राजिद् अगोह्य ।
* * विश्वतस्…	गिरिर् न विश्वतः पृथुः पतिर् दिवः ॥ १३ ॥
५	अभि हि सत्य सोमपा उभे बभूथ रोदसी ।
	इन्द्रासि सुन्वतो वृधः पतिर् दिवः ॥ १४ ॥
६ …दर्ता * *	त्वं हि शश्वतीनाम् इन्द्र धर्ता पुराम् असि ।
	हन्ता दस्योर् मनोर् वृधः पतिर् दिवः ॥ १५ ॥
१.११.४	पुरां भिन्दुर् युवा कविर् अमितौजा अजायत ।
	इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥ १६ ॥
५	त्वं वलस्य गोमतो ऽपावर् अद्रिवो बिलम् ।
* देवा (एवं कां)…	त्वां देवासो अभिभ्युषस् तुज्यमानास आविषुः ॥ १७ ॥
६	तवाहं शूर रातिभिः प्रत्यू आयं सिन्धुम् आवदन् ।
	उपातिष्ठन्त गिर्वणो विदुष् टे तस्य कारवः ॥ १८ ॥ ॥४८॥

३.४९

ऋ ९.९७.४०	अक्रान् समुद्रः प्रथमे विधर्मन् जनयन् प्रजा भुवनस्य
राजा	गोपाः ।
…सुवान	वृषा पवित्रे अधि सानो अव्ये बृहत् सोमो वावृधे स्वानो
इन्दुः	अद्रिः ॥ १ ॥
४१	महत् तत् सोमो महिषश् चकारापां यद् गर्भो ऽवृणीत
	देवान् ।
	अदधाद् इन्द्रे पवमान ओजो ऽजनयत् सूर्ये ज्योतिर्
	इन्दुः ॥ २ ॥
४२ * * * * च * * *	मत्सि वायुम् इष्टये राधसे नो मत्सि मित्रावरुणा पूयमानः ।
	मत्सि शर्धो मारुतं मत्सि देवान् मत्सि द्यावापृथिवी देव
	सोम ॥ ३ ॥
९.३.१ …दीयति	एष देवो अमर्त्यः पर्णवीर् इव दीयते ।
	अभि द्रोणान्य् आसदम् ॥ ४ ॥
२	एष देवो विपा कृतो अति ह्वरांसि धावति ।
	पवमानो अदाभ्यः ॥ ५ ॥
३	एष देवो विपन्युभिः पवमान ऋतायुभिः ।
	हरिर् वाजाय मृज्यते ॥ ६ ॥

Funding by IKS-MoE

४	एष विश्वानि वार्या शूरो यन्न् इव सत्वभिः ।
	पवमानः सिषासति ॥ ७ ॥
५ ...दशस्यति	एष देवो रथर्यति पवमानो दिशस्यति ।
	आविष् कृणोति वग्वनुम् ॥ ८ ॥
६	एष विप्रैर् अभिष्टुतो ऽपो देवो वि गाहते ।
	दधद् रत्नानि दाशुषे ॥ ९ ॥
७	एष दिवं वि धावति तिरो रजांसि धारया ।
	पवमानः कनिक्रदत् ॥ १० ॥ ॥४९॥

३.५०

ऋ ९.३.८	एष दिवं व्य् आसरत् तिरो रजांस्य् अस्तृतः ।
	पवमानः स्वध्वरः ॥ १ ॥
९	एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।
	हरिः पवित्रे अर्षति ॥ २ ॥
१०	एष उ स्य पुरुव्रतो जज्ञानो जनयन्न् इषः ।
	धारया पवते सुतः ॥ ३ ॥
९.१५.१	एष धिया यात्य् अण्व्या शूरो रथेभिर् आशुभिः ।
	गच्छन्न् इन्द्रस्य निष्कृतम् ॥ ४ ॥
२	एष पुरू धियायते बृहते देवतातये ।
* आसते	यत्रामृतास आशत ॥ ५ ॥
३ ...शुभ्रावता *	एष हितो वि नीयते ऽन्तः शुन्ध्यावता पथा ।
	यदी तुञ्जन्ति भूर्णयः ॥ ६ ॥
५	एष रुक्मिभिर् ईयते वाजी शुभ्रेभिर् अंशुभिः ।
	पतिः सिन्धूनां भवन् ॥ ७ ॥
४	एष शृङ्गाणि दोधुवच् छिशीते यूथ्यो वृषा ।
	नृम्णा दधान ओजसा ॥ ८ ॥
६ * * पिब्दना...	एष वसूनि पिब्दनः परुषा ययिवं अति ।
	अव शादेषु गच्छति ॥ ९ ॥
७	एतं मृजन्ति मर्ज्यम् उप द्रोणेष्व् आयवः ।
	प्रचक्राणं महीर् इषः ॥ १० ॥ ॥५०॥

३.५१

ऋ ९.१५.८ * * * * * मृजन्ति सप्त	एतम् उ त्यं दश क्षिपो हरिं हिन्वन्ति यातवे ।
[धीतयः	स्वायुधं मदिन्तमम् ॥ १ ॥
९.२७.१	एष कविर् अभिष्टुतः पवित्रे अधि तोशते ।
...स्त्रिधः	पुनानो घ्नन्न् अप द्विषः ॥ २ ॥
२	एष इन्द्राय वायवे स्वर्जित् परि षिच्यते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	पवित्रे दक्षसाधनः ॥ ३ ॥
३	एष नृभिर् वि नीयते दिवो मूर्धा वृषा सुतः ।
	सोमो वनेषु विश्ववित् ॥ ४ ॥
४	एष गव्युर् अचिक्रदत् पवमानो हिरण्ययुः ।
	इन्दुः सत्राजिद् अस्तृतः ॥ ५ ॥
९.२८.६ * * * सोमः पुनानो	एष शुष्म्य् अदाभ्यः सोमो वाजम् इवासरत् ।
[अर्षति (एवं कौ)	देवावीर् अघशंसहा ॥ ६ ॥
९.२७.६	एष शुष्म्य् असिष्यदद् अन्तरिक्षे वृषा हरिः ।
	पुनान इन्दुर् इन्द्रम् आ ॥ ७ ॥
९.२८.१ ...विश्वविन् (एवं कौ) * *	एष वाजी हितो नृभिर् विश्वाविन् मनसस् पतिः ।
अव्यो ...	अव्यं वारं वि धावति ॥ ८ ॥
२	एष पवित्रे अक्षरत् सोमो देवेभ्यः सुतः ।
* धामान्य् (एवं कौ) *	विश्वा वसून्य् आविशन् ॥ ९ ॥
३	एष देवः शुभायते ऽधि योनाव् अमर्त्यः ।
	वृत्रहा देववीतमः ॥ १० ॥ ॥५१॥
	३.५२
ऋ ९.२८.४	एष वृषा कनिक्रदद् दशभिर् जामिभिर् यतः ।
	अभि द्रोणानि धावति ॥ १ ॥
९.२७.५ कौ एष सूर्यमरोचयत् * * *	एष सूर्येण हासते पवमानो अधि द्यवि ।
	पवित्रे मत्सरो मदः ॥ २ ॥
९.२८.५	एष सूर्यम् अरोचयत् पवमानो विचर्षणिः ।
* धामानि *	विश्वा वसूनि विश्ववित् ॥ ३ ॥
९.३८.१ ...ऽव्यो * *	एष उ स्य वृषा रथो ऽव्या वारेभिर् अर्षति ।
	गच्छन् वाजं सहस्रिणम् ॥ ४ ॥
२	एतं त्रितस्य योषणो हरिं हिन्वन्त्य् अद्रिभिः ।
	इन्दुम् इन्द्राय पीतये ॥ ५ ॥
३	एतं त्यं हरितो दश मर्मृज्यन्ते अपस्युवः ।
	याभिर् मदाय शुम्भते ॥ ६ ॥
४	एष स्य मानुषीष्व् आ श्येनो न विक्षु सीदति ।
	गच्छन् जारो न योषितम् ॥ ७ ॥
६	एष स्य पीतये सुतो हरिर् अर्षति धर्णसिः ।
	क्रन्दन् योनिम् अभि प्रियम् ॥ ८ ॥
५	एष स्य मद्यो रसो ऽव चष्टे दिवः शिशुः ।
	य इन्दुर् वारम् आविशत् ॥ ९ ॥
९.३७.१	स सुतः पीतये वृषा सोमः पवित्रे अर्षति ।
	विघ्नन् रक्षांसि देवयुः ॥ १० ॥ ॥५२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३.५३

ऋ ९.३७.२ स पवित्रे विचक्षणो हरिर् अर्षति धर्णसिः ।
अभि योनिं कनिक्रदत् ॥ १ ॥
३ * * रोचना... स वाजी रोचनं दिवः पवमानो वि धावति ।
रक्षोहा वारम् अव्ययम् ॥ २ ॥
४ स त्रितस्याधि सानवि पवमानो अरोचयत् ।
जामिभिः सूर्यं सह ॥ ३ ॥
५ स वृत्रहा वृषा सुतो वरिवोविद् अदाभ्यः ।
सोमो वाजम् इवासरत् ॥ ४ ॥
६ स देवः कविनेषितो ऽभि द्रोणानि धावति ।
* * मंहना इन्दुर् इन्द्राय मंहयन् ॥ ५ ॥
९.६६.१० पवमानस्य ते कवे वाजिन् सर्गा असृक्षत ।
अर्वन्तो न श्रवस्यवः ॥ ६ ॥
११ अच्छा कोशं मधुश्चुतम् असृग्रं वारे अव्यये ।
अवावशन्त धीतयः ॥ ७ ॥
१२ अच्छा समुद्रम् इन्दवो ऽस्तं गावो न धेनवः ।
अग्मन्न् ऋतस्य योनिम् आ ॥ ८ ॥ ॥५३॥

३.५४

ऋ ६.१६.३७ उप त्वा रण्वसंदृशं प्रयस्वन्तः सहस्कृत ।
अग्ने ससृज्महे गिरः ॥ १ ॥
३८ उप छायाम् इव घृणेर् अगन्म शर्म ते वयम् ।
अग्ने हिरण्यसंदृशः ॥ २ ॥
३९ य उग्र इव शर्यहा तिग्मशृङ्गो न वंसगः ।
अग्ने पुरो रुरोजिथ ॥ ३ ॥
७.१२.१ अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे ।
चित्रभानुं रोदसी अन्तर् ऊर्वी स्वाहुतं विश्वतः
प्रत्यञ्चम् ॥ ४ ॥
२ स मह्ना विश्वा दुरितानि साह्वान् अग्निः ष्टवे दम आ
जातवेदाः ।
स नो रक्षिषद् दुरिताद् अवद्याद् अस्मान् गृणत उत नो
मघोनः ॥ ५ ॥
३ त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर् वसिष्ठाः ।
त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः
सदा नः ॥ ६ ॥
७.६६.१ प्र मित्रयोर् वरुणयोः स्तोमो न एतु शूष्यः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	नमस्वान् तुविजातयोः ॥ ७ ॥
२	या धारयन्त देवाः सुदक्षा दक्षपितरा ।
	असुर्याय प्रमहसा ॥ ८ ॥
३	ता नः स्तिपा तनूपा वरुणा जरितॄणाम् ।
	मित्र साधयतं धियः ॥ ९ ॥
८.६.१	महं इन्द्रो य ओजसा पर्जन्यो वृष्टिमं इव ।
	स्तोमैर् वत्सस्य वावृधे ॥ १० ॥
३	कण्वा इन्द्रं यद् अक्रत स्तोमैर् यज्ञस्य साधनम् ।
* * आयुधम्	जामि ब्रुवत आयुधा ॥ ११ ॥
२	प्रजाम् ऋतस्य पिप्रतः प्र यद् भरन्त वह्नयः ।
	विप्रा ऋतस्य वाहसा ॥ १२ ॥ ॥५४॥
	३.५५
ऋ ९.६६.२५ * जंघ्नतो...	पवमानस्य जिघ्नतो हरेश् चन्द्रा असृक्षत ।
	जीरा अजिरशोचिषः ॥ १ ॥
२६	पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः ।
	हरिश्चन्द्रो मरुद्गणः ॥ २ ॥
२७ पवमानो * अश्नवद्...	पवमान व्य् अश्नुहि रश्मिभिर् वाजसातमः ।
	दधत् स्तोत्रे सुवीर्यम् ॥ ३ ॥
९.१०७.१	परीतो षिञ्चता सुतं सोमो य उत्तमं हविः ।
	दधन्वां यो नर्यो अप्स्व् अन्तर् आ सुषाव सोमम् अद्रिभिः ॥ ४ ॥
२	नूनं पुनानो ऽविभिः परि स्रवादब्धः सुरभिंतरः ।
	सुते चित् त्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिर् उत्तरम् ॥ ५ ॥
३ * सुवानश्...	परि स्वानश् चक्षसे देवमादनः क्रतुर् इन्दुर् विचक्षणः ॥ ६ ॥
९.८२.१	असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
* * पर्यैत्य् * * * *	पुनानो वारम् अत्य् एष्य् अव्ययं श्येनो न योनिं
* आसदम्	घृतवन्तम् आसदत् ॥ ७ ॥
३	पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे ।
* * * * उतासरन् * * नसते	स्वसार आपो अभि गा उद् आसरन् सं ग्रावभिर् वसते वीते अध्वरे ॥ ८ ॥
२ ...मृष्टो (एवं कौ) *	कविर् वेधस्या पर्य् एषि माहिनम् अत्यो न निक्तो अभि
[* * *	वाजम् अर्षसि ।
अपसेधन् * * मृडय (नो नास्ति) घृतं	अपसेधं दुरिता सोम नो मृड घृता वसानः परि यासि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	निर्णिजम् ॥ ९ ॥
८.९९.३	श्रायन्त इव सूर्यं विश्वेद् इन्द्रस्य भक्षत ।
* जाते जनमान ... दीधिम	वसूनि जातो जनिमान्य् ओजसा प्रति भागं न दीधिमः ॥ १० ॥
४ अनर्षरातिं ...	अलर्षिरातिं वसुदाम् उप स्तुहि भद्रा इन्द्रस्य रातयः ।
सो...	यो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् ॥ ११ ॥
८.६१.१३	यत इन्द्र भयामहे ततो नो अभयं कृधि ।
* * * * * ऊतिभिर् ...	मघवन् शग्धि तव तन् न ऊतये वि द्विषो वि मृधो जहि ॥ १२ ॥
१४ * * राधस्पते ... विधतः	त्वं हि राधसस् पते राधसो महः क्षयस्यासि विधर्ता ।
	तं त्वा वयं मघवन्न् इन्द्र गिर्वणः सुतावन्तो हवामहे ॥ १३ ॥ ॥५५॥
	३.५६
क ९.६७.१	त्वं सोमासि धारयुर् मन्द्र ओजिष्ठो अध्वरे ।
	पवस्व मंहयद्रयिः ॥ १ ॥
२ * * नृमादनो ...	त्वं सुतो मदिन्तमो दधन्वान् मत्सरिन्तमः ।
इन्द्राय सूरिरन्धसा	इन्दुः सत्राजिद् अस्तृतः ॥ २ ॥
३	त्वं सुष्वाणो अद्रिभिर् अभ्य् अर्ष कनिक्रदत् ।
* * उत्तमम्	द्युमन्तं शुष्मम् आ भर ॥ ३ ॥
९.१०६.७	पवस्व देववीतय इन्दो धाराभिर् ओजसा ।
	आ कलशं मधुमान् सोम नः सदः ॥ ४ ॥
८	तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः ।
	त्वां देवासो अमृताय कं पपुः ॥ ५ ॥
९	आ नः सुतास इन्दवः पुनाना धावता रयिम् ।
	वृष्टिद्यावो रीत्यापः स्वर्विदः ॥ ६ ॥
९.९८.७	परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण ।
	यो देवान् विश्वं इत् परि मदेन सह गच्छति ॥ ७ ॥
६ .. स्वसारो *	द्विर् यं पञ्च स्वयशसं सखायो अद्रिसंहतम् ।
* * * प्रस्नापयन्त्यूर्मिणम्	प्रियम् इन्द्रस्य काम्यं प्रस्नापयन्त ऊर्मयः ॥ ८ ॥
१०	इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे ।
* * * देवाय *	नरे च दक्षिणावते वीराय सदनासदे ॥ ९ ॥
९.१०९.१० * * क्रत्वे ...	पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय ॥ १० ॥
१२	शिशुं जज्ञानं हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम् ॥ ११ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

११ तं...	प्र ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय ॥१२॥
९.६१.१३	उपो षु जातम् अप्तुरं गोभिर् भङ्गं परिष्कृतम् ।
	इन्दुं देवा अयासिषुः ॥ १३ ॥
१५ * णः...	अर्षा नः सोम शं गवे धुक्षस्व पिप्युषीम् इषम् ।
... उक्थम्	वर्धा समुद्रम् उक्थ्य ॥ १४ ॥
१४	तम् इद् वर्धन्तु नो गिरो वत्सं संशिश्वरीर् इव ।
	य इन्द्रस्य हृदंसनिः ॥ १५ ॥
८.१९.१९	भद्रो नो अग्निर् आहुतो भद्रा रातिः सुभग भद्रो अध्वरः ।
	भद्रा उत प्रशस्तयः ॥ १६ ॥
२० ...सासहः	भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहिः ।
...अभिष्टिभिः	अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टये ॥ १७ ॥
१.८४.७	य एक इद् विदयते वसु मर्ताय दाशुषे ।
	ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥ १८ ॥
९	यश् चिद् धि त्वा बहुभ्य आ सुतावं आविवासति ।
	उग्रं तत् पत्यते शव इन्द्रो अङ्ग ॥ १९ ॥
८	कदा मर्तम् अराधसं पदा क्षुम्पम् इव स्फुरत् ।
	कदा नः शुश्रवद् गिर इन्द्रो अङ्ग ॥ २० ॥
१.१०.१	गायन्ति त्वा गायत्रिणो ऽर्चन्त्य् अर्कम् अर्किणः ।
	ब्रह्माणस् त्वा शतक्रत उद् वंशम् इव येमिरे ॥ २१ ॥
२ * * सानुमारुहद् ...	यत् सानोः सान्व् आरुहो भूर्य् अस्पष्ट कर्त्वम् ।
	तद् इन्द्रो अर्थं चेतति यूथेन वृष्णिर् एजति ॥ २२ ॥
३ कौ युङ्क्ष्वा...	युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा ।
	अथा न इन्द्र सोमपा गिराम् उपश्रुतिं चर ॥ २३ ॥ ॥५६॥

३.५७

ऋ १.१३.१ सुसमिद्धो...	सुषमिद्धो न आ वह देवं अग्ने हविष्मते ।
	होतः पावक यक्षि च ॥ १ ॥
२	मधुमन्तं तनूनपाद् यज्ञं देवेषु नः कवे ।
कौ * * ऊतये	अद्या कृणुहि वीतये ॥ २ ॥
३	नराशंसम् इह प्रियम् अस्मिन् यज्ञ उप ह्वये ।
	मधुजिह्वं हविष्कृतम् ॥ ३ ॥
४	अग्न सुखतमे रथे देवं ईडित आ वह ।
	असि होता मनुर्हितः ॥ ४ ॥
५.६८.३	ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य ।
	महि वां क्षत्रं देवेषु ॥ ५ ॥
४	ऋतम् ऋतेन सपन्तेषिरं दक्षम् आशाते ।
	अद्रुहा देवौ वर्धेते ॥ ६ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५	वृष्टिद्यावा रीत्यापेषस् पती दानुमत्याः ।
	बृहन्तं गर्तम् आशाते ॥ ७ ॥
१.६.१	युञ्जन्ति ब्रध्नम् अरुषं चरन्तं परि तस्थुषः ।
	रोचन्ते रोचना दिवि ॥ ८ ॥
२	युञ्जन्त्य् अस्य काम्या हरी विपक्षसा रथे ।
	शोणा धृष्णू नृवाहसा ॥ ९ ॥
३	केतुं कृण्वन्न् अकेतवे पेशो मर्या अपेशसे ।
	सम् उषद्भिर् अजायथाः ॥ १० ॥
६.६०.१०	तम् ईडिष्व यो अर्चिषा वना विश्वा परिष्वजत् ।
	कृष्णा कृणोति जिह्वया ॥ ११ ॥
११	य इद्ध आविवासति सुम्नम् इन्द्रस्य मर्त्यः ।
	द्युम्नाय सुतरा अपः ॥ १२ ॥
१२	ता नो वाजवतीर् इष आशून् पिपृतम् अर्वतः ।
इन्द्रम्...	एन्द्रम् अग्निं च वोढवे ॥ १३ ॥ ॥५७॥
	३.५८
ऋ ९.११०.८ दिवः...	प्रत्नं पीयूषं पूर्व्यं यद् उक्थ्यं महो गाहाद् दिव आ निर् अधुक्षत ।
	इन्द्रम् अभि जायमानं सम् अस्वरन् ॥ १ ॥
९ ...भुवनाभि	अध यद् इमे पवमान रोदसी इमा च विश्वा भुवनानि मज्मना ।
* * निःष्ठा... । कौ... राजसि	यूथे न निष्ठा वृषभो वि तिष्ठसे ॥ २ ॥
६	आद् ईं के चित् पश्यमानास आप्यं वसुरुचो दिव्या अभ्य् अनूषत ।
कौ दिवो न वारं * * *	वारं न देवः सविता व्य् ऊर्णुते ॥ ३ ॥
९.९७.३७ * * * ऋता...	आ जागृविर् विप्र ऋतं मतीनां सोमः पुनानो असदच् चमूषु ।
	सपन्ति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः ॥ ४ ॥
३८ * * * * न धातोभे * * वि * *	स पुनान उप सूरे दधान ओभे अप्रा रोदसी वी ष आवः ।
* * * * * स तू * * * *	प्रिया चिद् यस्य प्रियसास ऊती सतो धनं कारिणे न प्र यंसत् ॥ ५ ॥
३९	स वर्धिता वर्धनः पूयमानः सोमो मीढ्वं अभि नो ज्योतिषावीत् ।
येना...	यत्र नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिम्
उष्णन् (कौ इष्णन्)	इष्णन् ॥ ६ ॥
८.१.१	मा चिद् अन्यद् वि शंसत सखायो मा रिषण्यत ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	इन्द्रम् इत् स्तोता वृषणं सचा सुते मुहुर् उक्था
	च शंसत ॥ ७ ॥
२ * * यथाजुरं...	अवक्रक्षिणं वृषभं यथाजुवं गां न चर्षणीसहम् ।
* संवननोभयंकरं...	विद्वेषणं संवननम् उभयंकरं मंहिष्ठम् उभयाविनम् ॥ ८ ॥
८.३.१५	उद् उ त्ये मधुमत्तमा गिरः स्तोमास ईरते ।
	सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥ ९ ॥
१६ ...आनशुः	कण्वा इव भृगवः सूर्या इव विश्वम् इद् धीतम् आशत ।
	इन्द्रं स्तोमेभिर् महयन्त आयवः प्रियमेधासो अस्वरन्
	॥ १० ॥ ॥५८॥

३.५९

क ९.१०८.१	पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
	महि द्युक्षतमो मदः ॥ १ ॥
२ ...पीता *	यस्य ते पीत्वा वृषभो वृषायते ऽस्य पीत्वा स्वर्विदः ।
...ऽच्छा (एवं का) * *	स सुप्रकेतो अभ्य् अक्रमीद् इषो ऽच्छ वाजं नैतशः ॥ २ ॥
९.१०६.१	इन्द्रम अच्छ सुता इमे वृषणं यन्तु हरयः ।
श्रुष्टी...	श्रुष्टे जातास इन्दवः स्वर्विदः ॥ ३ ॥
२	अयं भराय सानसिर् इन्द्राय पवते सुतः ।
	सोमो जैत्रस्य चेतति यथा विदे ॥ ४ ॥
३ ...गृभ्णीत *	अस्येद इन्द्रो मदेष्व् आ ग्राभं गृभ्णाति सानसिम् ।
* * वृषणं * समप्सुजित् (एवं का)	वज्रं च वृषभं भरत् ॥ ५ ॥
९.११०.१	पर्य् ऊ षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।
...इयसे	द्विषस् तरध्या ऋणया न ईरसे ॥ ६ ॥
३	अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः ।
	गोजीरया रंहमाणः पुरन्ध्या ॥ ७ ॥
२	अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये ।
	वाजं अभि पवमान प्र गाहसे ॥ ८ ॥
९.१०९.१	परि प्र धन्वेन्द्राय सोम स्वादुर् मित्राय पूष्णे भगाय ॥९॥
३	एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ॥ १० ॥
२ * * * * पेयाः...	इन्द्रस् ते सोम सुतस्य पेयात् क्रत्वे दक्षाय विश्वे च
	देवाः ॥ ११ ॥
९.६९.६ ...प्रसुपः *	सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुतः साकम्
	ईरते ।
	तन्तुं ततं परि सर्गास आशवो नेन्द्राद् ऋते पवते धाम
	किं चन ॥ १२ ॥
२	उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तर्
	आसनि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

* * प्रन्नताम्... पवमानः संतनिः सुन्वताम् इव मधुमान् द्रप्सः परि वारम्
अर्षति ॥ १३ ॥

४ * मिमाति... उक्षा मिमेति प्रति यन्ति धेनवो देवस्य देवीर् उप यन्ति
निष्कृतम् ।
अत्य् अक्रमीद् अर्जुनं वारम् अव्ययम् अत्कं न निक्तं परि
सोमो अव्यत ॥ १४ ॥

७.१.१ ...हस्तच्युती जनयन्त अग्निं नरो दीधितिभिर् अरण्योर् हस्तच्युतं जनयत
प्रशस्तम् ।
...अथर्युम् दूरेदृशं गृहपतिम् अथव्युम् ॥ १५ ॥
३ प्रेद्धो अग्ने दीदिहि पुरो नो ऽजस्रया सूर्म्या यविष्ठ ।
त्वां शश्वन्त उप यन्ति वाजाः ॥ १६ ॥
२ तम् अग्निम् अस्ते वसवो न्य् ऋण्वन् सुप्रतिचक्षम् अवसे
कुतश् चित् ।
दक्षाय्यो यो दम आस नित्यः ॥ १७ ॥
१०.१८९.१ आयं गौः पृश्निर् अक्रमीद् असदन् मातरं पुरः ।
पितरं च प्रयन् स्वः ॥ १८ ॥
२ अन्तश् चरति रोचनास्य प्राणाद् अपानती ।
व्य् अख्यन् महिषो दिवम् ॥ १९ ॥
३ त्रिंशद् धाम वि राजति वाक् पतङ्गाय धीयते ।
प्रति वस्तोर् अह द्युभिः ॥ २० ॥ ॥५९॥

Funding by IKS-MoE

11846
CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४.१

ऋ ९.१११.१ ...स्वयुग्वभिः * * स्वयुग्वभिः	अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति सयुग्वभिः सूरो न सयुग्वभिः ।
* सुतस्य...	धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः ।
* * * परियात्य्...	विश्वा यद् रूपा परियास्य् ऋक्वभिः सप्तास्येभिर् ऋक्वभिः ॥ १ ॥
३ पूर्वाम्...	प्राचीम् अनु प्रदिशं याति चेकितत् सं रश्मिभिर् यतते दर्शतो रथो दैव्यो दर्शतो रथः ।
	अग्मन्न् उक्थानि पौंस्येन्द्रं जैत्राय हर्षयन् ।
	वज्रश् च यद् भवथो अनपच्युता समत्स्व् अनपच्युता ॥ २ ॥
२ त्वं त्यत् (ह नास्ति)...	त्वं ह त्यत् पणीनां विदो वसु सं मातृभिर् मर्जयसि स्व आ दम ऋतस्य धीतिभिर् दमे ।
	परावतो न साम तद् यत्रा रणन्ति धीतयः ।
	त्रिधातुभिर् अरुषीभिर् वयो दधे रोचमानो वयो दधे ॥ ३ ॥
१०.१३३.१	प्रोष्व् अस्मै पुरोरथम् इन्द्राय शूषम् अर्चत ।
	अभीके चिद् उ लोककृत् सङ्गे समत्सु वृत्रहा ।
	अस्माकं बोधि चोदिता नभन्ताम् अन्यकेषां ज्याका अधि धन्वसु ॥ ४ ॥
२	त्वं सिन्धूंर् अवासृजो ऽधराचो अहन्न् अहिम् ।
	अशत्रुर् इन्द्र जज्ञिषे विश्वं पुष्यसि वार्यम् ।
	तं त्वा परि ष्वजामहे नभन्ताम् अन्यकेषां ज्याका अधि धन्वसु ॥ ५ ॥
३	वि षु विश्वा अरातयो ऽर्यो नशन्त नो धियः ।
	अस्तासि शत्रवे वधं यो न इन्द्र जिघांसति ।
	या ते रात्रिर् ददिर् वसु नभन्ताम् अन्यकेषां ज्याका अधि धन्वसु ॥ ६ ॥
३.२७.१	प्र वो वाजा अभिद्यवो हविष्मन्तो घृताच्या ।
	देवान् जिगाति सुम्नयुः ॥ ७ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२ ईळे अग्निं विपश्चितं गिरा यज्ञस्य साधनम् ।
श्रुष्टीवानं धितावानम् ॥ ८ ॥
३ अग्ने शकेम ते वयं यमं देवस्य वाजिनः ।
अति द्वेषांसि तरेम ॥ ९ ॥
१.५०.१ उद् उ त्यं जातवेदसं देवं वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥ १० ॥ ॥१॥

४.२

ऋ १.५०.४ तरणिर् विश्वदर्शतो ज्योतिष्कृद् असि सूर्य ।
विश्वम् आ भासि रोचनम् ॥ १ ॥
५ प्रत्यङ् देवानां विशः प्रत्यङ्ङ् उद् एषि मानुषान् ।
प्रत्यङ् विश्वं स्वर् दृशे ॥ २ ॥
८.९३.१ उद् घेद् अभि श्रुतामघं वृषभं नर्यापसम् ।
अस्तारम् एषि सूर्य ॥ ३ ॥
२ नव यो नवतिं पुरो बिभेद बाह्वोजसा ।
अहिं च वृत्रहावधीत् ॥ ४ ॥
३ स न इन्द्रः शिवः सखाश्वावद् गोमद् यवमत् ।
उरुधारेव दोहते ॥ ५ ॥
३.१२.९ इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः ।
तद् वां चेति प्र वीर्यम् ॥ ६ ॥
८ इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च ।
युवोर् अप्तूर्यं हितम् ॥ ७ ॥
७ इन्द्राग्नी अपसस् पर्य् उप प्र यन्ति धीतयः ।
ऋतस्य पथ्या अनु ॥ ८ ॥
१०.१७०.१ विभ्राड् बृहत् पिबतु सोम्यं मध्व् आयुर् दधद् यज्ञपताव् अविह्रुतम् ।
...पुपोष पुरुधा * वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति ॥ ९ ॥
२ विभ्राड् बृहत् सुभृतं वाजसातमं धर्मन् दिवो धरुणे सत्यम् अर्पितम् ।
अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर् जज्ञे असुरहा सपत्नहा ॥ १० ॥ ॥२॥

४.३

ऋ १०.१७०.३ इदं श्रेष्ठं ज्योतिषां ज्योतिर् उत्तमं विश्वजिद् धनजिद् उच्यते बृहत् ।
विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम् ॥ १ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८.१०१.११	बण् महं असि सूर्य बड् आदित्य महं असि ।
* * * * पनस्यते ऽद्धा * * *	महस् ते सतो महिमा पनिष्टम मह्ना देव महं असि ॥ २ ॥
१२	बट् सूर्य श्रवसा महं असि सत्रा देव महं असि ।
	मह्ना देवानाम् असुर्यः पुरोहितो विभु ज्योतिर् अदाभ्यम् ॥ ३ ॥
८.१०२.१३	उप त्वा जामयो गिरो देदिशतीर् हविष्कृतः ।
	वायोर् अनीके अस्थिरन् ॥ ४ ॥
७.९६.५ * * सरस्व...	ये ते सरस्वन्न् ऊर्मयो मधुमन्तो घृतश्चुतः ।
	तेभिर् नो ऽविता भव ॥ ५ ॥
६.६१.१०	उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा ।
	सरस्वती स्तोम्या भूत् ॥ ६ ॥
१.१८.१ सोमानं...	सोमानं स्वरणं कृणुहि ब्रह्मणस् पते ।
	कक्षीवन्तं य औशिजः ॥ ७ ॥
३.६२.१०	तत् सवितुर् वरेण्यं भर्गो देवस्य धीमहि ।
	धियो यो नः प्रचोदयात् ॥ ८ ॥
९.६६.१९	अग्न आयूंषि पवस आ सुवोर्जम् इषं च नः ।
	आरे बाधस्व दुच्छुनाम् ॥ ९ ॥
२१	अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् ।
* रयिं मयि पोषम् (एवं कौ)	दधत् पोषं रयिं मयि ॥ १० ॥ ॥३॥
	४.४
ऋ ९.६६.२०	अग्निर् ऋषिः पवमानः पाञ्चजन्यः पुरोहितः ।
	तम् ईमहे महागयम् ॥ १ ॥
९.८८.१	अयं सोम इन्द्र तुभ्यं सुन्वे तुभ्यं पवते त्वम् अस्य पाहि ।
	त्वं ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम् ॥ २ ॥
२	स ईं रथो न भूरिषाळ् अयोजि महः पुरूणि सातये वसूनि ।
	आद् ईं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त ॥ ३ ॥
७	शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विद् ।
कौ ...पृतनाषाड् न	आपो न मक्षू सुमतिर् भवा नः सहस्राप्साः पृतनाषाण् न यज्ञः ॥ ४ ॥
६.१६.१	त्वम् अग्ने यज्ञानां होता विश्वेषां हितः ।
	देवेभिर् मानुषे जने ॥ ५ ॥
२	स नो मन्द्राभिर् अध्वरे जिह्वाभिर् यजा महः ।
	आ देवान् वक्षि यक्षि च ॥ ६ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३ वेत्था हि वेधो अध्वनः पथश् च देवाञ्जसा ।
अग्ने यज्ञेषु सुक्रतो ॥ ७ ॥
९.१.८ तम् ईं हिन्वन्त्य् अग्रुवो धमन्ति वाकुरं दृतिम् ।
* वारणं * त्रिधातु सारघ मधु ॥ ८ ॥
९ अभीमम् अघ्न्या उत श्रीणन्ति धेनवः शिशुम् ।
सोमम् इन्द्राय पातवे ॥ ९ ॥
१० अस्येद् इन्द्रो मदेष्व् आ विश्वा वृत्राणि जिघ्नते ।
शूरो मघा च मंहते ॥ १० ॥ ॥४॥

४.५

ऋ ८.१६.८ स स्तोम्यः स हव्यः सत्यः सत्वा तुविकूर्मिः ।
...अभिभूतिः एकश् चित् सन्न् अविभूतिः ॥ १ ॥
९ तम् अर्केभिस् तं सामभिस् तं गायत्रैश् चर्षणयः ।
इन्द्रं वर्धन्ति क्षितयः ॥ २ ॥
१० प्रणेतारं वस्यो अच्छा कर्तारं ज्योतिः समत्सु ।
सासह्वांसं युधामित्रान् ॥ ३ ॥
११ स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः ।
इन्द्रो विश्वा अति द्विषः ॥ ४ ॥
१०.१२०.१ तद् इद् आस भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस् त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति शत्रून् अनु यं विश्वे मदन्त्य् ऊमाः ॥ ५ ॥
२ वावृधानः शवसा भूर्योजाः शत्रुर् दासाय भियसं दधाति ।
अव्यनच् च व्यनच् च सस्नि सं ते नवन्त प्रभृता मदेषु ॥ ६ ॥
३ त्वे क्रतुम् अपि वृञ्जन्ति विश्वे द्विर् यद् एते त्रिर् भवन्त्य् ऊमाः ।
स्वादोः स्वादीयः स्वादुना सृजा सम् अदः सु मधु मधुनाभि योधीः ॥ ७ ॥ ॥५॥

४.६

ऋ ८.८८.५ * हि * * * अन्तेभ्यस् * प्र यो रिरिक्ष ओजसा दिवः सदोभ्यस् परि ।
...अनु स्वधां * न त्वा विव्याच रज इन्द्र पार्थिवम् अति विश्वं ववक्षिथ ॥ १ ॥
६ नकिः परिष्टिर् मघवन् मघस्य ते यद् दाशुषे दशस्यसि ।
अस्माकं बोध्य् उचथस्य चोदिता मंहिष्ठो वाजसातये ॥ २ ॥
८.६०.१३ शिशानो वृषभो यथाग्निः शृङ्गे दविध्वत् ।
तिग्मा अस्य हनवो न प्रतिधृषे सुजम्भः सहसो यहुः ॥ ३ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१४	नहि ते अग्ने वृषभ प्रतिधृषे जम्भासो यद् वितिष्ठसे ।
	स त्वं नो होतः सुहुतं हविष् कृधि वंस्वा नो वार्या
	पुरु ॥ ४ ॥
८.१०२.१३	उप त्वा जामयो गिरो देदिशतीर् हविष्कृतः ।
	वायोर् अनीके अस्थिरन् ॥ ५ ॥
१४	यस्य त्रिधात्व् अवृतं बर्हिस् तस्थाव् असंदिनम् ।
	आपश् चिन् नि दधा पदम् ॥ ६ ॥
१५	पदं देवस्य मीढुषो ऽनाधृष्टाभिर् ऊतिभिः ।
	भद्रा सूर्य इवोपदृक् ॥ ७ ॥
६.१६.२८ * * * यासद्...	अग्निस् तिग्मेन शोचिषा यंसद् विश्वं न्य् अत्रिणम् ।
* * वनते *	अग्निर् नो वंसते रयिम् ॥ ८ ॥
२९	सुवीरं रयिम् आ भर जातवेदो विचर्षणे ।
	जहि रक्षांसि सुक्रतो ॥९ ॥
३०	त्वं नः पाह्य् अंहसो जातवेदो अघायतः ।
	रक्षा णो ब्रह्मणस् कवे ॥ १० ॥ ॥६॥
	४.७
ऋ ९.५३.१	उत् ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः ।
	नुदस्व याः परिस्पृधः ॥ १ ॥
२	अया निजघ्निर् ओजसा रथसङ्गे धने हिते ।
	स्तवा अबिभ्युषा हृदा ॥ २ ॥
३ ...दूढ्या (एवं कौ)	अस्य व्रतानि नाधृषे पवमानस्य पूर्व्या ।
	रुज यस् त्वा पृतन्यति ॥ ३ ॥
४	तं हिन्वन्ति मदच्युतं हरिं नदीषु वाजिनम् ।
...मत्सरम् (एवं कौ)	इन्दुम् इन्द्राय मत्सरः ॥ ४ ॥
९.५७.१	प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः ।
	अच्छा वाजं सहस्रिणम् ॥ ५ ॥
२	अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति ।
	हरिस् तुञ्जान आयुधा ॥ ६ ॥
३ ...सुव्रतः (एवं कौ)	स मर्मृजान आयुभिर् इभो राजेव सुव्रतम् ।
	श्येनो न वंसु षीदति ॥ ७ ॥
४ * * * * वसूतो (एवं कौ) * *	स नो विश्वा दिवो वसु उत पृथिव्या अधि ।
	पुनान इन्दव् आ भर ॥ ८ ॥
८.६४.१ * * * स्तोमाः...	उत् त्वा मन्दन्तु सोमाः कृणुष्व राधो अद्रिवः ।
	अव ब्रह्मद्विषो जहि ॥ ९ ॥
२ कौ * पणीन्...	पदा पणींर् अराधसो नि बाधस्व महं असि ।
	न हि त्वा कश् चन प्रति ॥ १० ॥ ॥७॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	४.८
ऋ ८.६४.३	त्वम् ईशिषे सुतानाम् इन्द्र त्वम् असुतानाम् ।
	त्वं राजा जनानाम् ॥ १ ॥
८.६.४	सम् अस्य मन्यवे विशो विश्वा नमन्त कृष्टयः ।
	समुद्रायेव सिन्धवः ॥ २ ॥
६ कौ द्वितीयतृतीयपादयोर् विपर्यासः	वि चिद् वृत्रस्य दोधतो वज्रेण शतपर्वणा ।
	शिरो बिभेद वृष्णिना ॥ ३ ॥
५	ओजस् तद् अस्य तित्विष उभे यत् समवर्तयत् ।
	इन्द्रश् चर्मेव रोदसी ॥ ४ ॥
१.३६.१९	नि त्वाम् अग्ने मनुर् दधे ज्योतिर् जनाय शश्वते ।
	दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥५॥
२०	त्वेषासो अग्नेर् अमवन्तो अर्चयो भीमासो न प्रतीतये ।
	रक्षस्विनः सदम् इद् यातुमावतो विश्वं सम् अत्रिणं दह ॥ ६ ॥
८.९३.४	यद् अद्य कच् च वृत्रहन्न् उदगा अभि सूर्य ।
	सर्वं तद् इन्द्र ते वशे ॥ ७ ॥
५	यद् वा प्रवृद्ध सत्पते न मरा इति मन्यसे ।
	उतो तत् सत्यम् इत् तव ॥ ८ ॥
६	ये सोमासः परावति ये अर्वावति सुन्विरे ।
	सर्वांस् तं इन्द्र गच्छसि ॥ ९ ॥
१.२२.१७	इदं विष्णुर् वि चक्रमे त्रेधा नि दधे पदम् ।
...पांसुरे	समूढम् अस्य पांसुले ॥ १० ॥ ॥८॥
	४.९
ऋ १.२२.१८	त्रीणि पदा वि चक्रमे विष्णुर् गोपा अदाभ्यः ।
	अतो धर्माणि धारयन् ॥ १ ॥
१९	विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।
	इन्द्रस्य युज्यः सखा ॥ २ ॥
२०	तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
	दिवीव चक्षुर् आततम् ॥ ३ ॥
१.२७.१०	जराबोध तद् विड्ढि विशेविशे यज्ञियाय ।
	स्तोमं रुद्राय दृशीकम् ॥ ४ ॥
११	स नो महं अनिमानो धूमकेतुः पुरुश्चन्द्रः ।
* * हिन्वतु (एवं कौ)	धिये वाजाय हिन्वति ॥ ५ ॥
१२	स रेवं इव विश्पतिर् दैव्यः केतुः शृणोतु नः ।
	उक्थैर् अग्निर् बृहद्भानुः ॥ ६ ॥
६.४५.२२	तद् वो गाय सुते सचा पुरुहूताय सत्वने ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शं यद् गवे न शाकिने ॥ ७ ॥
२३ न घा वसुर् नि यमते दानं वाजस्य गोमतः ।
यत् सीम् उप श्रवद् गिरः ॥ ८ ॥
२४ कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत् ।
शचीभिर् अप नो वरत् ॥ ९ ॥
८.१२.१६ यत् सोमम् इन्द्र विष्णवि यद् वा घ त्रित आप्त्ये ।
यद् वा मरुत्सु मन्दसे सम् इन्दुभिः ॥ १० ॥ ॥९॥

४.१०

ऋ ८.१२.१७ यद् वा शक्र परावति समुद्रे अधि मन्दसे ।
अस्माकम् इत् सुते रणा सम् इन्दुभिः ॥ १ ॥
१८ यद् वासि सुन्वतो वृधो यजमानस्य सत्पते ।
उक्थे वा यस्य रण्यसि सम् इन्दुभिः ॥ २ ॥
शौ ६.४९.१ तं आ ६.१०.१ न हि ते अग्ने तन्वै क्रूरं विवेद मर्त्यः ।
कपिर् बभस्ति तेजनं पुनर् जरायु गौर् इव ॥ ३ ॥
शौ २ त्वेष तु वेत् सं च वि चैव ऋण्वसि यद् उत्तराद्रा उपरेषु खादसि ।
शीर्ष्णा शिरो वक्षसा वक्षो अर्धयन्न् अंशुं बिभर्षि हरितेभिर् आसभिः ॥ ४ ॥
ऋ ८.१.७ कयथ कद् असि पुरुत्रा चिद् धि ते मनः ।
अलर्षि युध्म खजकृत् पुरंदर प्र गायत्रा अगासिषुः ॥ ५ ॥
८ प्रास्मै गायत्रम् अर्चत वावातुर् यः पुरंदरः ।
याभिः काण्वस्योप बर्हिर् आसदं यासद् वज्री भिनत् पुरः ॥ ६ ॥
९ ये ते सन्ति दशग्विनः शतिनो ये सहस्रिणः ।
अश्वासो ये ते वृषणो रघुद्रुवस् तेभिर् नस् तूयम् आ गहि ॥ ७ ॥
८.९४.१ गौर् धयति मरुतां श्रवस्युर् माता मघोनाम् ।
युक्ता वह्नी रथानाम् ॥ ८ ॥
२ यस्या देवा उपस्थे व्रता विश्वे धारयन्ते ।
सूर्यामासा दृशे कम् ॥ ९ ॥
३ तत् सु नो विश्वे अर्य आ सदा गृणन्ति कारवः ।
मरुतः सोमपीतये ॥ १० ॥ ॥१०॥

४.११

ऋ ४.१७.८ सत्राहणं दाधृषिं तुम्रम् इन्द्रं महाम् अपारं वृषभं सुवज्रम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हन्ता यो वृत्रं सनितोत वाजं दाता मघानि मघवा सुराधाः ॥ १ ॥

९ अयं वृतश् चातयते समीचीर् य आजिषु मघवा शृण्व एकः ।
अयं वाजं भरति यं सनोत्य् अस्य प्रियासः सख्ये स्याम ॥ २ ॥

१० अयं शृण्वे अध जयन्न् उत घ्नन्न् अयम् उत प्र कृणुते युधा गाः ।
यदा सत्यं कृणुते मन्युम् इन्द्रो विश्वं दृढं भयत एजद् अस्मात् ॥ ३ ॥

८.७७.१० विश्वेत् ता विष्णुर् आ भरद् उरुक्रमस् त्वेषितः ।
शतं महिषान् क्षीरपाकम् ओदनं वराहम् इन्द्र एमुषम् ॥ ४ ॥

११ तुविक्षं ते सुकृतं सूमयं धनुः साधुर् बुन्दो हिरण्ययः ।
उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिद् ऋदूवृधा ॥ ५ ॥

८.१०३.६ यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
...यन्त्य् * मधोर् न पात्रा प्रथमान्य् अस्मै प्र स्तोमा यन्त्व् अग्नये ॥ ६ ॥

७ अश्वं न गीर्भी रथ्यं सुदानवो मर्मृज्यन्ते देवयवः ।
उभे तोके तनये दस्म विश्पते पर्षि राधो मघोनाम् ॥ ७ ॥

१.४४.१ अग्ने विवस्वद् उषसश् चित्रं राधो अमर्त्य ।
आ दाशुषे जातवेदो वहा त्वम् अद्या देवं उषर्बुधः ॥ ८ ॥

२ जुष्टो हि दूतो असि हव्यवाहनो ऽग्ने रथीर् अध्वराणाम् ।
सजूर् अश्विभ्याम् उषसा सुवीर्यम् अस्मे धेहि श्रवो बृहत् ॥ ९ ॥

१.२७.४ इमम् ऊ षु त्वम् अस्माकं सनिं गायत्रं नव्यांसम् ।
अग्ने देवेषु प्र वोचः ॥ १० ॥ ॥११॥

४.१२

ऋ १.२७.५ आ नो भज परमेष्व् आ वाजेषु मध्यमेषु ।
शिक्षा वस्वो अन्तमस्य ॥ १ ॥

६ विभक्तासि चित्रभानो सिन्धोर् ऊर्मा उपाक आ ।
सद्यो दाशुषे क्षरसि ॥ २ ॥

८.६.१० ...जग्रभ अहम् इद् धि पितुष् परि मेधाम् ऋतस्य जग्रह ।
अहं सूर्य इवाजनि ॥ ३ ॥

११ कौ * * जन्मना ... अहं प्रत्नेन मन्मना गिरः शुम्भामि कण्ववत् ।
येनेन्द्रः शुष्मम् इद् दधे ॥ ४ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१२ ये त्वाम् इन्द्र न तुष्टुवुर् ऋषयो ये च तुष्टुवुः ।
ममेद् वर्धस्व सुष्टुतः ॥ ५ ॥
९.६६.१९ अग्न आयूंषि पवस आसुवोर्जम् इषं च नः ।
आरे बाधस्व दुच्छुनाम् ॥ ६ ॥
२१ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् ।
* रयिं मयि पोषम् (एवं कौ) दधत् पोषं रयिं मयि ॥ ७ ॥
२० अग्निर् ऋषिः पवमानः पाञ्चजन्यः पुरोहितः ।
तम् ईमहे महागयम् ॥ ८ ॥
५.२६.१ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ।
आ देवान् वक्षि यक्षि च ॥ ९ ॥
१.१२.१० स नः पावक दीदिवो ऽग्ने देवं इहा वह ।
उप यज्ञं हविश् च नः ॥ १० ॥
९ यो अग्निं देववीतये हविष्मं आविवासति ।
तस्मै पावक मृडय ॥ ११ ॥
८.४४.२१ अग्निः शुचिव्रततमः शुचिर् विप्रः शुचिः कविः ।
शुची रोचत आहुतः ॥ १२ ॥
१७ उद् अग्ने शुचयस् तव शुक्रा भ्राजन्त ईरते ।
तव ज्योतींष्य् अर्चयः ॥ १३ ॥
२.७.४ शुचिः पावक वन्द्यो ऽग्ने बृहद् वि रोचसे ।
त्वं घृतेभिर् आहुतः ॥ १४ ॥
१.७५.३ कस् ते जामिर् जनानाम् अग्ने को दाश्वध्वरः ।
को ह कस्मिन्न् असि श्रितः ॥ १५ ॥ ॥१२॥

४.१३

ऋ १.७५.४ त्वं जामिर् जनानाम् अग्ने मित्रो असि प्रियः ।
सखा सखिभ्य ईड्यः ॥ १ ॥
५ यजा नो मित्रावरुणा यजा देवं ऋतं बृहत् ।
अग्ने यक्षि स्वं दमम् ॥ २ ॥
३.२७.१३ ईळेन्यो नमस्यस् तिरस् तमांसि दर्शतः ।
सम् अग्निर् इध्यते वृषा ॥ ३ ॥
१४ वृषो अग्निः सम् इध्यते ऽश्वो न देववाहनः ।
तं हविष्मन्त ईळते ॥ ४ ॥
१५ वृषणं त्वा वयं वृषन् वृषणः सम् इधीमहि ।
अग्ने दीद्यतं बृहत् ॥ ५ ॥
८.४४.४ उत् ते बृहन्तो अर्चयः समिधानस्य दीदिवः ।
अग्ने शुक्रास ईरते ॥ ६ ॥
५ उप त्वा जुह्वो मम घृताचीर् यन्तु हर्यत ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अग्ने हव्या जुषस्व नः ॥ ७ ॥
६ मन्द्रं होतारम् ऋत्विजं चित्रभानुं विभावसुम् ।
अग्निम् ईडे स उ श्रवत् ॥ ८ ॥
१०.३.१ इनो राजन्न् अरतिः समिद्धो रौद्रो दक्षाय सुषुमं अदर्शि ।
चिकिद् वि भाति भासा बृहतासिक्नीम् एति रुशतीम् अपाजन् ॥ ९ ॥
२ कृष्णां यद् एनीम् अभि वर्पसा भूज् जनयन् योषां बृहतः पितुर् जाम् ।
ऊर्ध्वं भानुं सूर्यस्य स्तभायन् दिवो वसुभिर् अरतिर् वि भाति ॥ १० ॥
३ भद्रो भद्रया सचमान आगात् स्वसारं जारो अभ्य् एति पश्चात् ।
सुप्रकेतैर् द्युभिर् अग्निर् वितिष्ठन् रुशद्भिर् वर्णैर् अभि रामम् अस्थात् ॥ ११ ॥ ॥१३॥

४.१४

ऋ ८.६०.९ पाहि नो अग्न एकया पाह्य् उत द्वितीयया ।
पाहि गीर्भिस् तिसृभिर् ऊर्जां पते पाहि चतसृभिर् वसो ॥ १ ॥
१० पाहि विश्वस्माद् रक्षसो अराव्णः प्र स्म वाजेषु नो ऽव ।
त्वाम् इद् धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥ २ ॥
८.८४.४ कया ते अग्ने अङ्गिर ऊर्जो नपाद् उपस्तुतिम् ।
वराय देव मन्यवे ॥ ३ ॥
५ दाशेम कस्य मनसा यज्ञस्य सहसो यहो ।
कद् उ वोच इदं नमः ॥ ४ ॥
६ अधा त्वं हि नस् करो विश्वा अस्मभ्यं सुक्षितीः ।
वाजद्रविणसो गिरः ॥ ५ ॥
८.७१.१० अच्छा नः शीरशोचिषं गिरो यन्तु दर्शतम् ।
*** पुरूवसुं (एवं कौ)... अच्छा यज्ञासो नमसा पुरोवसुं पुरुप्रशस्तम् ऊतये ॥ ६ ॥
११ अग्निं सूनुं सहसो जातवेदसं दानाय वार्याणाम् ।
द्विता यो भूद् अमृतो मर्त्येष्व् आ होता मन्द्रतमो विशि ॥ ७ ॥
१४ अग्निम् ईडिष्वावसे गाथाभिः शीरशोचिषम् ।
...अग्निं ** अग्निं राये पुरुमीढ श्रुतं नरो ऽग्निः सुदीतये छर्दिः ॥ ८ ॥
१५ अग्निं द्वेषो योतवै नो गृणीमस्य् अग्निं शं योश् च दातवे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विश्वासु विक्ष्व् अवितेव हव्यो भुवद् वस्तुर् ऋषूणाम्
॥ ९ ॥ ॥१४॥

४.१५

ऋ ३.११.५ अदाभ्यः पुरएता विशाम् अग्निर् मानुषीणाम् ।
तूर्णी रथः सदा नवः ॥ १ ॥
६ साह्वान् विश्वा अभियुजः क्रतुर् देवानाम् अमृक्तः ।
अग्निस् तुविश्रवस्तमः ॥ २ ॥
७ अभि प्रयांसि वाहसा दाश्वं अश्नोति मर्त्यः ।
क्षयं पावकशोचिषः ॥ ३ ॥
१.७९.४ अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
* धेहि ... अस्मे देहि जातवेदो महि श्रवः ॥ ४ ॥
५ स इधानो वसुष् कविर् अग्निर् ईडेन्यो गिरा ।
रेवद् अस्मभ्यं पुर्वणीक दीदिहि ॥ ५ ॥
६ क्षपो राजन्न् उत त्मनाग्ने वस्तोर् उतोषसः ।
स तिग्मजम्भ रक्षसो दह प्रति ॥ ६ ॥
८.७४.१ विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥ ७ ॥
२ यं जनासो हविष्मन्तो मित्रं न सर्पिर् आसुतिम् ।
प्रशंसन्ति प्रशस्तिभिः ॥ ८ ॥
३ पन्यांसं जातवेदसं यो देवतात्य् उद्यता ।
हव्यान्य् ऐरयद् दिवि ॥ ९ ॥
६.१५.७ समिद्धम् अग्निं समिधा गिरा गृणे शुचिं पावकं पुरो
अध्वरे ध्रुवम् ।
विप्रं होतारं पुरुवारम् अद्रुहं कविं सुम्नैर् ईमहे जातवे-
दसम् ॥ १० ॥ ॥१५॥

४.१६

ऋ ६.१५.८ त्वां दूतम् अग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुम्
ईड्यम् ।
देवासश् च मर्तासश् च जागृविं विभुं विश्पतिं नमसा नि
षेदिरे ॥ १ ॥
९ विभूषन्न् अग्न उभयं अनु व्रता दूतो देवानां रजसी सम्
ईयसे ।
यत् ते धीतिं सुमतिम् आवृणीमहे ऽध स्मा नस्
* * भव (एवं कौ) त्रिवरूथः शिवो भवा ॥ २ ॥
८.१०१.९ आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्तः पवित्र उपरि श्रीणानो ऽयं शुक्रो अयामि ते ॥ ३ ॥
१० वेत्य् अध्वर्युः पथिभी रजिष्ठैः प्रति हव्यानि वीतये ।
अधा नियुत्व उभयस्य नः पिब शुचिं सोमं गवाशिरम्
॥ ४ ॥
८.२.४ इन्द्र इत् सोमपा एक इन्द्रः सुतपा विश्वायुः ।
अन्तर् देवान् मर्त्यांश् च ॥ ५ ॥
५ न यं शुक्रो न दुराशीर् न तृप्रा उरुव्यचसम् ।
अपस्पृण्वते सुहार्दम् ॥ ६ ॥
६ गोभिर् यद् ईम् अन्ये अस्मन् मृगं न व्रा मृगयन्ते ।
अभित्सरन्ति धेनुभिः ॥ ७ ॥
७ त्रय इन्द्रस्य सोमाः सुतासः सन्तु देवस्य ।
स्वे क्षये सुतपाव्नः ॥ ८ ॥
८ त्रयः कोशासः श्चोतन्ति तिस्रश् चम्वः सुपूर्णाः ।
समाने अधि भार्मन् ॥ ९ ॥
९ शुचिर् असि पुरुनिःष्ठाः क्षीरैर् मध्यत आशीर्तः ।
दध्ना मन्दिष्ठः शूरस्य ॥ १० ॥ ॥१६॥

४.१७

ऋ ९.९८.१० इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे ।
* * * देवाय * नरे च दक्षिणावते वीराय सदनासदे ॥ १ ॥
९ स वां यज्ञेषु मानवी इन्दुर् जनिष्ट रोदसी ।
देवो देवी गिरिष्ठा अस्रेधन्तं तुविष्वणि ॥ २ ॥
१२ * * पुरोरुचं... । कौ... वयं यूयं [* * तं सखायः पुरूरुचं यूयं वयं च सूरयः ।
अश्याम वाजगन्ध्यं सनेम वाजपस्त्यम् ॥ ३ ॥
८.४५.१ आ घा ये अग्निम् इन्धते स्तृणन्ति बर्हिर् आनुषक् ।
येषाम् इन्द्रो युवा सखा ॥ ४ ॥
२ बृहन्न् इद् इध्म एषां भूरि शस्तं पृथुः स्वरुः ।
येषाम् इन्द्रो युवा सखा ॥ ५ ॥
३ अयुद्ध इद् युधा वृतं शूर आजति सत्वभिः ।
येषाम् इन्द्रो युवा सखा ॥ ६ ॥
८.२४.१९ एतो न्व् इन्द्रं स्तवाम सखायः स्तोम्यं नरम् ।
कृष्टीर् यो विश्वा अभ्य् अस्त्य् एक इत् ॥ ७ ॥
२० अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः ।
घृतात् स्वादीयो मधुनश् च वोचत ॥ ८ ॥
२१ यस्यामितानि वीर्या न राधः पर्येतवे ।
ज्योतिर् न विश्वम् अभ्य् अस्ति दक्षिणा ॥ ९ ॥
कौ * * * * सरूप... सुमन्मा वस्वी रन्ती सूनरी सुरूप वृषन्न् आ गहि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इमौ भद्रौ धुर्याव् अभि ताव् इमा उप सर्पतः ॥ १० ॥
इमौ मन्त्रावृग्वेदे न स्तः — नीव शीर्षाणि मृढ्वं मध्य आपस्य तिष्ठति ।
शृङ्गेभिर् दशभिर् दिशन् ॥ ११ ॥ ॥१७॥

४.१८

ऋ ५.२६.४ अग्ने विश्वेभिर् आ गहि देवेभिर् हव्यदातये ।
होतारं त्वा वृणीमहे ॥ १ ॥
५ यजमानाय सुन्वत आग्ने सुवीर्यं वह ।
देवैर् आ सत्सि बर्हिषि ॥ २ ॥
६ समिधानः सहस्रजिद् अग्ने धर्माणि पुष्यसि ।
देवानां दूत उक्थ्यः ॥ ३ ॥
५.७१.२ विश्वस्य हि प्रचेतसा वरुण मित्र राजथः ।
ईशाना पिप्यतं धियः ॥ ४ ॥
१ आ नो गन्तं रिशादसा वरुण मित्र बर्हणा ।
उपेमं चारुम अध्वरम् ॥ ५ ॥
३ उप नः सुतम् आ गतं वरुण मित्र दाशुषः ।
अस्य सोमस्य पीतये ॥ ६ ॥
८.५३.३ आ नो विश्वेषां रसं मध्वः सिञ्चन्त्व् अद्रयः ।
ये परावति सुन्विरे जनेष्व् आ ये अर्वावतीन्दवः ॥ ७ ॥
४ विश्वा द्वेषांसि जहि चाव चा कृधि विश्वे सन्वन्त्व् आ वसु ।
शीष्टेषु चित् ते मदिरासो अंशवो यत्रा सोमस्य तृम्पसि ॥ ८ ॥
८.९०.१ * * * हव्य इन्द्रः * भूषतु — आ नो विश्वासु हव्यम् इन्द्रं समत्सु भूषत ।
* * * वृत्रहा * ऋचीषमः (कौ ऋचीषम) — उप ब्रह्माणि सवनानि वृत्रहन् परमज्या ऋचीषमा ॥ ९ ॥
२ त्वं दाता प्रथमो राधसाम् अस्य् असि सत्य ईशानकृत् ।
तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः ॥ १० ॥ ॥१८॥

४.१९

ऋ ८.५१.९ यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।
तिरश् चिद् अर्ये रुशमे पवीरवि तुभ्येत् सो अज्यते रयिः ॥ १ ॥
१० तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कम् आनृचुः ।
... सुवानास * — अस्मे रयिः पप्रथे वृष्ण्यं शवो ऽस्मे स्वानास इन्दवः ॥ २ ॥
१.३६.५ मन्द्रो होता गृहपतिर् अग्ने दूतो विशाम् असि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वे विश्वा संगतानि व्रता ध्रुवा यानि देवा अकृण्वत ॥ ३ ॥
६ त्वे इद् अग्ने सुभगे यविष्ठ्य विश्वम् आ हूयते हविः ।
स त्वं नो अद्य सुमना उतापरं यक्षि देवान् सुवीर्या ॥ ४ ॥
४.८.१ दूतं वो विश्ववेदसं हव्यवाहम् अमर्त्यम् ।
यजिष्ठम् ऋञ्जसे गिरा ॥ ५ ॥
२ स हि वेदा वसुधितिं महाँ आरोधनं दिवः ।
स देवाँ एह वक्षति ॥ ६ ॥
३ स वेद देव आनमं देवाँ ऋतायते दमे ।
दाति प्रियाणि चिद् वसु ॥ ७ ॥
९.८९.२ राजा सिन्धूनाम् अवसिष्ट वास ऋतस्य नावम् आरुहद् रजिष्ठाम् ।
अप्सु द्रप्सो वावृधे श्येनजूतो दुह ईं पिता दुह ईं पितुर् जाम् ॥ ८ ॥
३ सिंहं नसन्त मध्वो अयासं हरिम् अरुषं दिवो अस्य पतिम् ।
शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्य् उक्षा ॥ ९ ॥
४ मधुपृष्ठं घोरम् अयासम् अश्वं रथे युञ्जन्त्य् उरुचक्र ऋष्वम् ।
स्वसार ईं जामयो मर्जयन्ति सनाभयो वाजिनम् ऊर्जयन्ति ॥ १० ॥ ॥१९॥

४.२०

ऋ ८.४.७ मा भेम मा श्रमिष्मोग्रस्य सख्ये तव ।
महत् ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम् ॥ १ ॥
८ सव्याम् अनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति ।
...पिब (एवं कौ) मध्वा संपृक्ताः सारघेण धेनवस् तूयम् एहि द्रवा पिबा ॥ २ ॥
८.३३.१० सत्यम् इत्था वृषेद् असि वृषजूतिर् नो ऽवृतः ।
वृषा ह्य् उग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥ ३ ॥
११ वृषणस् ते अभीशवो वृषा कशा हिरण्ययी ।
वृषा रथो मघवन् वृषणा हरी वृषा त्वं शतक्रतो ॥ ४ ॥
१२ वृषा सोता सुनोतु ते वृषन्न् ऋजीपिन्न् आ भर ।
वृषा दधन्वे वृषणं नदीष्व् आ तुभ्यं स्थातर् हरीणाम् ॥ ५ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८.३.३ * * * पुरूवसो (एवं कौ)...	इमा उ त्वा पुरोवसो गिरो वर्धन्तु या मम ।
	पावकवर्णाः शुचयो विपश्चितो ऽभि स्तोमैर् अनूषत ॥ ६ ॥
४	अयं सहस्रम् ऋषिभिः सहस्कृतः समुद्र इव पप्रथे ।
	सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥ ७ ॥
९.८६.४३ ...मधुनाभ्य्	अञ्जते व्य् अञ्जते सम् अञ्जते क्रतुं रिहन्ति मध्वाभ्य् अञ्जते ।
	सिन्धोर् उच्छ्वासे पतयन्तम् उक्षणं हिरण्यपावाः पशुम्
आसु *	अप्सु गृभ्णते ॥ ८ ॥
४५	अग्रगो राजाप्यस् तविष्यते विमानो अह्नां भुवनेष्व् अर्पितः ।
	हरिर् घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥ ९ ॥
४४	विपश्चिते पवमानाय गायत मही न धारात्य् अन्धो अर्षति ।
	अहिर् न जूर्णाम् अति सर्पति त्वचम् अत्यो न क्रीडन्न् असरद् वृषा हरिः ॥ १० ॥ ॥२०॥
	४.२१
ऋ ७.१६.११ ...विवष्ट्य् *	देवो वो द्रविणोदाः पूर्णां विवष्ट्व् आसिचम् ।
	उद् वा सिञ्चध्वम् उप वा पृणध्वम् आद् इद् वो देव ओहते ॥ १ ॥
१२	तं होतारम् अध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत ।
	दधाति रत्नं विधते सुवीर्यम् अग्निर् जनाय दाशुषे ॥ २ ॥
८.१०३.१	अदर्शि गातुवित्तमो यस्मिन् व्रतान्य् आदधुः ।
...नक्षन्त * *	उपो षु जातम् आर्यस्य वर्धनम् अग्निं नक्षन्तु नो गिरः ॥ ३ ॥
३	यस्माद् रेजन्त कृष्टयश् चर्कृत्यानि कृण्वतः ।
...सपर्यत	सहस्रसां मेधसाताव् इव त्मनाग्निं धीभिर् नमस्यत ॥ ४ ॥
२ * * * * अच्छा * *	प्र दैवोदासो अग्निर् देवं इन्द्रो न मज्मना ।
...सानवि	अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि ॥ ५ ॥
९.१७.८	मधोर् धाराम् अनु क्षर तीव्रः सधस्थम् आसदः ।
	चारुर् ऋताय पीतये ॥ ६ ॥
१	प्र निम्नेनेव सिन्धवो घ्नन्तो वृत्राणि भूर्णयः ।
	सोमा असृग्रम् आशवः ॥ ७ ॥
२ * सुवानास...	अभि स्वानास इन्दवो वृष्टयः पृथिवीम् इव ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

* * अक्षरन् (एवं कौ) इन्द्रं सोमासो अस्वरन् ॥ ८ ॥
८.२.१० इमे त इन्द्र सोमास् तीव्रा अस्मे सुतासः ।
शुक्रा आशिरं याचन्ते ॥ ९ ॥
११ तं आशिरं पुरोडाशम् इन्द्रेमं सोमं श्रीणीहि ।
रेवन्तं हि त्वा शृणोमि ॥ १० ॥ ॥२१॥

४.२२

ऋ ८.२.१२ हृत्सु पीतासो युध्यन्ते दुर्मदासो न सुरायाम् ।
ऊधर् न नग्ना जरन्ते ॥ १ ॥
९.६६.२४ पवमान ऋतं बृहच् छुक्रं ज्योतिर् अजीजनत् ।
कृष्णा तमांसि जङ्घनत् ॥ २ ॥
२६ पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः ।
हरिश्चन्द्रो मरुद्गणः ॥ ३ ॥
२७ * * अश्नवद् ... पवमान व्य् अश्नुहि रश्मिभिर् वाजसातमः ।
दधत् स्तोत्रे सुवीर्यम् ॥ ४ ॥
८.१६.१ प्र सम्राजं चर्षणीनाम् इन्द्रं स्तोता नव्यं गीर्भिः ।
नरं नृषाहं मंहिष्ठम् ॥ ५ ॥
२ यस्मिन्न् उक्थानि रण्यन्ति विश्वानि च श्रवस्या ।
अपाम् अवो न समुद्रे ॥ ६ ॥
३ तं सुष्टुत्या विवासे ज्येष्ठराजं भरे कृत्नुम् ।
महो वाजिनं सनिभ्यः ॥ ७ ॥
३.१२.५[१.२] प्र वाम् अर्चन्त्य् उक्थिनो नीथाविदो जरितारः ।
४[३] इन्द्राग्नी इष आ वृणे ॥ ८ ॥
६ इन्द्राग्नी नवतिं पुरो दासपत्नीर् अधूनुतम् ।
साकम् एकेन कर्मणा ॥ ९ ॥
७ इन्द्राग्नी अपसस् पर्य् उप प्र यन्ति धीतयः ।
ऋतस्य पथ्या अनु ॥ १० ॥ ॥२२॥

४.२३

ऋ ३.१२.४ तोशा वृत्रहणा हुवे सजित्वानापराजिता ।
इन्द्राग्नी वाजसातमा ॥ १ ॥
८.८९.३ प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत ।
वृत्रं हनति वृत्रहा शतक्रतुर् वज्रेण शतपर्वणा ॥ २ ॥
४ अभि प्र भर धृषता धृषन्मनः श्रवश् चित् ते असद् बृहत् ।
अर्षन्त्व् आपो जवसा वि मातरो हनो वृत्रं जया स्वः ॥ ३ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

८.३.५	इन्द्रम् इद् देवतातय इन्द्रं प्रयत्य् अध्वरे ।
	इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥ ४ ॥
६	इन्द्रो मह्ना रोदसी पप्रथच् छव इन्द्रः सूर्यम् अरोचयत् ।
...सुवानास *	इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे स्वानास इन्दवः ॥ ५ ॥
७.१००.५ * * * * * नामार्यः * *	प्र तत् ते अद्य शिपिविष्ट हव्यम् अर्यः शंसामि वयुनानि विद्वान् ।
	तं त्वा गृणामि तवसम् अतव्यान् क्षयन्तम् अस्य रजसः पराके ॥ ६ ॥
६ कौ * * * * परिचक्षि नाम * * * *	किम् इत् ते विष्णो परिचक्ष्यं भूत् प्र यद् ववक्षे शिपिविष्टो अस्मि ।
बभूथ (एवं कौ)	मा वर्पो अस्मद् अप गूह एतद् यद् अन्यरूपः समिथे बभूथा ॥ ७ ॥
	वषट् ते विष्णव् आस आ कृणोमि तन् मे जुषस्व शिपिविष्ट हव्यम् ।
	वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥
४.४७.१	वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु ।
	आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥ ९ ॥
२	इन्द्रश् च वायव् एषां सोमानां पीतिम् अर्हथः ।
	युवां हि यन्तीन्दवो निम्नम् आपो न सध्र्यक् ॥१०॥ ॥२३॥
	४.२४
ऋ ४.४७.३	वायव् इन्द्रश् च शुष्मिणा सरथं शवसस् पती ।
	नियुत्वन्ता न ऊतय आ यातं सोमपीतये ॥ १ ॥
९.९९.२ अध (एवं कौ) ... गाहते	अधा क्षपा परिष्कृतो वाजं अभि प्र गाहसे ।
	यदी विवस्वतो धियो हरिं हिन्वन्ति यातवे ॥ २ ॥
३	तम् अस्य मर्जयामसि मदो य इन्द्रपातमः ।
	यं गाव आसभिर् दधुः पुरा नूनं च सूरयः ॥ ३ ॥
४	तं गाथया पुराण्या पुनानम् अभ्य् अनूषत ।
